श्रीः

क्षयमास मीमांसा

रचयिता :

विद्वान् के· वासुदेव सोमयाजी,

धर्मशास्त्र प्राध्यापकः,

श्रीमन्महाराज संस्कृत महापाठशाला, महीशूरपुरी·

KSHAYAMĀSA MĪMĀMSĀ

BY

VIDVAN. K. VĀSUDÉVA SŌMAYĀJĪ,

Head of the Department of Dharmashastra,
Maharaja's Sanskrit College, Mysore.

30/-

मूल्यम् : ~~२-५०~~

Price : 2-50

1963

रमानन्द भट्टः

श्रीः

क्षयमाससमीमांसा

मीमांसा, धर्मशास्त्र, ज्यौतिष, साहित्य विदुषा
श्रीमन्महाराजसंस्कृतमहापाठशाला
धर्मशास्त्राध्यापकेन
के. वासुदेव सोमयाजिना
विरचिता

श. १८८६

विषयसूची

विषयाः	पत्र.सं.	विषयाः	पत्र.सं.
मङ्गलाचरणम्	१	क्षयमासश्राद्धविषये मतान्तराणि	५७
संवत्सरनिरूपणम्	,,	तन्निरासः	६०
मासनिरूपणम्	४	परमसिद्धान्तः	७०
चैत्रादीनां चान्द्रत्वम्	६	सङ्कल्पे मासाद्युल्लेखः	७३
चैत्रादिमासलक्षणम्	७	पूर्वपटलार्थसङ्ग्रहः	७४
मासद्वैविध्यम्	११	अधिमासकार्याकार्ये	७५
शुद्धमासनिरूपणम्	१३	प्राकृतकार्याकार्ये	७९
मलमासनिरूपणम्	१७	मतान्तरम्	८०
अधिमासनिरूपणम्	,,	शिवशङ्करमतम्	८१
क्षयमासनिरूपणम्	२४	सिद्धान्तः	,,
संसर्पनिरूपणम्	२६	चातुर्मास्यनिर्णयः	८५
प्राकृतनिरूपणम्	२९	पित्र्यनिर्णयः	८६
मतान्तरनिरसनम्	३५	क्षयमासकार्याकार्ये	८९
प्राकृतलक्षणम्	३९	पित्र्यनिर्णयः	९१
जीमूतवाहनमतम्	४०	उक्तार्थसङ्ग्रहः	९४
तन्निरसनम्	४१	मासिकनिर्णयः	९५
स्मृतितत्त्वकारमतम्	४४	प्रथमस्याप्यावृत्तिः	९६
तन्निरसनम्	४६	मासिकानावृत्तिपक्षः	९८
क्षयस्य निर्मूलत्वचर्चा	५४	ऊनमासिकनिर्णयः	१०२
मासममीकरणवादः	५५	क्षयमासवर्षफलम्	१०४
तन्निरासः	,,	ग्रन्थकर्तुः परिचयः	१०४

निवेदनम्

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

विदितमेव हि भवतां यदस्मिन् वर्षे आश्विनमार्गशीर्षयोराधिक्यक्षयौ भविष्यत इति । एतद्विषये इण्डियामीट्रलाजिकल्डिपार्टमेण्ट्सम्बन्धिन्याः केन्द्रप्रान्तसर्वकारद्वारा प्राप्ताया अधिकाश्विने नवरात्रकर्तव्यत्वस्य क्षयाभावमाससमीकरणयोश्च प्रतिपादिकायाः पत्रिकायाः विमर्शार्थं महीशूरसंस्थानपञ्चाङ्गसमित्याऽऽहूतोऽहं गतवत्सरे । तत्र शुद्धाश्विने नवरात्रकर्तव्यता क्षयसद्भावः माससमीकरणवादनिरासश्च सिद्धान्तिता अभूवन् । तदर्थं ग्रन्थावलोकने कृतादरः दाक्षिणात्यौत्तराहयोः, दाक्षिणात्यानामपि परस्परं विमतिमद्राक्षम् । तेन इतोऽप्यधिकग्रन्थपरिश्रम आवश्यकः समजनि । ग्रन्थरचने सामर्थ्याभावेऽपि शृङ्गेरीमठीयपञ्चाङ्गकर्तृभिरास्थानविद्वद्भिः श्री वेङ्कटसुब्बशास्त्रिभिरनिशं प्रोत्साहितः ग्रन्थरचने मनो व्यधाम् । एतत्समये प्रकटितेष्वनेकपञ्चाङ्गेषु विप्रतिपन्नान्निर्णयानवलोक्य धर्मशास्त्रप्राध्यापकस्थानस्थस्य मम अनुष्ठातृणां जातजनिष्यमाणप्रश्नानामुत्तारणमावश्यकं, कर्तव्यमिति च विजानतः एकत्र विषयसङ्ग्रह आवश्यकः समजनि । न तु ग्रन्थकर्ताऽहमिति धार्ष्ट्येण प्रावर्तिषि । आश्विनस्य प्राकृतत्वाभावनिर्णये एकचत्वारिंशदधिकशतवर्षप्राचीनचित्रभानुसंवत्सरीयपञ्चाङ्गेनोपकृतम् । यत्राप्याश्विनमार्गशीर्षयोराधिक्यक्षयौ उत्तरवर्षे चैत्रस्याधिक्यं चावगतानि । तत्राश्विनस्य प्राकृतत्वं नोक्तम् । रणवीरव्रतरत्नाकरेऽप्येवमेव निर्णीतम् । विषयबाहुल्याद्द्विगुणताया आवश्यकत्वेऽपि द्रव्यकालाद्यनुसृत्य ग्रन्थः सङ्कोचितः । प्रायशः ग्रन्थशैल्याः सरलताऽपि सम्पादिता । सुखप्रतिपत्त्यर्थं विषयानुक्रमं सङ्गृह्य सावधानं संशोध्य धार्मिकविदुषामुपहारीकृतोऽयं ग्रन्थः । एवमपि यत्र क्वचनास्मादृशाल्पमतिजनप्रमादसम्भवा मुद्रणसम्भवा वा दोषाः दृक्पथमागच्छेयुश्चेद्विपश्चितां स्खलनैकशीलत्वं मानवीयज्ञानस्य परिभावयन्तस्ते क्षमेरन्निति विश्वसिमि मे चेतः । यथाशास्त्रमनुष्ठानेनाभिप्रायप्रकाशनेन चास्तिकाः प्रोत्साहयेयुश्चेत्सफलोऽयं मम श्रम इति मन्ये ।

ग्रन्थविषये आशीराशंसनेन एकोत्तरशतरूप्यकवितरणेन चानुगृहीतवद्भ्यः श्री शृङ्गेरी जगद्गुरु श्रीमदभिनव विद्यातीर्थस्वामिपादेभ्यः सभक्ति साष्टाङ्गप्रणामान् वितरामि ।

एतदर्थमपूर्वग्रन्थसङ्ग्रहशोधनादिषु प्राच्यविद्यासंशोधनालयसंशोधकैः धर्मशास्त्रज्यौतिषविद्भिः श्री एस्. एन्. कृष्णजोयिस् महोदयैः बहूपकृतम् । एभ्यः, अभिप्रायप्रदातृभ्यः, प्रकाशने सहकृतवद्भ्यः, अल्पकालेन ग्रन्थं सम्यक् सम्मुद्र्य तत्प्रकाशने सहकृतवद्भ्यः परिमलमुद्रणालयाधिकारिभ्यश्च शतशः धन्यवादान् वितरामि ।

इति विदुषामनुचरः,
ग्रन्थकर्ता.

आकरग्रन्थाः

1 तैत्तरीयसंहिता 2 सायनभाष्यम् 3 भट्टभास्करभाष्यम् 4 ऐतरेयब्राह्मणम् 5 आपस्तम्बधर्मसूत्रम् 6 हरदत्तवृत्तिः 7 श्लोकवार्त्तिकम् 8 मनुस्मृतिः 9 याज्ञवल्क्यस्मृतिः 10 मिताक्षरा 11 चतुर्वर्गचिन्तामणिः 12 निर्णयामृतम् 13 कालमाधवीयम् 14 कालविवेकः 15 स्मृतितत्त्वम् 16 स्मृत्यर्थसागरः 17 रणवीरव्रतरत्नाकरः 18 निर्णयसिन्धुः 19 वीरमित्रोदयः 20 स्मृतिमुक्ताफलम् 21 द्विजराजोदयः 22 स्मृतिकौस्तुभः 23 कृत्यकल्पतरुः 24 मदनपारिजातम् 25 स्मृतिभास्करः 26 धर्मसिन्धुः 27 वैदिकसार्वभौमः 28 स्मृतिचन्द्रिका 29 नृसिंहप्रयोगपारिजातम् 30 महाभारतम् 31 पद्मपुराणम् 32 सूर्यसिद्धान्तः 33 सिद्धान्तशिरोमणिः 34 मरीचिव्याख्या 35 सिद्धान्ततत्त्वविवेकः 36 सिद्धान्तसार्वभौमः 37 बृहद्दैवज्ञरञ्जनम् 38 विद्यामाधवीयम् 39 प्राचीनपञ्चाङ्गानि 40 अनेकश्रुतिस्मृत्यादिप्रमाणग्रन्थाः ।

श्रीमत्परमहंसेत्यादिबिरुदाङ्कितैः श्रीशृङ्गेरीजगद्गुरु श्रीमदभिनव विद्यातीर्थस्वामिपादैरनुगृहीता आशीराशंसिनी पत्रिका ।

श्री शृङ्गेरी श्रीजगद्गुरुसंस्थानम्

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायामप्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्य गुरुपरम्पराप्राप्तषड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्रादिराजधानीविद्यानगरमहाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्री चन्द्रशेखरभारतीस्वामिगुरुकमलसञ्जात

श्री जगद्गुरु शृङ्गेरी श्रीमदभिनवविद्यातीर्थस्वामिभिः

अस्मदत्यन्तप्रियशिष्यवेदमूर्तिश्री वासुदेवसोमयाजिविषये नारायणस्मरणपूर्वकं विरचिता आशिषः समुल्लसन्तु ।

भवानुत्तमे आहिताग्निकुले जनिमवाप्य वृत्ताध्ययनसम्पन्नः पूर्वमीमांसायां ज्यौतिषे च कृतपरिचयोऽस्ति । ऐषमः संवत्सरे दृग्वादं सूर्यसिद्धान्तवादं चावलम्ब्य अधिमासे, तत्रानुष्ठेयकर्मसु च बहवः सूरयो विप्रतिपद्यन्ते । लोकाश्चेतिकर्तव्यतामूढाः व्यथन्ते । भवानवसरेऽस्मिन् अधीतमीमांसाज्यौतिषयोः फलमिव क्षयमासमीमांसानामानं ग्रन्थं प्राणैषीत् । भवदभ्यर्थनानुसारं ग्रन्थं समग्रमवालोकयाम । भवतो मीमांसाज्यौतिषयोः पाण्डित्यं धर्मशास्त्रदृढपरिचयं चावगत्य नितरां मोदमविन्दाम ।

अस्मिन् क्षयमासमीमांसाग्रन्थे प्रतिपादिता विषयाः सनातनसत्सम्प्रदायस्य, धर्मशास्त्रस्य, मीमांसायाश्च अविरुद्धाः, प्रामाणिकाश्चेति मन्महे वयम् । ग्रन्थोऽयं विद्वत्करपल्लवमुपारूढः धर्मशास्त्राभिमतपथप्रदर्शकः सन् सर्वत्र चिरं प्रकाशतामित्याशास्महे । श्री

ता. १०-९-६३, शृङ्गेरी. इति नारायणस्मरणम् ।

ग्रन्थविषये विदुषामाशयः

श्रीः

श्रीमद्भिः सहृदयैः साहित्यधर्मशास्त्रमीमांसाज्यौतिषशास्त्रपण्डितैः, के. वासुदेवसोमयाजिभिः शा. श १८८६ तमे शोभकृद्वत्सरे वर्तमानयोरधिकाश्विननिजाश्विनयोः क्षयमार्गशिरपुष्ययोश्च संसर्पांहस्पतित्वविवादे अत्युत्कटे वर्धमाने, आङ्गलसायनदृग्गणिते दृगयनांशस्वीकारविषये महाकोलाहले च सति, सावयवबाणवृद्धिसावयवरसक्षयपक्षात्मकमार्गेण धर्मशास्त्रसम्मतसिद्धान्तप्रतिपादितशरमूलक्रान्तिवृत्तीय दृक्सिद्धगणितसद्भावेऽपि धर्मशास्त्रविरुद्धाष्टघटीवृद्धिदशघटिकाक्षययुक्तगणितेन कार्त्तिकस्याधिकत्वक्षयत्व विवादे उन्मीलति सति, श्रुतिस्मृतिसिद्धान्तानधिकृत्य, ज्योतिर्विदाभरणग्रन्थस्थं 'श्रीसूर्यसिद्धान्तमतोद्भवार्कात्साध्यौ तदा द्वावधिकक्षयाख्यौ' इति वचनं च स्वीकृत्य मीमांसान्यायैः सकलवचनसाङ्गत्यप्रदर्शनद्वारा क्षयमासमीमांसाख्यो ग्रन्थः निरमायि ।

अयं ग्रन्थः सूक्ष्मदृष्ट्या मयाऽवलोकितः । (२९ पृष्टे) "तत्सिद्धं संसर्पशब्दोऽसङ्क्रान्तमासवामान्यवाचक इति । तथाऽपि धर्मशास्त्रे क्षयमासवति वत्सरे रूढ्या संसर्पशब्दः पूर्वासङ्क्रान्तमास एव प्रयुज्यते ; न क्षयोत्तरवर्त्यसङ्क्रान्ते इति मर्यादा " इति यो निर्णयो लिखितः स रत्नप्रायः । एतद्ग्रन्थावलोकनेन क्षयाधिकमासनिमित्तकाः सकलसंशयाश्च निवृत्ता भवेयुः । तस्माद्विधिविहितकालीनकर्मानुष्ठाने मानसोल्लासो भवेदिति ब्रूतेऽयं जनः ।

श्रीशोभकृत्भाद्रपदशुक्ल-	वेङ्कटसुब्बशास्त्री,
चतुर्थ्यां शुक्रवासरे	ज्योतिःसिद्धान्तकेसरी ज्योतिःशास्त्रविद्वान्
23-8-1963	श्री शृङ्गगिरि श्रीजगद्गुरु-
कोळ्ळेगालम्	श्रीमठीयपञ्चाङ्गकर्ता

श्रीरस्तु

वे. ब्र. श्री महीशूरमहाराजसंस्कृतपाठशालाधर्मशास्त्रप्राध्यापकैः पण्डितोत्तमैः वासुदेवसोमयाजिमहाशयैः सकलप्राचीननवीनप्रमाणग्रन्थानां सम्यक् परिशीलनेन विरचितः क्षयमासमीमांसाख्यो ग्रन्थः आसेतुशीताचलान्तर्वर्तिनिखिलास्तिकमहाजनानां कर्मानुष्ठानोपयोगी भवतीति दृढतरमावेदयति ।

आस्थानमहाविद्वान् पण्डितप्रवरः आर्. सुब्रह्मण्यशास्त्री
महीशूरमहाराजसंस्कृतमहापाठशाला विश्रान्तमीमांसाप्राध्यापकः.

विदितमेव हि यत् निबन्धकाराः विरुद्धेषु स्मृतिवचनेषु लक्ष्यभेदेनाविरोधसम्पादनद्वारा स्वाभिप्रायं प्रकटयन्तीति । धर्मनिबन्धरचने च मीमांसाधर्मशास्त्रज्यौतिषशास्त्रेषु पाण्डित्यमावश्यकम् । प्रकृते च एतत्क्षयमासमीमांसाख्य निबन्धकर्तारः श्रीयुताः के वासुदेवसोमयाजिनः न केवलमेषु शास्त्रेषु, किन्तु साहित्येऽपि पण्डिताः, श्रीमन्महाराजसंस्कृतमहापाठशाला धर्मशास्त्रप्राध्यापकाश्च । एते अपूर्वग्रन्थस्थविषयान् सङ्गृह्य न्यायसञ्चालन पुरस्सरमिमं निबन्धं व्यरचयन्निति प्रमोदस्थानम् । एकचत्वारिंशदधिकशतवर्षेभ्यः क्षयस्याप्राप्तेः, शोभकृद्वत्सरे विभिन्नाभिप्रायकपञ्चाङ्गदर्शनेन अनुष्ठाने सम्मुग्धानां मोहनिवृत्त्यर्थं मीमांसेयं बहूपकारिणी । तत्रापि क्षयपूर्वभाविनोऽसङ्क्रान्तस्य कदाऽधिकत्वं कदा वा प्राकृतत्वं कर्मार्हत्वं च कीदृशमिति सम्यङ्निरूपितम् । तथा क्षयमासे तिथिविभागमन्तरा मासद्वयप्रयुक्तं श्राद्धमपराह्ण एव कार्यमिति बहुप्रमाणन्यायोपन्यासपुरःसरं सिद्धान्तितम् । कार्याकार्यविवेकः विशेषेण क्षयमासवद्वर्षे मासिकोनमासिकनिर्णयः सोदाहरणं सम्यक्कृतः । ग्रन्थोऽयं सर्वेषामास्तिकानामावश्यकः । अस्योपयोगमास्तिका लभेरंश्चेच्छ्रीयुतानां परिश्रमः सार्थक इत्यावेदयामः ।

दैवज्ञशिखामणिः धर्माधिकारी, आस्थानमहाविद्वान्, सम्पत्कृष्णदैवज्ञः
संस्थानपञ्चाङ्ग समित्यध्यक्षः, पञ्चाङ्गकर्ता ।

श्रीः

संस्कृतदुर्दिनेऽप्यस्मिन् काले ग्रन्थकर्तुरुद्यमः श्लाघनीयः। क्षयमासमीमांसामवलोक्य प्रमुदितान्तःकरणा वयम् । यत्राधिकसंसर्पप्राकृतक्षयमासविचारः तत्र कार्याकार्यनिर्णयः विशेषतः क्षयमासे अपराह्न एव सांवत्सरिकं, दर्शपूर्णमासयोर्न तन्त्रता, नावृत्तिः इत्यादिनिर्णयश्च न्यायमवलम्ब्य सम्यक् कृतः। न केवलमस्मिन् वर्षे उत्पन्नाः संशयाः, कीन्तूत्पत्स्यमाना अप्युच्छिन्ना भवन्तीति प्रमोदस्थानम् । आस्तिकाः ग्रन्थस्वीकारतदुक्तार्थानुष्ठानद्वारा ग्रन्थकर्तारं प्रोत्साहयेयुरित्याशास्महे ।

दीक्षित वेङ्कटकृष्णसोमयाजी,
वैदिकधर्मभूषणम् .

श्रीमन्महाराजसंस्कृतमहापाठशाला धर्मशास्त्रप्रधानोपाध्यायैः पण्डितवरैः ब्रह्म श्री के. वासुदेवसोमयाजिमहोदयैः अनेकप्रमाणग्रन्थपरिशीलनेन विरचितेऽस्मिन् क्षयमासमीमांसाख्ये ग्रन्थे न केवलं क्षयमासनिर्णयः कृतः, किन्तु अधिमासादीनां निर्णयः तेषु मासेषु श्राद्धादिवैदिककर्मानुष्ठाननिर्णयश्च कृतोऽस्ति । अतोऽयं ग्रन्थः सर्वैरास्तिकमहाशयैरादरणीय इति सुदृढं विश्वसिमि

ज्यौतिषधर्मशास्त्रविद्वान्
टि· आर्· चन्निगराय पुराणिकः
ता. ६-९-१९६३ ज्योतिःशास्त्रप्रधानोपाध्यायः
मैसूर्. श्रीमन्महाराजसंस्कृतमहापाठशाला.

श्रीः

मीमांसाधर्मशास्त्राध्वरगणितकलासाहिती पारदृश्वा
विख्यातो वासुदेवाभिधविबुधवरः सोमयाजी मुनीन्द्रैः ।
तत्तद्ग्रन्थोपदिष्टान् निरुपधिविवृतान् मासवृद्धिक्षयादीन्
सङ्गृह्यास्मिन्निबन्धे व्यवृणुत बहुधा माससमीमांसनाख्ये ॥१॥

मीमांसाधर्मशास्त्रानुगतिसमुदिताचारनिष्ठागरिष्ठ-
प्रेक्षावत्प्रीतये स्यादिति खलु विषये नास्ति संशीतिलेशः ।
ग्रन्थोऽयं तत्र तत्र त्ववहितमनसा पर्यवालोकि भूयः
मर्शंमर्शं गरीयानिह लसति गुणो धीमतां मोददायी ॥ २ ॥

चान्द्रे शुद्धाधिमासक्षयविवृतिभिदा प्राकृतादिस्वरूपं
कार्याकार्यव्यवस्था तदुचितफलसद्भाव नैयत्यक्लृप्तिः ।
ग्रन्थे व्यामर्शि तत्तन्मतनिरसनवः सर्वमेतत्प्रशस्यं
ह्यस्मत्तः सङ्गृहीता स्मृतिरपि फलितेत्येव हृष्येम शश्वत् ॥३॥

मीमांसां मासवृद्धिक्षयविवृतिमयीं सोमसुद्वासुदेव-
प्रज्ञावन्निर्मितां सज्जनहृदयगतां प्रेक्ष्य हृष्टान्तरङ्गः ।
विश्रान्तो धर्मशास्त्रप्रथमबुधमणिः संव्यनक्त्याशयं स्वं
नीलातंपल्युपाह्वो नृपसदनसुधीर्वेङ्कटार्यो नृसिंहः ॥४॥

शोभकृद्भाद्रविशदत्रयोदश्यां रवेर्दिने ।
प्रशस्तिपत्रिका सेयं व्यलेखि कुतुकादिह ॥ ५ ॥

आस्थानविद्वान् नीलातंपल्ली वेङ्कटनरसिंहाचार्यः
श्रीमन्महाराजसंस्कृतमहापाठशालाविश्रान्तधर्मशास्त्र-
प्रधानोपाध्यायः । महीशूरपुरी ॥

शुद्धाशुद्धपत्रिका

पत्रसंख्या	पुटसंख्या	अशुद्धम्	शुद्धम्
१४	१२	यागाधिकणम्	यागाधिकरणम्
२४	१५	तेऽन्यन्तो	तेऽत्यन्तो
२५	२४	शीघ्रगत्य	शीघ्रगत्या
३२	२१	भवतीत्याभि	भवतीत्यभि
३३	१७	वाकयनार्जवात्	वाक्यानार्जवात्
३५	७	घटकत्ये	घटकन्ये
४०	१	क्षयव्यवहित	क्षयाव्यवहित
४२-४४	९-८	हुष्परिहर	दुष्परिहर
४६	१-७	राचमार्तण्डे-भानुसङ्घितः	राजमार्तण्डे-भानुलङ्घितः
५५	२१	दौत्तरेया	दौत्तगहा
”	२२	विकल्पा	विकल्प
५८	७	शक्यत्वत्	शक्यत्वात्
६८	४	नारदीयपुराणोऽपि	नारदीयपुराणेऽपि
६९	११	मननुष्ठातं	मननुष्ठानं
७०	६-९-२१	काररै-निथ्यर्धे-माद्धय	कारैर-तिथ्यर्धे-मासद्वय
७१	१७-१८	पूर्वार्दे-रार्दे	पूर्वार्धे-रार्धे
८०	११-१२	स्मृतिसागर-स्वात्	स्मृत्यर्थसागर-स्यात्
८१	६	काम्येकर्म	काम्यकर्म
९१	२४	सातन्त्र्येण	सातन्त्र्येण
९३	१८	प्रक्पदं	प्राक्पदं
९७	२१	प्रथःमासिके	प्रथममासिके
९८	२-४	ऊन-संवत्समध्ये	ऊन-संवत्सरमध्ये
१०३	२२	उनाब्दिक	ऊनाब्दिक

ॐ

श्रीः

क्षयमासमीमांसा

दशबाहुं विघ्नहरं देव्यालिङ्गितपार्श्वकम् ।
महागणपतिं वन्दे निर्मलज्ञानसम्पदे ॥

ब्रह्मविष्णवीशभानूनां गुरूणां च प्रसादतः ।
मुखाद्विनिर्गता वाणी निर्मला मेऽस्तु सर्वदा ॥

क्व च प्राञ्चो महाग्रन्था धीः क्व वाऽल्पीयसी मम ।
तथाऽपि बुद्धिशुद्ध्यर्थं सफलोऽयं ममोद्यमः ॥

हेमाद्रिमाधवमते प्रविचिन्त्य सम्यक्
ग्रन्थेष्वनेकरचितेषु विलोक्य भेदान् ।
श्रीनारसिंहतनयो विदुषां विनेयो
विद्वन्मुदे वितनुते क्षयमासचर्चाम् ॥

अथ संवत्सरस्वरूप कथनम्

“द्वादशमासाः संवत्सरः” इति श्रुतिः द्वादशमासावच्छिन्ने कालविशेषे संवत्सरत्वं विधत्ते । न च द्वादशमासोद्देशेन संवत्सरत्वविधौ ग्रहैकत्ववदुद्देश्यविशेषणस्य द्वादशत्वस्याविवक्षापत्तिरिति वाच्यम् । द्वादशत्वस्याविवक्षायां विधिवैयर्थ्यापत्त्या “यस्योभयं हविरार्तिमार्च्छे”दित्यत्र हविष इव विवक्षोपपत्तेः । यद्यपीयं श्रुतिः “द्वादश गृह्यन्ते” इत्यनेन विहितद्वादशऋतुग्रहाणां स्तावकत्वेन प्रतीयते। तथाऽप्युपरिधारणवत्सिद्धवदनुवादान्यथाऽनुपपत्त्या

विधिः कल्प्यते । न चाधिकमासवतः संवत्सरस्यासङ्ग्रहः । तस्य संवत्सरस्य त्रयोदशमासात्मकत्वेन द्वादशमासानां न्यूनतया तत्रानवच्छेदकत्वेन तदवच्छिन्नत्वाभावादिति वाच्यम् । तिथीनामाधिक्येऽपि द्वादशमासावच्छिन्नत्वस्याक्षतेः । मासपदेन चैत्रत्वाद्यन्यतमावच्छिन्नस्यैव कालस्य विवक्षितत्वेनाधिकमासवति वत्सरे चैत्रत्वाद्यवच्छिन्नमासानां द्वादशत्वेनैवोपलम्भात् । अन्यथा चैत्राद्यतिरिक्तमासनामोपलम्भप्रसङ्गः । न च तस्यातिरिक्तसंसर्पनामोपलभ्यते इति वाच्यम् । तस्य संसर्पणक्रियामात्रनिमित्तकत्वेन चैत्रादिष्वेव सम्भवादतिरिक्तमासनामत्वाभावात् । अन्यथा तस्यातिरिक्तमासस्य उक्तेषु षड्तुष्वनन्तर्भावेन सप्तमऋतुत्वकल्पनापत्तिः । न चेष्टापत्तिः " षड्वा ऋतवः " " मधुश्च माधवश्च वासन्तिकावृतू " इत्यादिश्रुतिविरोधात् ।

अत एव संसर्पमन्तर्भाव्य

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्द्धं तु परित्यज्य कर्तव्या चोत्तरे क्रिया ॥

इति ज्योतिः पितामहवचनेन षष्टितिथीनामेकमासत्वगणनं युज्यते । तिथीनामाधिक्येऽपि मासाधिक्याभावात् । न च " अस्ति त्रयोदशो मासः " इति श्रुतिविरोध इति वाच्यम् । तस्य त्रिंशत्तिथ्याधिक्यमात्रबोधनेन कृतार्थत्वात् । अत एव त्रिकाण्डमण्डनः ।

यद्वा षष्टिदिनैर्मास एक एवोभयात्मकः ।
अतोऽत्रापि वसन्तत्वं स्याद्द्वयोरेव मासयोः ॥ इति ।

केचित्तु—" संसर्पोऽसे " इति श्रुतिर्मध्वादिनामसाहचर्यात्संसर्पपदस्य मासनामत्वं ब्रूते । अत एवा" स्ति त्रयोदशो मास " इति श्रुतिरपि मुख्यार्थपरा भवति । न च सप्तमऋतुत्वङ्गीकारापत्तिः । तस्योक्तर्त्वन्तर्भावस्य तस्य ऋतोर्मासत्रयात्मकत्वस्य च त्रिकाण्डमण्डनेनाभ्यनुज्ञानात् ।

तस्मादधिकमासः स्यात्तेष्वेवर्तुषु कुत्रचित् ।
यत्रैषोऽन्तर्भवेन्मासः स ऋतुः स्यात् त्रिमासकः ॥ इति ।

अतः संवत्सरस्य द्वादशमासावच्छिन्नत्वमसङ्गतम् ।

तस्मात् द्वादशत्रयोदशान्यतरमासावच्छिन्नः कालोपाधिविशेषः संवत्सर इत्यङ्गीकर्तव्यम् । न च " द्वादशमासाः संवत्सरः " इति श्रुतिविरोधः तस्य प्रायिकत्वेनाप्युपपत्तेः । अन्यथा " अस्ति त्रयोदशो मास " इति श्रुतिविरोधो दुष्परिहरः इत्याहुः ।

वस्तुतस्तु वृद्धव्यवहारावगतार्थानुवादकत्वेनाप्युपपत्तौ श्रुतेर्विधायकत्वाभावेन शङ्काया एवानुदयात् । संवत्सरस्य सर्वत्र द्वादशमासत्वे क्वचित् त्रयोदशमासत्वेऽपि वा न कस्यापि वचनस्य वैयर्थ्यं विरोधो वा समस्ति इति सुवचम् । ते च द्वादशमासास्तैत्तरीयश्रुतावृतुग्रहप्रकरणे प्रदर्शिताः । " मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च " इति । अत्र मध्वादिशब्दाः क्रमेण चैत्रादिमासवाचकाः । तथा चाहुः :—

चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो भवेत् ।
ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते ॥
नभोमासः श्रावणः स्यान्नभस्यो भाद्र उच्यते ।
इषश्चाश्वयुजो मासः कार्त्तिकश्चोर्जसंज्ञकः ॥
सहोमासो मार्गशिरः सहस्यः पुष्यनामकः ।
माघमासस्तपाः (पः) प्रोक्तस्तपस्यः फाल्गुनः स्मृतः ॥ इति ।

एते चैत्रादयश्चान्द्राः । न हि मधुश्चेत्युपक्रम्य " संसर्पोऽसि " इत्यादिना । संसर्पस्य त्रयोदशमासत्वोक्तिः सौरे सम्भवति । यतस्तत्र द्वादश एव मासाः नियताः ।

एवं च चान्द्रचैत्रादिफाल्गुनान्तद्वादशमासावच्छिन्ने कालविशेषे अश्वकर्णादिशब्दवत् संवत्सरशब्दो रूढः, सम्यग्वसन्त्यत्रायनर्तुमासादयः इत्यवयवार्थस्यापि सम्भवेन पङ्कजशब्दवत् योगरूढो वाऽस्तु। सर्वथा संवत्सरशब्दश्चान्द्रे मुख्यः। इतरत्र गौणः।

ननु संवत्सर शब्दस्य चान्द्रमाससमुदाय एव मुख्यत्वे, संवत्सरस्य ब्रह्मसिद्धान्ते :—

चान्द्रसावनसौराणां मासानां तु प्रभेदतः।
चान्द्रसावनसौराः स्युस्त्रयः संवत्सरा अमी॥

इति त्रिविधत्वकथनं, माधवेन "अब्दः पञ्चविधः" इति पञ्चविधत्वकथनं चानुपपन्नम्। नहि गौणमुख्ययोः साम्येन निर्देशो युक्त इति चेन्न। मन्वादिभिरौरसक्षेत्रजादीनां मुख्यगौणानां ऋणापाकरणार्थत्वेन रिक्थभाक्त्वेन वा द्वादशविधपुत्रत्वकथनमिव द्वादशमासवत्वेन रूपेण संवत्सरभेदकथनमुपपद्यते।

तत्सिद्धं संवत्सरशब्दश्चैत्रादिफाल्गुनान्तद्वादशमासावच्छिन्ने कालविशेषे मुख्य इति।

संवत्सरभेदेन कर्तव्यभेदादयो हेमाद्रिमाधवादिप्रणीतग्रन्थेभ्यो ज्ञेयाः।

अथ मासनिरूपणम्

मासशब्दोऽपि चान्द्र एव रूढः श्रुतौ मध्वादिषु मासपदप्रयोगात्। योगरूढो वाऽस्तु। मस् इति सान्तं पदं चन्द्रवाचकम्। तस्यायं कालो मास इति। अथवा मस परिमाण इति धातोर्निष्पन्नोऽयं मासशब्दः। मस्येते परिमीयेते चन्द्रस्य वृद्धिक्षयौ यावता कालेन स मासः। तदुक्तं माधवोदाहृतसिद्धान्तशिरोमणौ—

मस्यन्ते परिमीयन्ते स्वकला वृद्धिहानितः।
मास एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः॥ इति।

स्वकला इति च्छेदः। मासः–मास् इति सान्तस्य षष्ठी। तस्य वृद्धिक्षयाभ्यां चन्द्रकला मस्यन्ते। एते चान्द्रमासा स्त्रिंशत्तिथिसमन्विताः भवन्ति। शुक्लपक्षे चन्द्रस्य एकैककलावृद्धिक्रमेण पञ्चदशतिथयः कृष्णे एकैककलापचयेन पञ्चदशतिथय इति त्रिंशता कलाभिस्त्रिशत्तिथित्वमुपपन्नम्। अत्र केचित् ब्रह्मसिद्धान्ते—

प्रथमः सावनो मासो द्वितीयश्चान्द्र उच्यते।
नाक्षत्रस्तु तृतीयः स्यात्सौरमासश्चतुर्थकः॥ इति।

स्कान्दे—

दर्शाद्दर्शश्चान्द्रस्त्रिंशद्दिवसस्तु सावनो मासः।
रविसङ्क्रान्तिविचिह्नः सौरोऽपि निगद्यते तज्ज्ञैः॥

इत्यादिवचनैः सामान्यतः सर्वेषु मासशब्दप्रयोगात् विनिगमनाविरहेण पूर्वोक्तानां चतुर्णामपि मासानामक्षादिशब्दवन्मासशब्दो वाचको वाच्यः। न च बहुत्र श्रुतिस्मृत्यादिषु चान्द्रेषु मासशब्दप्रयोगश्चान्द्रे मुख्यत्वगमक इति वाच्यम्। तस्याप्रयोजकत्वात्। तथा चाहुर्भट्टपादाः—

नचाल्पत्वबहुत्वाभ्यां प्रयोगाणां विशिष्यते।
वाच्यवाचकभावोऽयमक्षपादादिशब्दवत्॥ इत्यादिना।

तस्मान्न चान्द्रमात्रस्य वाचक इत्याहुः। तन्न—"द्वादशमासाः संवत्सरः" "अस्ति त्रयोदशो मासः" "अर्धमासे देवा इज्यन्ते" "मासि मासि पितृभ्यः क्रियते" इत्यादि श्रौतप्रयोगस्य चान्द्रविषयत्वेन यववराहाधिकरणन्यायेन मासशब्दो नानेकार्थवाचकः।

अन्यथा एषु वचनेषु मासपदविशेषणत्वेन चान्द्रशब्दं प्रायोक्ष्यन् । ज्योतिःसिद्धान्तादिषु चान्द्रो मास इति व्यवहारः स्पष्टार्थः । न वा चतुर्षु मासेष्वनुगतं मुख्यमासत्वमुपलभ्यतेऽनुभूयते वा । येन मासशब्दस्य सर्वमासवाचकता कल्प्येत । तस्मादेकार्थवाचकत्वे निश्चिते श्रौतप्रयोगान्निर्णयो भवति । तथा चाहुर्भट्टपादाः —

शास्त्रस्था तन्निमित्तत्वात्प्रतिपत्तिर्बलीयसी ।
लौकिकी प्रतिपत्तिस्तु गौणत्वेनापि नीयते ॥ इति ।

मासान्तरे प्रयोगस्तु प्रकारान्तरेणाप्युपपद्यते इत्यनेकार्थशक्तिकल्पनाभयाच्चान्द्र एव मासशब्दो मुख्यः इतरत्र गौणः इति सिद्धम् ।

अथ चैत्रादीनां चान्द्रत्वनिरूपणम्

ननु चैत्रादिशब्दा न चान्द्रवाचकाः । किन्तु—

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥

इति ज्योतिर्गार्ग्यवचनेन विवाहादौ सौरमासविधानेन

चैत्रं प्राह पराशरः कथयते पौषं च दौर्भाग्यदं
आषाढादि चतुष्टयं च शुभदं कैश्चित्प्रदिष्टं द्विजैः ।

इति वराहमिहिरवचनेन मेषादीनां चैत्रताप्रतीतेः,

कर्कटे तु हरौ सुप्ते शक्रध्वजक्रियाऽऽश्विने ।

तथा

तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम् ।
द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥

इति बोधायनेन सौरेष्वेवाश्विनश्रवणपदप्रयोगाच्च चैत्रादिशब्दाः रूढ्या सौरमास वाचकाः। श्रुतिरपि ऋगताविति धातोर्निष्पन्नं सूर्यगतिनिमित्तकं ऋतुशब्दं “ मधुश्च माधवश्च वासन्तिकावृतू” इत्यत्र मध्वादिषु प्रयुञ्जती चैत्रादीनां सौरमासतां बोधयन्ती प्रमाणमस्मिन् विषये भवतीति चेन्न । तत्तन्नक्षत्रयुक्तपौर्णमासीघटितमासे एव चैत्रादिशब्दानां शास्त्रसिद्धत्वात् । तथा च पाणिनिः “नक्षत्रेण युक्तः कालः” “सास्मिन् पौर्णमासीति” (संज्ञायां) इति । न च योगाद्रूढेर्बलीयस्त्वेन सौरमासवाचकाश्चैत्रादिशब्दा इति वाच्यम् । रूढेः कल्पनीयत्वेन दुर्बलत्वात् । तथा चाहुर्भट्टपादाः—

लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी ।
कल्पनीया तु लभते नात्मानं योगबाधतः ॥ इति ।

किं च श्रुतिरपि “ सा वैशाखस्यामावास्या या रोहिण्या सम्बध्यते ” इत्यनेन रोहिणीनक्षत्रयुक्तामाबास्या वैशाखस्येति प्रतिपादयन्ती चान्द्रे एव शक्तिं बोधयति । सौरे तदसम्भवात् । दर्शे “ सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्येति ” गोभिलसूत्रात् सूर्याचन्द्रमसोरेकराश्याद्यवस्थानमवगम्यते । न हि दर्शे रोहिणीस्थस्य पूर्णिमायां विशाखास्थितिः सङ्गच्छते । तेन सूर्याधिकरणविशाखायोगान्न वैशाखत्वम् । किं तु चन्द्राधिकरणविशाखायोगाद्वैशाखत्वम् । ऋतुशब्दोऽपि न केवलं सूर्यगतिनिमित्तकः किन्तु पुष्पविकासादि ऋतुचिह्ननिमित्तक इति सौरे चान्द्रे च समानः। तस्माच्छास्त्रप्रसिद्ध्या चैत्रादिशब्दाश्चान्द्रवाचका इति सिद्धम् ।

अथ चैत्रादिमासलक्षणम्

अथ किं नाम चैत्रत्वं ? न तावत्—

मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः ॥

इति ब्रह्मसिद्धान्तवचनेन मेषादिस्थरविसमाप्तदर्शकत्वं चैत्रत्वादीति वक्तुं शक्यम्। मलमाससंज्ञके चैत्रादौ, पूर्णिमान्तमासे चाव्याप्तेः। अतिव्याप्तेश्च चैत्रादिलक्षणस्याधिकवैशाखादौ। नापि—

मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे।
भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः॥

इति व्यासवचनेन मीनादिस्थादित्याधिकरणीभूतक्षणारब्धाद्यतिथिकत्वं चैत्रत्वादि। अस्यापि पूर्णिमान्तमासेऽव्याप्तेः। वक्ष्यमाणोदाहरणे कार्त्तिकलक्षणस्याव्याप्तेरतिव्याप्तेश्च मार्गशीर्षलक्षणस्य। तथा हि यत्र दर्शे तुलासङ्क्रान्तिः एकमसङ्क्रान्तं मासमतीत्य प्रतिपदि वृश्चिकसङ्क्रान्तिस्तद्दर्श एव धनुःसङ्क्रान्तिः तत्र तन्मतेन तस्य मार्गशीर्षत्वात् वृश्चिकस्थरव्यारब्धत्वाभावेनाव्याप्तिः। क्षयस्य तुलास्थरव्यारब्धत्वेन कार्त्तिकलक्षणस्यातिव्याप्तिश्च।

न च–"यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः।
तयैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति॥"

इति राजमार्तण्डवचनबलात् तुलासङ्क्रान्तेर्दर्शजातत्वेन वृश्चिकसङ्क्रान्तेरपि दर्श एवोचितत्वात् मीनादिस्थादित्याधिकरणयोग्यक्षणारब्धाद्यतिथिकत्वमिति लक्षणाश्रयणेन न कापि क्षतिरिति वाच्यम्। यां तिथिं समनुप्राप्येति वचनस्यानृषिप्रणीतत्वादन्यार्थकत्वाच्च न तद्बलेन व्यासवचने योग्यतानिवेशः समुचितः।

अस्य वचनस्य "चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको भवेत्।"
"घटकन्यागते सूर्ये वृश्चिके वाऽथ धन्विनि।
मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते॥"

इत्यादिवचनसिद्धयथाश्रुतार्थमात्रानुवादकत्वेन तिथ्याधिक्यनिषेधपरत्वाभावात्। अन्यथा तुलादिषु कदाप्यसङ्क्रान्तमासाभावेन

दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्।
नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चयः॥

इति विष्णुधर्मोत्तरवचनविरोधापत्तिः। किं च काठकगृह्यपरिशिष्टे—

महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्।
स्पष्टमासविशेषाख्यविहितं वर्जयेन्मले॥

इत्यधिकेऽष्टकानिषेधानुपपत्तिश्च।

किं च लक्षणे योग्यतानिवेशेऽपि, यत्र दर्शे कन्यासङ्क्रान्तिः असङ्क्रान्तमेकमासमतीत्य प्रतिपदि तुलासङ्क्रान्तिः तद्दर्श एव वृश्चिकसङ्क्रान्तिः। अत्र द्विसङ्क्रान्तमासस्य तन्मते कार्त्तिकत्वमिष्टमिति कन्यास्थादित्याधिकरणक्षणारब्धाद्यतिथिकत्वेन वृश्चिकस्थरव्यारब्धत्वाभावादव्याप्तिर्दुर्वारा। यां तिथिं समनुप्राप्येत्यनेन हि तुलादिसङ्क्रान्तिस्थतिथिसजातीयतिथित्वस्य वृश्चिकादिसङ्क्रान्तियोग्यतावच्छेदकत्वमवगम्यते। न तु तुलादिसङ्क्रान्तिपूर्वस्थदर्शत्वस्य प्रतिपदुपजाततुलासङ्क्रान्त्यधिकरणयोग्यतावच्छेदकत्वम्। तस्मादेतदपि लक्षणं दुष्टम्। सिद्धान्तरीत्याऽपि अस्यऽलक्षणस्य दुष्टत्वमग्रे वक्ष्यते। तस्माच्चित्रादियुक्तपौर्णमासीघटितमासत्वं चैत्रत्वादीति वाच्यम्। चित्रादिपदेन विशाखादिकं गृह्यते। चित्रापदेन चित्रास्वात्यन्यतरत्, विशाखापदेन विशाखानूराधान्यतरत्, ज्येष्ठापदेन ज्येष्ठामूलान्यतरत्, पूर्वाषाढापदेन पूर्वाषाढोत्तराषाढान्यतरत्, श्रवणपदेन श्रवणधनिष्ठान्यतरत्, पूर्वाभाद्रापदेन शतभिषक् पूर्वाभाद्रोत्तराभाद्रान्यतमम्, अश्विनीपदेन रेवत्यश्विनीभरण्यन्यतमम्, कृत्तिकापदेन कृत्तिकारोहिण्यन्यतरत्, मृगशीर्षपदेन मृगशीर्षार्द्रान्यतरत्, पुष्यपदेन पुनर्वसुपुष्यान्यतरत्, मघापदेन आश्लेषामघान्यतरत्, फल्गुनीपदेन पूर्वफल्गुन्युत्तरफल्गुन्यन्यतरच्च गृह्यते। अङ्गीकृतं चैतल्लक्षणं माधवेन—"दर्शान्तानां पूर्णिमान्तानां मासविशेषाणां चैत्रा-

दिसंज्ञा नक्षत्रप्रयुक्ता । यस्मिन् मासे पूर्णिमा चित्रानक्षत्रेण युज्यते स चैत्रः । एवं वैशाखादिषून्नेयम् ।" इति । हेमाद्रेरप्येतदिष्टम् । तथा च तदुदाहृतच्यवनवचनं—

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥ इति ।

तत्रैव त्रिकाण्डमण्डनवचनं—

द्वे द्वे चित्रादिताराणां परिपूर्णेन्दुसङ्गमे ।
मासाश्चैत्रादयो ज्ञेयास्त्रिकैः षष्ठान्त्यसप्तमाः ॥ इति ।

ननु सास्मिन् पौर्णमासीति (संज्ञायां) पाणिनिसूत्रेण चित्रायुक्ता पौर्णमासी चैत्रीति प्रतीयते । अत एव वृत्तिकारः—पुष्ययोगात्पौर्णमासीत्युदाहृतवान् । एवं च यत्र पूर्णिमायां स्वातीयोगः तत्र चित्रायोगाभावेन कथं तन्निमित्तकचैत्रत्वं कथं वा चित्रापदेन चित्रास्वात्यन्यतरग्रहणमिति चेन्न । शिष्याणां सुखबोधार्थमेव तथोक्तेः । नायमश्वकर्णादिशब्दवदवयवार्थशून्यः । किन्तूद्भिदादिवद्यथाकथञ्चित्प्राप्तप्रवृत्तिनिमित्त इति सूत्राशयः । प्रकृतिप्रत्ययविभागप्रदर्शनेन शब्दसाधुत्वार्थं व्याकरणप्रवृत्तिसम्भवात् । अत एव गमेर्डोस् गच्छतीतिगौरिति प्रकृतिप्रत्ययार्थप्रदर्शनेनागच्छन्त्यां गवि गमनक्रियायोगाभावेऽपि गोशब्दप्रयोगः सङ्गच्छते ।

तस्माच्चित्रादियोगस्योपलक्षणत्वात् कचित्तद्योगाभावेऽपि दोषाभावः ।

तदुक्तं माधवेन—"चित्राविशाखादियोगस्योपलक्षणत्वेन कचिच्चित्रादिप्रत्यासन्नस्वात्यनुराधायोगेऽपि चैत्रवैशाखादिसंज्ञा न विरुद्धयते" इति ॥

एवं चैतादृशनक्षत्रयोगस्य तत्तत्पूर्णिमासु नियतत्वेन तत्तत्पूर्णिमाघटितत्वस्य पूर्णिमान्तमासे दर्शान्तमासे च नियतत्वेनाव्याप्तिशङ्कैव नोदेति । न च कार्त्तिकीं प्रकृत्य श्रुतात् "यदा याम्यं कचित्तस्यां" इति पद्मपुराणवचनात् कस्यांचित् कार्त्तिक्यां भरणीसम्बन्धोऽवगम्यते इति कृत्तिकारोहिण्यन्यतरसम्बन्धस्याप्यभावेनाव्याप्तिर्दुर्वारा एवमन्यमासेष्वपि इति वाच्यम्, नक्षत्रसम्बन्धस्योपलक्षणत्वाङ्गीकारेण उत्तरनक्षत्रेणेव कचित् पूर्वनक्षत्रेण सम्बन्धेऽपि वैकल्याभावात् । एवमुत्तरनक्षत्रसम्बन्धेऽपि ज्ञेयम् ।

यत्तु कमलाकरेण "यद्यपि हेमाद्रिमाधवकालादर्शाद्यालोचनेन मेषसङ्क्रान्त्यां समाप्तामावास्याकत्वमितिलक्षणाच्च मेषसङ्क्रान्तेश्चैत्रत्वं प्रतीयते" इत्युक्तम् । तदविचारितरमणीयम् । न हि हेमाद्रिणा माधवेन वा मासलक्षणमेवमुक्तम् । न वा तेषामाशयोऽप्येवम् । किं च पूर्वापरपर्यालोचनया हेमाद्रिमाधवयोरपि पूर्वोक्तमासलक्षणमेव सम्मतमिति प्रतीयते । अपि चैतल्लक्षणस्य माससामान्यपरत्वे पूर्णिमान्तमासेऽव्याप्तिर्दुर्वारा । न च तत्र मुख्यमासत्वाभावादलक्ष्यत्वमिति वाच्यम् । हेमाद्रिमाधवाभ्यां दर्शान्तपूर्णिमान्तयोः समविकल्पाभिधानेनोभयोरपि मुख्यत्वावगतेः । लक्षणान्तरस्याकथनाच्च । तस्मादुक्तमेवलक्षणमाश्रयणीयम् ।

वस्तुतस्तु मन्त्रलक्षणाधिकरणन्यायेन चैत्रत्वप्रकारकाभियुक्तप्रसिद्धिविषयत्वं चैत्रत्वमित्यादि सर्वमाससाधारणलक्षणमेव योग्यम् । अन्यस्य लक्षणस्य दुर्वचत्वात् ॥

मासद्वैविध्यकथनम्

एतादृशमासोऽपि द्विविधः चैत्रशुक्लप्रतिपदादिदर्शान्तः कृष्णप्रतिपदादिपूर्णिमान्तश्च । तथा च हेमाद्रौ त्रिकाण्डमण्डनः

"चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधा । इति ।"

ननु मासशब्दस्तावत् शुक्लप्रतिपदादिदर्शान्तत्रिंशत्तिथ्यवच्छिन्ने कालविशेषे एव मुख्यः । शास्त्रप्रसिद्धेः । तथा लघुहारीतः—

इन्द्राग्नी यत्र हूयेते मासादिः परिकीर्तितः ।
अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ ॥

तथा अमरसिंहोऽपि-पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ । ब्रह्माण्डपुराणेऽपि—

चैत्रसितादेरुदयाद्भानोर्दिनमासवर्षयुगकल्पाः ।
सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य ॥

पितामहोऽपि " दर्शाद्दर्शश्चान्द्रः" । तथा चान्द्रः शुक्लादिदर्शान्तः । इति ।

तथा च शास्त्रप्रसिद्ध्या दर्शान्तमासे मासपदस्य मुख्यत्वे सिद्धेऽपि पूर्णिमान्तमासे प्रमाणाभावाद्गौणत्वमाश्रयणीयम् ।

अत एव कुमारिलभट्टपादाः—

शास्त्रस्था तन्निमित्तत्वात्प्रतिपत्तिर्बलीयसी ।
लौकिकी प्रतिपत्तिस्तु गौणत्वेनापि नीयते ॥

इति चेन्न। श्रुतौ तावत् "अमावास्यया मासान् सम्पाद्याहरुत्सृजन्त्यमावास्यया हि मासान् सम्पश्यन्ति । पौर्णमास्या मासान् सम्पाद्याहरुत्सृजन्ति-पौर्णमास्या हि मासान् सम्पश्यन्ति" इति उभयोः साम्यं प्रदर्शितम् । स्मृतावपि "आश्वयुक् कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने" इति पठ्यते । अत्र यदि दर्शान्तमासो विवक्ष्यते तदा भाद्रपदकृष्णपक्षे इत्युच्येत ।

तथा जयन्तीप्रकरणे स्मर्यते—

मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके ।
भवेत्प्रजापतेर्ऋक्षं जयन्ती नाम सा स्मृता ॥

अत्रापि यदि दर्शान्तमासो विवक्ष्यते तदा श्रावणे इति वक्तव्यम् । तस्मादत्र भाद्रपदापरपक्षश्राद्धजयन्त्योराश्विनभाद्रपदान्तर्गतत्वकथनं मासस्य पूर्णिमान्तत्वं गमयति । तस्माच्छ्रुतिस्मृतिभ्यामुभयत्र प्रयोगसाम्येन विनि-

गमनाविरहादुभयत्रापि मुख्यत्वम् । कुमारिलवचनमपि सिद्धान्त एव सङ्गतम् । लघुहारीतवचनमपि शुद्धाधिकमासनिरूपणार्थं प्रवृत्तं प्रकरणात् । ब्रह्माण्डवचनमपि सृष्टिनिरूपणार्थं प्रवृत्तं न मासस्वरूपबोधार्थम् । अन्यथा ब्रह्मसिद्धान्तवचनाद्भानुवासरस्यापि लक्षणान्तर्गतत्वापत्तेः । यद्यपि स्मृत्यादिषु दर्शान्तमासे एव भूयान् पक्षपातः । तथापि तन्मात्रेण पूर्णिमान्तमासस्य गौणत्वं दुर्वचम् । तथा चाहुर्भट्टपादाः ।

न चाल्पत्वबहुत्वाभ्यां प्रयोगाणां विशिष्यते ।
वाच्यवाचकभावोऽयमक्षपादादिशब्दवत् ॥ इति ॥

माधवादीनामप्येतदिष्टम् । युक्तं चैतत् द्वयोरपिमासयोरनुगतं मासत्वसामान्यमुपलभ्यतेऽनुभूयते च । तस्मान्मासद्वैविध्यं सिद्धम् ।

अथ शुद्धमासनिरूपणम्

तत्र दर्शान्तमासोऽपि द्विविधः शुद्धो मलश्चेति । तत्र शुद्धमासस्वरूपमुदाहृतं हरदत्तवैद्यनाथवैदिकसार्वभौमप्रभृतिभिः ।

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः ॥ इति ॥

अस्यायमाशयः । दर्शपदं दर्शान्तिमक्षणे शक्तम् । तथा च गोभिलः " सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्या " इति । परः सन्निकर्षश्च सूर्याचन्द्रमसोरेकराशौ एकस्यां कलायां वर्तमानत्वे सम्भवति नान्यत्र । समराशिकलावस्थानं च दर्शतिथ्यन्तिमक्षण एव सम्भवति । तदुक्तं सूर्यसिद्धान्ते—

तुल्यौ राश्यादिभिः स्याताममावास्यान्तकालिकौ ।
सूर्येन्दू पौर्णमास्यन्ते भार्द्धे भागादिभिः समौ ॥ इति ॥

अत एव दर्शशब्दः सूर्येण सङ्गतः सम्यक् संयुक्तो दृश्यते इत्यन्वर्थकः ।

विवृतमेतत् " दर्शः सूर्येन्दुसङ्गमः " । इति ।

अत एव " दर्शद्वयं यत्र मासे रविसङ्क्रान्तिवर्जितम् " इत्यादिस्मृतिवचनमुपपद्यते । एतादृशक्षणयोगात्सर्वा तिथिर्दर्श इत्युच्यते । तथा च मेषादिस्थरविसमाप्तदर्शकत्वं शुद्धचैत्रत्वमिति प्रतीयते । एतच्च लघुहारीतस्मृत्यनुगतम् । तथाहि—

इन्द्राग्नी यत्र हूयेते मासादिः परिकीर्तितः ।
अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ ॥ इति ।

नन्वत्र सूर्यसम्बन्ध एव नोक्त इति कथं शुद्धमासलक्षणपरत्वं ; अत्र हि इन्द्राग्निदेवताकयागाधिकरणं शुक्लप्रतिपत् । अग्नीषोमदेवताकयागाधिकरणं कृष्णप्रतिपत् । पितृसोमदेवताकयागाधिकणं दर्शः । एतत्त्रयोपलक्षितं दर्शान्तमाससामान्यमुक्तमिति चेदुच्यते । तदुत्तरश्लोके—

तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः ॥

इत्यनेन सूर्यस्य दर्शातिक्रमे तन्मासस्य मलत्वाभिधानेन सूर्यसङ्क्रान्तिसहितस्य शुद्धत्वमवगम्यते ।
मलत्वं च पुरुषाभावेन नपुंसकत्वात् । तदुक्तं ज्योतिःशास्त्रे—

असङ्क्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः ।
कालान्तरात्समायाति स नपुंसक इष्यते ॥ इति ।

ते च पुरुषास्तत्रैव दर्शिताः—

अरुणः सूर्यो भानुस्तपनश्चण्डो रविर्भगस्तिश्च ।
अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च ॥

एते द्वादश सूर्या माघाद्येषूदयन्ति मासेषु ।
निस्सूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः ॥ इति ।

अत एवैतन्मूलकब्रह्मगुप्तवचने—

मेषगरविसङ्क्रान्तिः शशिमासे भवति यत्र तच्चैत्रम् ।
एवं वैशाखाद्या वृषादिसङ्क्रान्तियोगेन ॥

इति मेषादिसङ्क्रान्तेश्चैत्रादिशुद्धमासप्रयोजकत्वमुक्तम् । तथा ब्रह्मसिद्धान्तवचनम्

मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः ॥ इति ।

न चास्य लक्षणस्य मलेऽतिव्याप्तिः मेषादिस्थसूर्ये एवोत्तरदर्शसमाप्तेरिति वाच्यम् । अस्य वचनस्य यथाश्रुतार्थतामङ्गीकृत्यापि मले नातिव्याप्तिः तस्य नपुंसकत्वेन मलत्वस्य वचनान्तरसिद्धत्वात्, अस्य शुद्धमासस्वरूपमात्रबोधकत्वात् । माधवोऽप्येवमाह । वस्तुतस्तु एषां सर्वेषां वचनानामेकमूलकत्वकल्पनालाघवेन मेषादिसङ्क्रान्तिमत्त्वे सति दर्शसमाप्यमासत्वं चैत्रत्वादि इति लक्षणं सिद्ध्यति । ननु " मीनादिस्थे सवितरि " इति व्यासवचनलब्धलक्षणे ससङ्क्रान्तिकत्वं निवेश्य मीनस्थरविप्रारब्धप्रतिपत्कससङ्क्रान्तित्रिंशत्तिथिकत्वं चैत्रत्वमिति लक्षणं सुवचमिति चेन्न । लघुहारीतवचने केवलसङ्क्रान्तिसम्बन्धेन शुद्धत्वे उक्तेऽपि अन्यस्मृतिषु ब्रह्मगुप्तवचने च मेषचैत्रयोरेव सम्बधोक्तेर्मीनचैत्रसम्बन्धेन मासस्य शुद्धत्वकथनं विरुद्धम् ।

किं च—चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तथा सूर्योदये सति ॥
इति हेमाद्रौ ब्राह्मवचने,

तथा

सृष्ट्वा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः ।
शश्वद्भ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे ॥

इति सिद्धान्तशिरोमणिवचनेन च सृष्ट्यादौ चैत्रमेषयोर्युगपत्प्रवृत्तिरवगम्यते । तस्माच्चैत्रस्य मेषसम्बन्धेनैव शुद्धत्वं वाच्यं न मीनसम्बन्धेन । “ मीनमेषयोर्मेषवृषभयोर्वा वसन्तः ” इति बोधायनवचनं तु अयनांशाधिक्येन ऋतुधर्माणां पूर्वप्रवृत्तिमुपलभ्य विकल्पबोधकमिति न विरुद्धम् । यद्यपि सम्पूर्णचान्द्रमासे सम्पूर्णसूर्यसम्बन्धः शुद्धचैत्रत्वगमक इत्यवगम्यते । तथाऽपि गतिबलादारम्भे मध्येऽन्ते वा मेषसङ्क्रान्तियोगेन सम्पूर्णश्चान्द्रो मेषसूर्यसम्बद्धो भवतीति तस्य शुद्धत्वमुपपन्नम् । दृष्टं चैतत् कन्यास्थे सवितरि विहितमहालयस्य भाद्रपदापरपक्षे सम्पूर्णकन्यारविसम्बन्धाभावेऽपि दर्शजातकन्यासङ्क्रान्तिवशात् समस्तपक्षस्य कन्यास्थरविमत्त्वम् । अपि च “ मीनादिस्थे ” इत्यादिवचनसिद्धलक्षणाश्रयणेऽपि क्षयेऽव्याप्तिः दुर्वारा । तथा हि यत्र प्रतिपदि धनुःसङ्क्रान्तिर्दर्शे मकरसङ्क्रान्तिः तत्र मार्गशीर्षक्षये वृश्चिकस्थरव्यारब्धत्वेन मार्गशीर्षत्वापत्तिः ।

न च तत्र धनुस्थरव्यारब्धत्वाभावेन पौषस्य क्षयो न तु मार्गशीर्षस्येति वाच्यम् । तथा सति मार्गशीर्षक्षयाभावेन क्षयमासश्राद्धं तत्र क्षये अव्यवहितपूर्ववृत्तिप्राकृतेऽपि च विदधता सत्यतपोवचनेन दीपिकावचनेन च विरोधो दुष्परिहरः। अन्यथा क्षये उत्तरमासगतं श्राद्धमव्यवहितपूर्ववृत्तिप्राकृतेऽपि कुर्यात् क्षयपूर्वमासगतं तु नाव्यवहितपूर्ववृत्तिप्राकृते इति वैरूप्यापत्तिः । तदर्थं द्विसङ्क्रान्तिस्थले पूर्वमासस्यैव क्षय इत्यवश्यमङ्गीकार्यम् । तेनाव्याप्तिर्वज्रलेपायिता । अधिकमग्रे स्पष्टीभविष्यति । तस्मान्मेषादिसङ्क्रान्तिमत्त्वे सति दर्शसमाप्यमासत्वं चैत्रत्वादीति सिद्धम् ।

अथ मलमासनिरूपणम्

तत्रैकमात्रसङ्क्रान्तिरहितत्वं मलत्वम् । सङ्क्रान्तिद्वययुक्तस्यापि मलत्वसिद्ध्यर्थमेकमात्रेति । मलमासो द्विविधः अधिमासः क्षयमासश्चेति । तदुक्तं काठकगृह्ये—

यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥ इति ।

ब्रह्मसिद्धान्तेऽपि “ चान्द्रो मासो ह्यसङ्क्रान्तो मलमासः प्रकीर्तितः ” इति । तथा सत्यव्रतेन—

राशिद्वयं यत्र मासे सङ्क्रमेत दिवाकरः ।
नाधिमासो भवेदेष मलमासस्तु केवलः ॥ इति ।

अथाधिमासनिरूपणम्

सङ्क्रान्तिरहितमासत्वमधिकत्वम् । अधिकस्य स्वातन्त्र्यं तावत् षडृतुत्वभङ्गापत्तेरयुक्तम् । पारतन्त्र्ये किं पूर्वशेषता उतोत्तरशेषता । अत्र केचित्—

मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः ॥

इत्यनेन एकराशिस्थे सवितरि दर्शद्वयसमाप्तौ पूर्वदर्शावसानकः शुद्धः उत्तरदर्शावसानक अधिकः इत्यवगम्यते । यथा दर्शे मीनसङ्क्रान्तिः असङ्क्रान्तमेकं मासमतीत्य प्रतिपदि मेषसङ्क्रान्तिः । तत्र मीनस्थे रवौ दर्शः समाप्त इति तस्य फाल्गुनत्वमुचितम् । उत्तरस्तु मेषस्थे रवौ

समाप्त इति चैत्रत्वमुचितम्। मध्यस्थासङ्क्रान्तस्य दर्शः मीनस्थे रवौ पूर्यते इति फाल्गुनत्वमुचितम्। अतः "पूर्तिद्वित्वेऽधिमासोऽन्त्य" इति युक्तमुक्तम् इत्याहुः। तन्न युक्तम्। एतस्य मेषादिस्थेत्यस्य लघुहारीताद्युक्तशुद्धमाससमानार्थकत्वेन, अधिमासोऽन्त्यः इत्यस्यापि तमतिक्रम्येतिवचनसमानार्थकत्वस्य युक्तत्वात्। पूर्तिद्वित्वे पूर्वः शुद्ध उत्तरस्त्वधिकः न तु पूर्वशेषोऽसङ्क्रान्त इत्यर्थः। एकमूलकल्पनालाघवात्। अन्यथा यथाश्रुतार्थमङ्गीकृत्याधिकस्य पूर्वमासशेषत्वेऽङ्गीकृते षष्टिदिनात्मके मासे पूर्वार्धस्य कर्मार्हत्वमुत्तरार्धस्य तदनर्हत्वमापद्येत। न चेष्टापत्तिः।

"आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः।"
"पूर्वार्द्धं तु परित्यज्य कर्तव्या चोत्तरे क्रिया।"

इत्याद्यनेकवचनविरोधापत्तेः। सार्वजनीनानुभवविरोधापत्तेश्च। अत एव माधवः एतत्सर्वमभिप्रेत्याह "मेषादीनां शुद्धमाससंज्ञां प्रत्येव प्रयोजकत्वमिति"।

तस्मात्पूर्वोक्तानेकवचनसिद्धं मेषादिसङ्क्रान्तेः शुद्धमाससंज्ञां प्रति प्रयोजकत्वं मेषादिस्थेत्यनेनाभिधाय, असङ्क्रान्तमासे तादृशप्रयोजकाभावेनार्थिकमशुद्धत्वं पूर्तिद्वित्वेऽधिमासोऽन्त्य" इत्यनेनोक्तमिति सर्वं सुस्थम्। तत्सिद्धमधिकस्योत्तरमासशेषत्वं चित्राद्युक्तपौर्णमासीघटितत्वेन चैत्राद्युत्तरमासनामवाच्यत्वमपि इति। ननु 'संसर्पोऽसि" "अस्ति त्रयोदशो मासः" इति श्रुत्याऽधिकस्य चैत्रादिसंज्ञातिरिक्तसंज्ञा श्रूयते। अत एव त्रिकाण्डमण्डनेन मासत्रयस्य वसन्ताद्यृतुत्वकथनमुपपद्यते। तथा ब्रह्म-

सिद्धान्ते—चान्द्रो मासो ह्यसङ्क्रान्तो मलमासः प्रकीर्तितः।

नन्दिपुराणे—अमावास्यामहोरात्रे यदा सङ्क्रमते रविः।
स तु मासः पवित्रः स्यादतीते ह्यधिको भवेत्॥

तथा ज्योतिःशास्त्रे—

अमावास्याद्वयं यत्र रविसङ्क्रान्तिवर्जितम्।
मलिम्लुचः स विज्ञेय उत्तरस्तूत्तमाभिधः॥

इत्यादिवचनैरधिकस्य मलत्वकथनेन चैत्रादिनामरहितत्वमवगम्यते।

अत एव शातातपेन—

वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत्।
नैर्ऋतैर्यातुधानैश्च समाक्रान्तो विनामकः॥

इति स्पष्टमेवाधिकस्य विनामकत्वमुक्तम्। तस्मादधिकस्य चैत्रादिनामता विरुद्धा। इति चेन्न।

मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥

इति वचनेन मिथुनेऽसङ्क्रान्तमासस्याषाढपदवाच्यत्वावगमात् तत्सामान्यादितरेषु तथात्वमितिन्यायेन सर्वेषामप्यधिकानां चैत्रादिनामसिद्धेरावश्यकत्वात्। विरुद्धनामत्वेन विनामकत्वोक्तिर्न तु नामशून्यत्वेन मलिम्लुचादिनामकत्वात्। अथवा कर्मानर्हतया विद्यमानमपि नामासदेव भवतीति न विरोधः।

शुद्धचैत्राद्यपेक्षया वैलक्षण्यद्योतनार्थं संसर्पत्वकथनम्। न त्वतिरिक्तमासाभिप्रायेण। तथात्वे द्वयोर्द्वयोरेव मासयोर्वसन्ताद्यृतुत्वोक्तेरस्य सप्तमऋतुत्वाकथनाच्च ऋतुशून्यत्वापत्तिर्दुर्वारा।

त्रिकाण्डमण्डनेन मासत्रयस्य ऋतुत्वोक्तिरपि त्रिंशत्तिथिसमुदायत्रित्वाभिप्रायेण नत्वतिरिक्तमासाभिप्रायेण।

स्पष्टीकृतं चैतत् श्लोकगौतमेन—

द्वौ मासावेकनामानावेकस्मिन् वत्सरे यदि ।
उत्तरे देवकार्याणि पितृकार्याणि चोभयोः ॥

इत्यनेन मासद्वयस्यैकमासनामत्वकथनेन । अत एव—

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्धं तु परित्यज्य कर्तव्या चोत्तरे क्रिया ।

इत्यत्र षष्टितिथीनां मध्ये पूर्वार्धस्योत्तरशेषत्वेन चैत्रादिमासानां द्वादशत्वेनैवोपलम्भादेकस्य चैत्रत्वादेर्मासद्वयवृत्तित्वं नात्यन्तसमीचीनमित्यभिप्रायेणैकमासत्वेन व्यवहारोऽपि समीचीनः । तत्सिद्धं पूर्वोक्तेऽधिकस्योत्तरशेषत्वचैत्रादिमासनामत्वे एवेति । अधिकस्य मलत्वं च कालाधिक्येन । तदुक्तं काठकगृह्ये—

मलं वदन्ति कालस्य मासं कालविदोऽधिकम् ॥

इति । अधिकं मासं कालस्य मलं वदन्तीत्यन्वयः ।

कालाधिक्यं प्रदर्शितं विष्णुधर्मोत्तरे—

सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावने तु तदा मासे दिनषट्कं न पूर्यते ॥
दिनरात्राश्च ते राम प्रोक्ताः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ॥
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ॥ इति ।

अस्य चायमभिप्रायः— सौरसंवत्सरः सावनवत्सरात् षड्भिर्दिनैरधिको भवति । चान्द्रसंवत्सरादेकादशदिनैः सौरोऽधिको भवति । तथा च सौरसंवत्सरद्वयं चान्द्रवत्सरद्वयाद्द्वाविंशतिदिनैरधिकं भवति । तत ऊर्ध्वं सौरमासाष्टकं चान्द्रमासाष्टकात् सार्धसप्तदिनैरतिरिच्यते । एवं मिलित्वा दिनार्द्धन्यून एकश्चान्द्रमासो भवति । अवशिष्टदिनार्धपूरणं षोडशभिर्दिनैर्घटिकाचतुष्टयेन सम्पद्यते । अत एव वसिष्ठसिद्धान्ते अधिकागमनकाल उक्तः

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतति ह्यधिमासकः ॥ इति ।

पूर्वाधिमासादुत्तराधिमास एतावता कालेन भवतीत्यर्थः । ननु कालाधिक्यमात्रेणाधिकत्वे तिथ्यादिवृद्धेरप्यधिकत्वेन मलत्वं स्यादिति चेन्न । कालाधिक्ये सति नपुंसकत्वेन मलत्वाङ्गीकारात् । तदुक्तं ज्योतिःशास्त्रे—

असङ्क्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः ।
कालान्तरात्समायाति स नपुंसक इष्यते ॥

नपुंसकत्वं च पुरुषभूतस्य सूर्यस्याभावात् । तत्रारुणादयो द्वादशपुंरूपाः सूर्याः पूर्वमुक्ताः ।

मलिनै राक्षसैर्मुष्टत्वात् मलिम्लुचै राक्षसैराक्रान्तत्वाद्वा मलिम्लुचत्वमधिकस्य मासस्य । तदुक्तं शातातपेन—

नैर्ऋतैर्यातुधानैश्च समाक्रान्तोऽधिमासकः ।
मलिम्लुचैः समाक्रान्तं सूर्यसङ्क्रान्तिवर्जितम् ॥
मलिम्लुचं विजानीयाद् गर्हितं सर्वकर्मसु ॥

इति। मलिनः सन् म्लोचति गच्छतीति वा मलिम्लुच इति।

ननु द्वात्रिंशद्भिर्गतैरित्यनेन येयं कालेयत्ता प्रदर्शिता सा वचनान्तरेण विरुद्ध्यते। तथा च काठकगृह्ये—

यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत्॥ इति।

सत्यम्। भिन्नविषयत्वान्नायं दोषः। ज्योतिःशास्त्रप्रसिद्धं मध्यममानमाश्रित्य द्वात्रिंशद्भिर्गतैरित्युक्तम्। स्फुटमानमाश्रित्य यस्मिन् मासे इत्यभिहितम्। ननु मध्यममानसिद्धः अधिमासो ज्योतिःशास्त्रव्यवहार-एवोपयुज्यते। न तु श्रौतस्मार्तयोः। श्रौतस्मार्तोपयुक्तस्याधिमासस्य शुक्लप्रतिपदादिदर्शान्तत्वनियमात्। मध्यममानप्रवृत्तस्य तादृशनियमाभावात्। षोडशभिर्दिनैर्घटिकाचतुष्टयेनाधिक्यात्। दर्शान्तमासे विवक्षिते कृष्ण द्वितीयायां घटिकाचतुष्टये गतेऽधिमासस्य प्रवृत्तिः स्यात्। अथानियतोपक्रमावसाना द्वात्रिंशन्मासाः षोडशदिनाधिकघटिकाचतुष्टयविशिष्टा विवक्षितास्तदाऽपि शुक्लप्रतिपदादिदर्शान्तो मास इत्येष नियमो न लभ्यते।

न च तादृशनियमोऽप्रामाणिक इति वाच्यम्। "इन्द्राग्नी यत्र हूयेते"—इति लघुहारीतवचनेन प्रतिपदादिदर्शान्तमासोऽसङ्क्रान्तो मलिम्लुचः अधिक इत्यवगमात्। तस्मान्मध्यममानगणना श्रौतस्मार्तयोर्नोपयुक्ता इति। बाढम्। तथाऽपि मलं वदन्ति कालस्येत्युक्तकालाधिक्यप्रदर्शनार्थमभिहितमित्यदोषः। अत एव महाभारते षष्टिमासात्मकेषु पञ्चसु वत्सरेषु द्वावधिकौ भवत इत्युक्तम्—

पञ्चमे पञ्चमे वर्षे द्वौमासावधिमासकौ।
तेषां कालातिरेकेण ग्रहाणामतिचारतः॥ इति।

ननु अधिकस्य द्वात्रिंशत्तमत्वं व्यभिचरति न्यूनाधिकसंख्याया दर्शनात्। तथा हि अष्टसप्तत्यधिकाष्टादशशततमे १८७८ शकवर्षे मन्मथसंवत्सरे भाद्रपदः अधिकः। तत्पूर्वं विजयसंवत्सरे वैशाखः अधिकः। वैशाखमारभ्य गणनायां पूर्वोक्तभाद्रपदः एकोनत्रिंशत्तमो भवति। तथा मन्मथसंवत्सरोत्तरं विलम्बिवत्सरे श्रावणः अधिकः। पूर्वोक्तभाद्रपदमारभ्य गणनायां यथोक्तः श्रावणः षट्त्रिंशत्तमो भवति। एवं विलम्बिसंवत्सरोत्तरं प्लवसंवत्सरे ज्येष्ठः अधिकः। पूर्वोक्तश्रावणमारभ्य गणनायां यथोक्तमासः पञ्चत्रिंशत्तमो भवतीति चेन्नायं दोषः। त्रिंशत्तमत्वस्योपलक्षणत्वाङ्गीकारात्। उदाहरणप्रदर्शनार्थमेतदुक्तमित्यविरोधः। एवं च "तदेतत्सर्वं द्वात्रिंशन्मासार्वाङ्मलमासो न भवतीत्येवं परं" इति "द्वात्रिंशन्मासादूर्ध्वं योऽसङ्क्रान्तो मासःसोऽधिमास" इति च हेमाद्रिवचनं, मासे त्रिंशत्तमे इत्येतत्त्रिंशन्मासार्वाङ् न सम्भवतीत्येवंपरमिति चन्द्रिकावचनं च मध्यमगणनाभिप्रायकम्। न यथाश्रुतार्थकम्। प्रत्यक्षविरोधात्। ननु अस्तु सङ्क्रान्तिरहितस्य मलत्वम्। द्विसङ्क्रान्तियुक्तस्य मलत्वं तु न युक्तम्। कालाधिक्याभावात्। "मलं वदन्ति"—इत्यनेन कालाधिक्यवत एव मलत्वविधानादितिचेन्न। देवलेन—

राशिद्वयं यत्र मासे सङ्क्रमेत दिवाकरः।
नाधिमासो भवेदेष मलमासस्तु केवलः। इति

काठकगृह्ये च "यस्मिन् मासे" इति चोक्तेः कालाधिक्यप्रयुक्तमलत्वाभावेऽपि एकमासग्रासित्वरूपमलत्वोपपत्तेः।

एवं च कालाधिक्येऽपि मलत्वं भवतीत्येतदर्थकं पूर्ववचनमित्यदोषः॥

इत्यधिकमासनिरूपणम्

अथ क्षयमासनिरूपणम्

द्विसङ्क्रान्तियुक्तः प्रतिपदादिदर्शान्तो मासः क्षयः।

तदुक्तं ज्योतिःसिद्धान्ते—

असङ्क्रान्तिमासोऽधिमासः स्फुटःस्याद्
द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।
क्षयः कार्त्तिकादित्रये नान्यतः स्यात्
तदावर्षमध्येऽधिमासद्वयं च ॥ इति ॥

अस्यायमभिप्रायः–योऽयं स्फुटमानेनासङ्क्रान्तो मासः सः अधिकः। यस्तु द्विसङ्क्रान्तियुक्तः स क्षयः। स चाधिमासवत् न पुनः पुनः समायाति किंतु यदा कदा वा। सोऽपि क्षयः (प्रायः) कार्त्तिकादित्रये भवति। यदैवं तदा वर्षमध्येऽप्यधिमासद्वयं भवतीति। तदपि क्षयमासात् पूर्वमेकोऽधिकमासः अपरः क्षयोत्तरकालिकः। न तु क्षयात्पूर्वमेव वा परमेव वाऽधिमासद्वयं ज्योतिःशास्त्रविरुद्धत्वात्। विष्णुधर्मोत्तरकाठकगृह्यादिवचनविरोधाच्च। अत्रोपपत्तिजिज्ञासुभिर्मरीचिरवलोकनीया। प्रकृतेऽन्यत्रोपयोगाभावान्नप्रदर्श्यते।

ननु अधिमासस्य त्रिंशन्मासव्यवधानमावश्यकमित्यवगतम्। तत्कथमुच्यते वर्षमध्येऽधिमासद्वयमिति चेदुच्यते। तत्र द्वयोरधिकयोर्मध्ये एकस्यैव गणितागतत्वेनापरस्य क्षयनिमित्तकत्वेन विरोधाभावात्।

क्षयसम्भवकालश्च सिद्धान्तशिरोमणौ भास्करार्येणोक्तः—

गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः।
गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं
कुवेदेन्दुवर्षैः कचिद्गोकुभिश्च ॥ इति ॥

अस्याचायमर्थः—अब्ध्यद्रिनन्दैः—अङ्कानां वामतो गतिरितिगणकप्रसिद्ध्या चतुःसप्तत्यधिकनवशतसंख्याकैः (९७४) कश्चिदुक्तमासत्रयोपेत वत्सरो गतः। तिथीशैः—पञ्चदशाधिकशतोत्तरसहस्रपरिमिते (१११५) शके कश्चनोक्तमासत्रयोपेतो वत्सरो भविष्यति। तथा अङ्गाक्षसूर्यैः—षट्पञ्चाशदधिकशतद्वयोत्तरसहस्रतमे (१२५६) शकवर्षे कश्चनोक्तमासत्रयोपेतो वत्सरो भविष्यति। अत्र माधवोदाहरणमुत्तरत्रापेक्षितत्वादत्रैव लिख्यते—“पूर्वोदाहृतेश्वरसंवत्सरात्प्राचीनो भावसंवत्सरः तत्र भाद्रपदबहुलामायां कन्यासङ्क्रान्तिः। तत ऊर्ध्वमेकमसङ्क्रान्तं मासमतीत्योत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसङ्क्रान्ती। तत ऊर्ध्वमेकस्मिन्नेव मासे शुक्लप्रतिपदि धनुःसङ्क्रान्तिर्दर्शे मकरसङ्क्रान्तिः। अनन्तरे मासे दर्शे कुम्भसङ्क्रान्तिः। तत ऊर्ध्वमेकमसङ्क्रान्तं मासमतीत्य प्रतिपदि मीनसङ्क्रान्तिः। एवं सत्येकस्मिन्नेव वत्सरे द्वावसङ्क्रान्तौ मासौ एको द्विसङ्क्रान्तिमासः इति यथोक्तमासत्रयमुपपद्यते” इति। गजाद्र्यग्निभूमिः—अष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्याकशकवर्षे (१३७८) कश्चनोक्तमासत्रयोपेतवत्सरो भविष्यति। एते कालाः प्रदर्शनार्थमुक्ताः। न त्वेतेष्वेवेति नियमः। तेन कचिदित्यस्यात्रापि सम्बन्धः समुचितः। प्रायशः कुवेदेन्दुवर्षैः—एकचत्वारिंशदधिकशतवत्सरैः (१४१) पूर्वापरयोः क्षयोपेतवत्सरयोर्व्यवधानं भवति। एष उत्तरावधिः एतदपेक्षयाऽधिकव्यवधानं न भवतीति यावत्। कचित् गोकुभिश्च-एकोनविंशतिवत्सरैः (१९) पूर्वापरयोः क्षयोपेतवत्सरयोर्व्यवधानं भवति। अयं पूर्वावधिः एतदपेक्षयाऽल्पं व्यवधानं न भवतीत्यर्थः। तेनानयोर्मध्ये क्षयसम्पातेऽपि न क्षतिः। इति।

तथा च पूर्वोदाहृतप्लवसंवत्सरादुत्तरभावि (१८८६ तमे शके) शोभकृद्वत्सरे दर्शे कन्यासङ्क्रान्तिः तत एकमसङ्क्रान्तं मासमतीत्य प्रतिपदि तुलासङ्क्रान्तिः प्रतिपदोः क्रमेण वृश्चिकधनुःसङ्क्रान्ती। पुनः शीघ्रगत्य

तद्दर्शे एव मकरसङ्क्रान्तिः तदुत्तरं दर्शयोः क्रमेण कुम्भमीनसङ्क्रान्ती। पुनरेकमसङ्क्रान्तं मासमतीत्य प्रतिपदि मेषसङ्क्रान्तिः। तत्र मेषादिस्थे सवितरीत्यनेन वचनेन धनुःस्थे रवौ दर्शपूर्तिस्तदा तस्य मार्गशीर्षत्वं समुचितम्। तथाऽपि पूर्वोदाहृते धनुस्स्थे रवौ दर्शो न समाप्तः किन्तु मकरस्थे रवौ दर्शः समाप्तः। अतस्तस्य पौषत्वमुपपन्नम्। क्षयपूर्व—भाविदर्शस्य वृश्चिकस्थे रवौ समाप्तत्वात्कार्त्तिकत्वं युक्तम्। अतो मध्ये मार्गशीर्षो लुप्त इति तस्य क्षयसंज्ञा युक्ता। स च एकमासग्रासित्वादंहसः पापस्य पतिरितिव्युत्पत्त्या अंहस्पतिसंज्ञकोऽपि भवति।

तदुक्तं ब्रह्मसिद्धान्ते—

अंहो नाम महापापं शून्यमासे शुभे कृते।
जायतेंऽहस्पतिः प्रोक्तः संज्ञाभेदेन चेति सः॥ इति।

तथा शून्यसंज्ञकोऽपि भवति। तदुक्तं तत्रैव—

शुद्धेन्दुमासे शुद्धार्कसङ्क्रमद्वयमस्ति चेत्।
शून्यमासः स विज्ञेयो न तत्र शुभमाचरेत्॥ इति।

तथा चोक्तं ज्योतिर्ग्रन्थे बार्हस्पत्ये—

यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।
संसर्पांहस्पती मासावधिमासश्च निन्दिताः॥ इति।

यदा असङ्क्रान्तमासद्वयं द्विसङ्क्रान्तियुक्तो मास एको भवति तदा पूर्वोऽसङ्क्रान्तो मासः संसर्पसंज्ञकः। द्विसङ्क्रान्तिमास अंहस्पतिसंज्ञकः। उत्तरोऽसङ्क्रान्तोऽधिमाससंज्ञकः। एते विवाहादौ निन्दिता इति हेमाद्रि-माधवाऽभिप्रेतोऽर्थः। यद्यपि सङ्क्रान्तिरहितस्य संसर्प इति अधिक इति च संज्ञा वक्ष्यमाणश्रुतिस्मृत्यादिभ्योऽवगम्यते। तथाऽपि व्यवहारसिद्ध्यर्थं

पूर्वाधिमासस्य संसर्पत्वं पारिभाषिकम्। न तु संसर्प इति संज्ञा, कर्मार्हत्वेन सम्यक् सर्पतीति संसर्प इति समाख्याबलादधिकत्वव्यावर्तकत्वेन प्रयुक्ता। पूर्वोक्तवचनस्वरसोऽप्येवं सामान्यतस्त्रयाणां मासानां निन्दितत्वोक्तिः। तानि च श्रुत्यादीन्युदाह्रियन्ते—

तैत्तिरीयश्रुतौ ऋतुग्रहप्रकरणे मधुश्च माधवश्चेत्याद्युक्त्वा संसर्पोऽस्यंहस्पत्याय त्वा इत्याम्नायते। तत्र भट्टभास्करः—"संसर्प इति त्रयोदशो मास उच्यते। स हि द्वादशेन मासेन संसर्पति सङ्गच्छते। यद्वा यस्मादयं मासि मास्यंशेनांशेन निष्पद्यते। तस्मात्संसृष्ट एव मासान्तरैः सर्पति। त्रिंशता च मासैर्मासत्वेन सम्पद्यते। ईदृशस्त्वमसि न कर्मणां त्रयोदश मासार्होऽसि" इति। त्रयोदशमासेतिसम्बुद्धिः। तद्ब्राह्मणं च "संसर्पोऽस्यंहस्पत्याय त्वेत्याह अस्ति त्रयोदशो मास इत्याहुस्तमेव तत्प्रीणाति"। इति।

अत्र भट्टभास्करः "उपयामगृहीतोऽसीत्यादि गतम्। तद्ग्रहणं योऽधिमासस्तमेव प्रीणाति प्रीणयति त्रयोदशग्रहणेन" इति।

सायणोऽपि "मधुश्चेत्यादिमन्त्रैरेव द्वादशानां मासानां प्रीतत्वात् संसर्पमन्त्रस्य निर्विषयत्वमाशङ्क्य व्याचष्टे उपयाम—तत्प्रीणाति इति। अधिकमासस्त्रयोदशः"। इति। नारदश्च—

सङ्क्रान्तिरहितो मासो यो वा सङ्क्रान्तियुग्मयुक्।
पूर्वः संसर्पमासः स्यादंहस्पतिरथापरः।
मलमासाविमौ प्रोक्तौ सर्वकर्मबहिष्कृतौ॥ इति।

विद्यामाधवीये—

संसर्पो रविमासि दर्शयुगलं पूर्णाद्वयं वाऽस्ति चेत्॥ इति।

एतैः श्रुतिस्मृतिप्रभृतिभिरधिकमात्रस्य संसर्पत्वं कर्मानर्हत्वं च प्रोक्तमिति सिद्धम्। यत्तु माधवाचार्यैः "असङ्क्रान्तत्वेनेतराधिकमासवत् कर्मानर्हतायां

प्राप्तायां तदपवादेन कर्मार्हः सन् सम्यक् सर्पतीति संसर्पः" इति विवृतं तत् श्रुतिस्मृतिप्रभृतिभिः कर्मानर्हाधिकमात्रे संसर्पपदप्रयोगेण बहुविरोधादुपेक्ष्यमेव। अस्तु वा कर्मार्हता समाख्यया। तथाऽपि श्रुतिलिङ्गादिबलाबलाधिकरणन्यायेन समाख्यायाः पूर्वोक्तवाक्येन बाधः समुचितः। न च समाख्याया निर्विषयता। एकस्मिन् वर्षे संसर्पक्षययोर्द्वयोरेव सद्भावे कतिपयकर्मार्हत्वस्य विद्यमानत्वेन चरितार्थत्वात्।

वस्तुतस्तु तद्ग्रन्थपूर्वापरपर्यालोचनया माधवोक्तसमाख्याया अपि सार्वत्रिकत्वं न तस्यापीष्टमित्यवगम्यते। एकस्मिन् वर्षे यौ द्वावसङ्क्रान्तौ मासौ तयोः पूर्वस्य सङ्क्रान्तस्य प्राकृतत्वं वचनान्तरप्राप्तमवलम्ब्य समाख्या प्रदर्शिता माधवेन। किं च कर्मार्हस्यापि संसर्पस्य विवाहादौ निन्द्यत्वं तेनैवाभिहितम्। तस्मान्न कोपि विरोधः।

ननु श्रुतौ त्रयोदशमासः संसर्पसंज्ञकः एक एव प्रयुक्तः न चतुर्दशमासः तत्कथमुच्यतेऽधिमासद्वयमिति। अधिमासद्वयाङ्गीकारे च संवत्सरस्य चतुर्दशमासत्वापत्तिः। न चेष्टापत्तिः। श्रुतिविरोधात्। तदुक्तं—

"त्रयोदशं तु श्रुतिराहमासं चतुर्दशः क्वापि न चात्र दृष्टः।"

इति चेदुच्यते—एकस्मिन् वर्षेऽसङ्क्रान्तः श्रुत्युक्तसंसर्पसंज्ञकः अपरस्तु सङ्क्रान्तिशून्योऽपि शुद्धतुल्यत्वादुत्तरमाससंज्ञक एवेति न विरोधः। ननु माभूच्चतुर्दशमासत्वापत्तिः। तथाऽपि क्षयमासवद्वत्सरस्य एकादशमासत्वं प्रसज्यते अधिकद्वयपरित्यागे सति ससङ्क्रान्तानां मासानामेकादशत्वेनोपलम्भात्। द्वादशमासाः संवत्सरः इति श्रुतिः ससङ्क्रान्तमासाभिप्रायेण प्रवृत्ता। असङ्क्रान्तमासस्य त्रयोदशत्वेन संसर्पनाम्ना पृथगुक्तेः। तथा सति क्षयवति वर्षेऽसङ्क्रान्तयोर्द्वयोः परित्यागे अवशिष्टाः ससङ्क्रान्ता मासा एकादशैव। अतो नित्यवच्छ्रुतिविरोधः इति चेन्नायं दोषः। द्विसङ्क्रान्तियुक्तस्य मासद्वयत्वेन परिगणनात्।

तत्सिद्धं संसर्पशब्दोऽसङ्क्रान्तमाससामान्यवाचक इति। तथाऽपि धर्मशास्त्रे क्षयमासवति वत्सरे रूढ्या संसर्पशब्दः पूर्वासङ्क्रान्तमास एव प्रयुज्यते न क्षयोत्तरवृत्त्यसङ्क्रान्ते इति मर्यादा।

अथ प्राकृतस्वरूपकथनम्

ननु क्षयमासवति वत्सरे कस्य प्राकृतत्वं कस्य वाऽधिकत्वमितिचेदत्र केचित् मलं वदन्ति कालस्येत्यनेन कालाधिक्यवतोऽधिकत्वमपरस्य प्राकृतत्वं वाच्यम्। तथा च वसिष्ठसिद्धान्ते द्वात्रिंशद्भिर्गतैर्मासै— इति। विष्णुधर्मोत्तरे—

समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते।
स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितः॥

इत्यादिवचनात्। एवं च क्षयोत्तरवर्तिनः कालाधिक्यकृतं मलत्वं युक्तम्। तस्य द्वात्रिंशन्मासादूर्ध्वभावित्वात्। क्षयपूर्वभावी प्राकृतः। "प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः" इत्यादिवचनमप्यत्र साधकमित्याहुः। तन्मन्दम्। द्वात्रिंशन्मासात्पूर्वमपि कालाधिक्यकृताधिकस्य पूर्वमेव प्रदर्शितत्वेनैतादृशनियमस्य व्यभिचारात्। किं च गणितागतस्य मलत्वाङ्गीकारे क्षयात्पूर्वभाविन एवासङ्क्रान्तस्य मलत्वं क्षयोत्तरवर्तिन एव प्राकृतत्वमापतेत्। सिद्धान्तसार्वभौमे—

क्षयमासात्पूर्वकालेऽग्रे च मासत्रयावधि।
अधिमासद्वयं तत्र स्यादाद्यो गणितागतः॥

इति क्षयपूर्वभाविन एवाधिकस्य गणितागतत्वोक्तेः। अपि च ज्योतिःसागरे—

त्रिंशत्षट्त्रिंशमासस्य बाह्याभ्यन्तरयोर्द्वयोः।
अधिमासो विकल्पेन बादरायणकीर्तितः॥

अत्र त्रिंशत्पदमेकोनत्रिंशतोऽप्युपलक्षणम् । तथा च एकोनत्रिंशत् षट्त्रिंशन्मासयोरन्तरेऽधिमासो भवतीत्युक्तम् । एवं च षडशीत्यधिकाष्टादशशतशकवर्षे (१८८६) आश्विनः अधिकः मार्गशीर्षक्षयः । क्रोधिवत्सरे चैत्रः अधिकः । शोभकृत्पूर्ववर्तिप्लववत्सरे ज्येष्ठः अधिकः । ज्येष्ठमारभ्य गणनायामयमाश्विन एकोनत्रिंशत्तमो भवति । उत्तरचैत्रः अधिकः यथोक्तगणनया पञ्चत्रिंशत्तमो भवतीति उभयोरप्यधिकार्हता इति कस्याधिकत्वं गणितागतं कस्य नेति न निश्चतुं शक्यम् । अत एव "तदा वर्षमध्येऽधिमासद्वयं च" इत्यनेन स्फुटाधिकमासलक्षणमाश्रित्याधिमासद्वयमिति सामान्यत एवोक्तम् । अत्र वर्षमध्ये इति वर्षपदं न मुख्यवर्षपरम् । अन्यथा मुख्यवर्षमध्येऽपतितोत्तराधिमासस्थलेऽव्याप्तेः । वैश्वानराधिकरणन्यायेनावयुत्यानुवादो वाऽस्तु । वस्तुतस्तु नात्र "समाद्वये साष्टमासे" इति नियमोऽस्ति, किं तु पूर्वाधिमासादारभ्योत्तराधिमासः वर्षादर्वागेव भवतीत्यभिप्रायेणोक्तम् । एवं चात्र वर्षपदं गौणवत्सरपरमिति न कोऽपि दोषः। वस्तुतस्तु अनुपातादानीतोऽधिमासो मध्यममानाद्भवतीति न स्फुटः । अत एव "स्पष्टोऽधिमासः पतितोऽप्यलब्धो यदा यदा वाऽपतितोऽपि लब्धः । सैकैर्निरेकैः क्रमशोऽधिमासैस्तदा दिनौघः सुधिया प्रसाध्यः" इति अहर्गणानयनेऽनुपातसिद्धाधिमासेषु सैकता निरेकता चोक्ता। स्फुटाधिमासस्त्वसङ्क्रान्तत्वरूपलक्षणेनैव ज्ञेयः अत एव ज्योतिःसिद्धान्ते "असङ्क्रान्तिमासोऽधिमासः स्फुटः स्यात्"—इत्यसङ्क्रान्तत्वेनैवाऽधिकलक्षणमुक्तम् । तथा वर्षमध्ये तादृशाधिकमासद्वयमप्यभिहितम् । अस्तु वा गणितेनान्यतरस्यैव गणितागतत्वनिश्चयः । तथाऽपि श्रौतस्मार्तयोस्तेनोपयोगो नास्तीति पूर्वं प्रदर्शितमेव । ज्योतिश्शास्त्रमनुष्ठानापेक्षिततिथ्यादिसाधनेन कृतार्थमनुष्ठानविधिनिषेधयोरसमर्थमेव । अत एव प्रामाणिकैर्ग्रस्तास्ते गणितेन मुक्तिकाले ज्ञातेऽपि भोजनादिपरित्यागः तथा ज्योतिःशास्त्रेण रात्रौ सूर्यग्रहे दिवा चन्द्रग्रहे च भोजनाद्यपरित्यागश्च धर्मशास्त्रवचनादेवानुष्ठीयते । तस्मादत्र प्राकृतत्वनिर्णयो धर्मशास्त्राधीन इत्यनुष्ठातृभिः प्राकृतत्वनिर्णयार्थं

धर्मशास्त्रवचनमेवाश्रयणीयमित्यस्माभिर्धर्मशास्त्रमर्यादया प्राकृतत्वं निर्णीयते—तत्र लघुहारीतेन "तमतिक्रम्य तु यदा" इत्युक्ते पूर्वोक्ताधिमासलक्षणं धर्मशास्त्रसम्मतम् । तथा हेमाद्रौ जाबालिना—

एकस्मिन्नपि वर्षे चेद्द्वौ मासावधिमासकौ ।
पूर्वो मासः प्रशस्तः स्यादपरस्त्वधिमासकः ॥
मासद्वयेऽब्दमध्ये तु सङ्क्रान्तिर्न यदा भवेत् ।
प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः (दुत्तरस्तु मलिम्लुचः)॥

अत्रापिशब्दस्तुशब्दश्च एवकारार्थकः । माधवसम्मतपाठे एवकारश्रवणात् । तथा चायमभिप्राय :—

वर्षपदस्य चैत्रप्रतिपदादिफाल्गुणान्तमासावच्छिन्ने कालविशेषे एव शक्तत्वेन तादृशे एकस्मिन् वर्ष एव यदि द्वावधिकौ भवतस्तदा पूर्वभाविषष्टिदिनात्मके मासे उत्तराधिमासापेक्षया पूर्वोऽसङ्क्रान्तो मासः प्रशस्तः उत्तरासङ्क्रान्तो मासः अधिकः इति । कथं पूर्वस्य प्राशस्त्यमित्यपेक्षायामुत्तरश्लोके पूर्वस्य प्राकृतत्वेन प्राशस्त्यं समर्थितम् । प्राकृतलक्षणमुत्तरत्र वक्ष्यते । अन्यत्सुगमम् ।

ननु पूर्व इति पूर्वोऽधिमास इति नार्थः । अनुपस्थितेः । किं तु पूर्वोत्तरयोरवधित्वेन प्रकृतत्वात् क्षय एव ग्राह्यः एवं च क्षयपूर्वभाव्यसङ्क्रान्तो मासः प्राकृतः प्रकृतिः स्वभावः त्रिंशत्तिथ्यात्मकः तद्युक्तः प्राकृतः अनधिकः शुद्धः कर्मार्हः इत्यर्थः सङ्क्रान्तेः पूर्वत्र चालनेन ससङ्क्रान्तित्वसम्पादनात् । न तु षष्टिदिनात्मके पूर्वस्याधिकस्य प्राकृतत्वम् । क्षयाव्यवहितपूर्ववृत्त्यसङ्क्रान्ते प्राकृतत्वासम्भवात् इति चेन्न । क्षयाभाववति वर्षेऽधिकपाते षष्टिदिनात्मके मासे पूर्वस्यासङ्क्रान्तस्य मलिम्लुचत्वे "आद्यो मलिम्लुचो ज्ञेयः" इत्यनेन सिद्धे तत्सामान्यात्क्षयवति वत्सरेऽप्यधिमासद्वयस्य मलत्वे

प्रसक्ते वचनमिदं प्रवृत्तं तदपवादेन पूर्वाधिकस्य प्राकृतत्वं बोधयतीत्यधिमास एवोपस्थितो न क्षयः। अत एव द्वौ मासावधिमासकौ इति स्पष्टमेव द्वयोरधिमासयोः पूर्वस्य प्राकृतत्वमुक्तम्। क्षयाव्यवहितप्राकृतस्थलेऽपि क्षयेण सह षष्टिदिनात्मकत्वोपपत्तेः पूर्वस्याधिकस्य प्राकृतत्वमुपपद्यते। अत एव —

संसर्पोऽहस्पतिश्चेति द्विविधावधिमासकौ।
मतौ पूर्वापरौ दुष्टौ परपूर्वौ शुभावहौ ॥ इति वचनमुपपद्यते।

अस्यायमर्थः—संसर्पपदस्याधिकमासार्थकत्वोक्तेः संसर्परूपोऽधिमासाख्यः पूर्वो दुष्टः उत्तरः कर्मार्हः। क्षयेण सह षष्टिदिनात्मके अंहस्पतिरूपोऽधिमासाख्य उत्तरो दुष्टः क्षयात्। तत्पूर्वोऽसङ्क्रान्तोऽपि शुभावहः इति। अत्र क्षयेऽसङ्क्रान्तत्वरूपाधिमासप्रयोजकाभावेऽपि सङ्क्रान्तेरपि मासव्यपदेशप्रयोजकतया तदाधिक्येनाधिकत्वव्यवहारः कृतः। तेन "नाधिमासो भवेदेषः" इति न पूर्वोक्तवचनविरोधः। नन्वेवं क्षयेन सह षष्टिदिनात्मकत्वेऽङ्गीकृते यत्र दर्शे कन्यासङ्क्रान्तिः असङ्क्रान्तं मासमेकमतीत्य प्रतिपदि तुलासङ्क्रान्तिः तद्दर्श एव वृश्चिकसङ्क्रान्तिः तत्रासङ्क्रान्तस्याश्विनस्य प्राकृतत्वे, तदुत्तरार्धस्याश्विनस्य क्षयस्य दुष्टत्वेऽङ्गीकृते च "क्षयः कार्तिकादित्रये" इति वचनविरोधः क्षयस्याश्विनेऽसम्भवादिति वाच्यम्। एतादृशोदाहरणस्य कल्पनामात्रत्वेनाप्रामाणिकत्वात्। प्रामाणिकत्वेवा कार्त्तिकादित्रय एव क्षय इतिनियमानङ्गीकारात्। यदा रविमन्दोच्चं मिथुनसप्तदशाष्टादशादिभागस्थं भवति तदा कार्तिकादित्रये क्षयो भवतीत्याभिप्रेतत्वात् अत एव "सर्वेषु मासेष्वधिमासकः स्यात्तुलादिषट्केपि च शून्यमासः" इति विवक्षितमन्दोच्चात् तुलादिषट्के क्षयमासो भवतीति वसिष्ठकथनमुपपद्यते "अत एव मन्दोच्चभेदेन सर्वेषु मासेष्वपि क्षयः स्यान्नाम।

अत एव सिद्धान्ततत्वविवेके—

स्फुटैर्लक्षणैर्यैरयं तानि सर्वेष्वपि स्युर्मधोश्चान्द्रमासेषु काले।
अतोऽयं क्षयः सर्वचान्द्रेष्वपीत्थं न जानन्ति सद्वासनाज्ञानशून्याः ॥
इदानींतनार्थं न शास्त्रं प्रवृत्तं न सत् कार्त्तिकादित्रयोत्थं तदुक्तम्।
सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत्कार्थवर्यस्य यादृग्विरुद्धम् ॥

इत्यनेन सर्वेषु मासेषु क्षयो भवतीत्युक्तम्।

एतेन "सर्वत्राधिमासस्योत्तरमासपूर्वार्द्धत्वे प्राप्ते तदपवादत्वेन "मासद्वयेऽब्दमध्ये" इति प्रवृत्तम्। एकस्मिन्नब्दे यद्यसङ्क्रान्तिद्वयं भवति तदा वैपरीत्यम्। षष्टिदिनात्मकस्य पूर्वो भागः प्रशस्तः उत्तरभागो मलिम्लुचः। एकाब्दमध्यवर्तिनौ द्वावधिमासौ पूर्वमासोत्तरार्द्धत्वात्पूर्वमाससंज्ञावित्यभिप्रायः। युक्तं चैतत्। अधिकस्य वृद्धित्वात् वृद्धेः पूर्वनिष्ठत्वनियमात्। अन्यथा तिथिवृद्धेरप्युत्तरतिथिसंज्ञत्वापत्तेः।

सामान्याधिमासस्य तु वचनादुत्तरमासशेषता, पूर्वार्धस्य मलिम्लुचत्वमिति" निरस्तम्। वाक्यनार्जवात्। पूर्वोत्तरशब्दाभ्यामुपात्ताधिमासपरित्यागेनानुपात्तभागपरिग्रहस्यायुक्तत्वात्। अनेकाध्याहारप्रसक्तेश्च।

तस्मात्पूर्वोऽसङ्क्रान्तः प्राकृतः। उत्तरासङ्क्रान्तो मलिम्लुचः। एतच्च प्राकृतत्वं चैत्रादिफाल्गुनान्तवर्षमध्य एवेति सिद्धम्।

ननु "मासद्वये—इत्यत्र अब्दमध्ये इत्यविवक्षितम्। वैश्वानराधिकरणन्यायेनावयुत्यानुवादो वा। तथा च क्षयपूर्वभाव्यधिकः प्राकृतः क्षयोत्तरभाव्यधिको मलिम्लुचः इति प्रतीयते। अत एवायं श्लोको माधवेन

व्याख्यातः " सङ्क्रान्तिरहितयोर्द्वयोर्मासयोर्यः पूर्वोऽसङ्क्रान्तः सः प्राकृतः शुद्धः कर्मार्हः इत्यर्थः । वैद्यनाथेनाप्येतदेवानूदितम् । हेमाद्रेरप्ययमेव पक्षः सम्मत इत्याभाति । इति चेन्न । सम्भवति अब्दपदस्य विधिघटकत्वे अविवक्षाया अन्याय्यत्वात् । माधवेनास्य व्याख्याने स्पष्टत्वादेवाब्दपदं परित्यक्तं न त्वविवक्षितत्वेन । उपजीव्यविरोधात् । अर्थान्तरस्यानुक्तेश्च । किं च माधवस्यैकवत्सरीयोक्तमासत्रय एव पूर्वासङ्क्रान्तस्य प्राकृतत्वमभिप्रेतमिति तदुदाहरणादुपसंहारवचनाच्चावगम्यते । तेन हि आश्विन फाल्गुनयोरधिकत्वं मार्गशीर्षक्षयश्चाभिहितम् । एतदुदाहरणमेकवत्सरीयम् । तथा " एवं सत्येकस्मिन्नेव वत्सरे द्वावसङ्क्रान्तौ मासौ, एको द्विसङ्क्रान्तमासः इति यथोक्तमासत्रयं सम्पद्यते " इत्युपसंहृतम् । अत एव स्वीयसङ्ग्रहकारिकायां —

> असङ्क्रान्तावेकवर्षे द्वौ चेत्संसर्प आदिमः ।
> क्षयमासो द्विसङ्क्रान्तः स चांहस्पतिसंज्ञकः ॥

इत्यनेन स्पष्टमेव मासत्रयस्यैकवर्षवृत्तित्वमवोचत् । अस्यैव लघुव्याख्याने स एव " यदा त्वेकस्मिन् वत्सरे द्वावसङ्क्रान्तौ मासौ प्राप्नुतः तदानीं तयोर्मध्ये उत्तर एवाधिमासः पूर्वस्तु सङ्क्रान्तिरहितोऽपि नाधिमासः " इत्याह ॥ युक्तं चैतत् । संवत्सरावयवानां ससङ्क्रान्तानां मासानां द्वादशत्वेनासङ्क्रान्तस्य संसर्पाख्यस्यैकत्वेन च श्रुत्युक्तत्वादसङ्क्रान्तमासद्वयवत्त्वेन संवत्सरस्य चतुर्दशमासत्वापत्त्या पूर्वस्यासङ्क्रान्तस्य प्राकृतत्ववचनं सार्थकम् । एकवत्सरेऽसङ्क्रान्तस्यैकत्वे श्रुतिविरोधासम्भवेन न प्राकृतत्वोक्तेरावश्यकता तदुक्तं पराशरेण—

> एकत्र मासद्वितयं यदि स्याद्वर्षेऽधिकं तत्र परोऽधिमासः ।
> त्रयोदशं तु श्रुतिराह वेदे चतुर्दशः क्वापि न चात्र दृष्टः ॥

इति । माधवेनेमामेव शङ्कामुद्भाव्य समाहितम् " नैष दोषः, असङ्क्रान्तत्वेनाधिकत्वप्रसक्तियुक्तयोर्द्वयोर्मध्ये पूर्वस्याधिकमासत्वनिषेधात् । उक्तं हि ज्योतिःसिद्धान्ते —

> घटकन्यागते सूर्ये वृश्चिके वाऽथ धन्विनि ।
> मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते ॥

अयमर्थः—वृश्चिकादिषु चतुर्षु मासेषु यदा मलमासो भवति तदा सूर्ये तुलाकन्ययोर्वर्तमाने सत्यसङ्क्रान्तोऽपि नाधिमास इति । घटकन्येत्युपलक्षणम् । पूर्वेष्वपि प्रसक्तो नाधिमासः । तदुक्तं ब्रह्मसिद्धान्ते —

> " चैत्रादर्वाङ् नाधिमासः परतस्त्वधिको भवेत् । " इति ।

चैत्रादारभ्योपरितनेषु मासेषु यदा यौ कौ चिन्मासावसङ्क्रान्तौ तदा तयोरर्वाचीनः पूर्वो नाधिमासः । उत्तरस्तु भवत्यधिमासः इति । अनेनापि एकवत्सरपतिताधिमासद्वये एव पूर्वस्य प्राकृतत्वमङ्गीकृतमिति ज्ञायते । धर्मसिन्धावपि एकवत्सरीयत्वेनैवोदाहरणं प्रदर्शितम् । यथा एक आश्विन द्वितीयः फाल्गुणः । वैद्यनाथस्याप्येतदेवेष्टमिति तद्ग्रन्थादेवावगम्यते । एतच्चाग्रे स्पष्टीभविष्यति । स्मृतिकौस्तुभेऽपि " द्विसङ्क्रान्तो यत्र वर्षे भवति तत्र पूर्वोऽसङ्क्रान्तः संसर्प " इत्युक्तम् । व्रतरत्नाकरे शिवशङ्करोऽपि स्पष्टमेव वर्षपदेनात्र चैत्रादिफाल्गुणान्तवर्षस्यैव ग्रहणमित्यभिहितवान् ।

अत्रैव मतान्तरवर्णनं तन्निरसनं च

यत्तु कैश्चित् " अब्दमध्ये इत्यत्राब्दपदमविवक्षितम् । अस्तु वा जननादाविव पूर्वाधिमासादारभ्य वर्षमध्ये इत्यर्थकत्वाद्गौणमब्दपदम् । तथा च पूर्वाधिमासादारभ्य वर्षादर्वागुत्तराधिमासे पूर्वाधिकः प्राकृतः । यदात्वा-

श्विनादिषट्के एकोऽसङ्क्रान्तश्चैत्रादिषट्केऽपरस्तदा आश्विनादिषट्के पतितो नाधिमासः। तदुक्तं ब्रह्मसिद्धान्ते "चैत्रादर्वाङिति"। चैत्रादर्वाङित्यस्य पूर्वावधेरपेक्षितत्वेनाश्विनो गृह्यते। तथा चाश्विनादारभ्य चैत्रादर्वाङ् नाधिमासः। चैत्रात्परस्तादाश्विनादर्वाङ् पतितोऽधिमासः। अत एव ज्योतिःसिद्धान्ते—"घटकन्यागते" इत्युक्तम्। आश्विनादिषट्के नाधिमासः इत्यर्थः। आश्विनादिषट्के एवाधिमासद्वये तु पूर्वः प्राकृतः परोऽधिमासः" इत्युक्तम्। तदपि मन्दम्। अब्दपदस्य तादृशार्थग्राहकप्रमाणाभावात्। चैत्रादर्वाङिति तु नोक्तार्थकम्। अनेकपदाध्याहारप्रसङ्गात्। अतो माधवव्याख्यानमेव समञ्जसम्। तच्च प्रागेव निरूपितम्। कमलाकरेणाप्येवमेव व्याख्यातम्। युक्तं चैतत्। अर्वाङित्यस्यार्वाचीनः। परस्तादित्यस्य पर इत्यर्थाङ्गीकारमात्रेण, आरभ्येत्येकपदाध्याहारेण च लाघवात्। घटकन्यागते इत्यप्युक्तार्थकमिति न नियमः। माधवेनान्यथा व्याख्यातत्वात्। तत्तु प्रदर्शितमेव। वस्तुतस्तु घटकन्यागते इति वचनं सामान्यत आश्विनादिषट्केऽधिमासादर्शनेन केवलं सिद्धार्थानुवादकमित्यपि सुवचम्। तथा च सन्दिग्धार्थवाक्यबलात् संवत्सरपदस्याविवक्षितार्थकत्वं गौणवत्सरपरत्वं वा न युक्तम्। किं चानेकवचनविरोधोऽपि। तथा हि। यस्मिन् मासे न सङ्क्रान्तिः इत्यनेन त्रयाणां निन्द्यत्वोक्तेः। एतद्विरोधपरिहारार्थं वत्सरप्रवेशं कृत्वैव प्राकृतत्वं वाच्यम्। तेन विभिन्नवर्षवर्त्तित्वेऽधिमासद्वयस्य त्रयाणामपि मासानां निन्द्यत्वम्। अन्यथा पूर्वाधिमासस्य प्राकृतत्वमिति सिद्ध्यति। न च त्रयाणां निन्द्यत्ववचनस्य

यस्मिन् वर्षे द्विसङ्क्रान्तोऽधिमासद्वयं तदा।
तद्धि मासत्रयं दुष्टं सर्वेषु शुभकर्मसु।

तथा—यद्वर्षमध्येऽधिकमासयुग्मं तत्कार्त्तिकादित्रितये क्षयाख्यम्।
मासत्रयं त्याज्यमिदं प्रयत्नाद्विवाहयज्ञोत्सवमङ्गलेषु॥

इत्यादिविशेषशास्त्रेण सङ्कोच इति वाच्यम्। आहवनीयपदयोरेक होमविषयत्वेन विरोधे प्रसक्ते खलु विशेषवचनेन बाध उक्तः। अत्र तु वचनद्वयस्य भिन्नविषयत्वेन विरोधस्यैवाभावात्। विवाहनिषेधकवाक्ये वर्षपदश्रवणेन एकवर्षे उक्तविधमासत्रयपाते विवाहादिसर्वशुभकर्मनिषेध उच्यते। त्रयाणां निन्द्यत्ववचने वर्षपदाश्रवणेन वर्षद्वयवर्तिमासत्रयस्यापि शुभाशुभकर्मसाधरण्येन निन्द्यत्वमुच्यते इति विरोधाभावात्। किं तु विवाहादिनिषेधकविशेषवचनेन त्रयाणां निन्द्यत्ववचनस्य भिन्नवत्सरवर्तिमासत्रयनिषेधपरत्वेन सङ्कोच इति सुवचम्।

वस्तुतस्तु एकस्मिन् वर्षेऽधिमासद्वये पूर्वाधिमासस्य प्राकृतत्वसमाख्यया प्राप्तस्य सर्वकर्मार्हत्वस्य विवाहादिशुभकर्मनिषेधकवाक्येन उक्तशुभकर्मेतरश्राद्धकर्मार्हत्वरूपत्वे पर्यवसानमभिमतम्। तस्माद्वर्षपदं विवक्षितम्।

किं च यद्वर्षमध्ये इत्यत्रवर्षपदस्याविवक्षामङ्गीकृत्य त्रयाणां निन्द्यत्ववचनस्य विवाहादिमात्रपरत्वे अङ्गीकृतेऽपि न सर्वत्र क्षयपूर्ववर्तिनोऽसङ्क्रान्तस्य प्राकृतत्वं सिद्ध्यति। अनेकवचनैः क्षयवति वत्सरे एकाधिमासपाते तस्य सर्वकर्मानर्हत्वोक्तेः। तथा हि, वैद्यनाथीये "यदा तु सङ्क्रान्तिद्वययुक्तः क्षयमास एकः। असङ्क्रान्तिरेक एव वाऽधिमासो भवति तदुभयं वर्ज्यमित्युक्तं केशवीये—

यस्मिन् मासि न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।
संसर्पांहस्पती मासौ सर्वकर्मबहिष्कृतौ॥

नारदः—सङ्क्रान्तिरहितो मासो यो वा सङ्क्रान्तियुग्मयुक्।
पूर्वः संसर्पमासः स्यादंहस्पतिरथापरः॥
मलमासाविमौ प्रोक्तौ सर्वकर्मबहिष्कृतौ।

कालादर्शेऽपि—सङ्क्रान्तिरहितो मासो मलमासः प्रकीर्तितः ।
मलिम्लुचापराख्यश्च सङ्क्रान्तिद्वययुक् तथा ॥

इत्युक्तेः क्षयपूर्ववर्तिन एव एकस्याधिकत्वे मलत्वेन सर्वकर्मानर्हतोक्ता । न चेदं संसर्पपदवाच्यासङ्क्रान्तसामान्यस्य कर्मानर्हत्वं ब्रूते । न तु क्षयपूर्ववर्तिनोऽसङ्क्रान्तस्येति वाच्यम् । वैद्यनाथैरेकवर्षीयोक्तविधमासत्रय-निरूपणानन्तरं एकवर्षीयोक्तविधमासद्वयस्यैव निन्द्यत्वार्थमुदाहृतत्वेन प्रकरणात् क्षयपूर्वभाविनोऽसङ्क्रान्तस्यात्रविवक्षितत्वात् । अधिकमात्रपरस्यापि संसर्पपदस्य क्षयवति वत्सरे क्षयपूर्वभाविन्यसङ्क्रान्ते मासे एव धर्मशास्त्रे रूढत्वस्य पूर्वमेवोक्तेः । अन्यथा " यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्ति-द्वयमेव वा " इत्यत्राप्यसङ्क्रान्तसामान्यपरत्वस्य वक्तुं शक्यतया मूलो-च्छेदापत्तेः एवं च प्राकृतस्तत्र पूर्वः स्यादिति वचनेन एकस्मिन् वर्षेऽधिमास द्वये पूर्वाधिकस्य प्राकृतत्वमुत्तराधिमासस्य मलिम्लुचत्वम् । उत्तराधिमासस्य भिन्नवत्सरीयत्वे तु एकवर्षेऽधिमासद्वयाभावेन क्षयपूर्ववर्तिनोऽधिकस्य न प्राकृतत्वम् । किं तु केवलसंसर्पत्वमिति सिद्धम् । तथा च शोभकृद्वत्सरे एव उत्तराधिमासाभावेनाश्विनस्य संसर्पत्वमात्रं न प्राकृतत्वमिति फलितम् ।

क्षयाव्यवहितस्य प्राकृतत्वनिरूपणम्

नन्वेवमपि यस्मिन् वर्षे क्षयाव्यवहितपूर्ववर्त्ती असङ्क्रान्तः उत्तराधि-मासस्तु वर्षान्तरे । तत्र कथं पूर्वाधिमासस्य प्राकृतत्वम् । यथा नव्यदृग्गणिते शोभकृद्वत्सरे कार्त्तिकोऽसङ्क्रान्तः कार्त्तिकक्षयः क्रोधिवत्सरे पुनश्चैत्रोऽधिकः । तत्र कार्त्तिकस्य प्राकृतत्वमिष्टम् । अन्यथा शुद्धत्वेन कार्यविधायकवचनविरोधापत्तेः, इति चेद्ब्रूमः वचनान्तरेण प्राकृतत्व-मिति । तथा च स्मृतिः—

दर्शद्वयं यदैकस्मिन् सौरे संसर्पको भवेत् ।
अंहस्पति र्यदैकस्मिंश्चान्द्रे द्वौ सङ्क्रमौ तदा ।
संसर्पोऽहस्पतिश्चेति द्विविधावधिमासकौ ।
मतौ पूर्वापरौ दुष्टौ परपूर्वौ शुभावहौ ॥ इति ।

अयमर्थः षष्टिदिनात्मके मासे संसर्परूपोऽधिमासाख्यः पूर्वो दुष्टः परः शुद्धः शुभावहः । षष्टिदिनात्मके अंहस्पतिरूपोऽधिमासाख्य उत्तरो दुष्टः पूर्वोऽसङ्क्रान्तोऽपि शुद्धः शुभावहः प्राकृत इति यावत् ।

एवं च क्षयाव्यवहितपूर्ववर्त्यसङ्क्रान्तो मासः सर्वत्र प्राकृत इति सिद्धम् ।

अथ प्राकृतलक्षणम्

अथ किं नाम प्राकृतत्वम् । न तावत् स्वोत्तरवृत्तिधर्मवत्वम् । क्षयाव्यवहितवृत्तिप्राकृते स्वोत्तरस्य क्षयात् मलत्वेन तद्वृत्तिमलत्वस्यैव प्राप्ते-र्व्याघातः । तस्य शुद्धतया श्राद्धविधायकदीपिकादिवचनविरोधश्च । नापि स्वोत्तरवर्तिशुद्धत्ववत्वम् । क्षयाव्यवहितपूर्ववृत्तिसंसर्पे एव स्वोत्तरे शुद्धत्वा-भावेनाव्याप्तेर्दुष्परिहरत्वात् । किं तु क्षयानधिकरणवत्सरान्तर्गतस्वस्थाना-पन्नमासवृत्तिधर्मसदृशधर्मवत्वम् । क्षयानधिकरणवत्सरे स्वस्थानापन्नमासस्य सर्वथा शुद्धतया तद्वृत्तिधर्मसदृशधर्मस्यात्रापि सम्भवात् । एवमपि तद्वर्त्तिनः सर्वे धर्मा नातिदिश्यन्ते । किन्त्वपेक्षिता योग्याश्च । न ह्यग्निर्माणवक इत्यत्राग्निवृत्तयः सर्वे धर्मा माणवकेऽतिदिश्यन्ते । किन्तु योग्यस्य तात्पर्य-विषयीभूतस्य धर्मस्यातिदेशः, तथाऽत्रापि शुद्धमासवृत्तिधर्माः सर्वे नातिदिश्यन्ते । किन्तु यथायथमपेक्षिता योग्याश्च । तेऽपि न सर्वस्मिन् प्राकृते समाः । किन्तु विभिन्नाः । क्षयव्यवहितपूर्ववृत्तिप्राकृते शुद्धस्य मासान्तरस्य विद्यमानत्वेन तद्वृत्तिप्रतिसांवत्सरिकादिरूपा धर्मा

एवातिदिश्यन्ते। न तत्तन्मासपुरस्कारेण विहिता धर्मा अपि। अनपेक्षितत्वात्। क्षयव्यवहितपूर्ववृत्तिप्राकृते तु तत्तन्मासपुरस्कारेण विहितधर्मा अपि सर्वेऽतिदिश्यन्ते। अन्यस्य शुद्धस्य मासस्याभावेन शुद्धयर्हस्य मासस्य क्षयेन चानन्यगतिकत्वात्।

एवं च जीमूतवाहनेन प्रकटितः—

" मध्ये विषुवतोर्भानोर्यान्यहानि तु वर्द्धयेत्।
तैःसम्भूयाधिको मासः पतत्येवं त्रयोदशः॥

इति परिशिष्टवचनेन मेषविषुवात्तुलाविषुवपर्यन्तं रवेर्मन्दगतित्वेन दिनाधिक्यादधिमासो भवति। तथा च वैशाखादिषु षट्सु अधिमासपातः शास्त्रसम्मतः।

यदा वक्रातिचाराभ्यां सूर्यसङ्क्रमणं भवेत्।
क्षत्रियाणामसृग्धारास्तदा पिबति मेदिनी॥
न्यूनातिचारे दुर्भिक्षं राष्ट्रं शस्त्रसमाकुलम्।
राजपुत्रसहस्राणामसृगा (सेका)र्द्रा च मेदिनी॥
इत्यादिवचनानुसारेण गतिवैचित्र्येण पतिताधिमासस्यौत्पातिकत्वेन
यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः।
तयैव तिथ्या सङ्क्रान्तिर्यावन्मेषं न गच्छति॥

इति वचनेन तुलाविषुवमेषविषुवयोर्मध्ये तिथिवृद्ध्यभावप्रदर्शनाच्च तुलादित्यादौ दृश्यमानोऽपि नाधिमासः। किन्तूत्पातादधिमाससमानधर्माऽयम्। एवं च यत्र दर्शे तुलासङ्क्रान्तिः तत्र एकमसङ्क्रान्तं मासमतीत्य प्रतिपदि वृश्चिकसङ्क्रान्तिर्दर्शे धनुःसङ्क्रान्तिः तत्र " मीनादिस्थोरविर्येषामारम्भप्रथमक्षणे "। इति व्यासोक्तमासलक्षणानुसारेण मासद्वयस्य तुलास्थरव्यारब्धत्वादाश्विनत्वम्। उत्तरमासस्य धनुस्थरव्यारब्धत्वेन पौषत्वमिति

मार्गशीर्षस्य लोपः। तथा च तत्प्रयुक्तकार्यलोपः। अतः " यां तिथिं समनुप्राप्य " इति वचनात् वृश्चिकसङ्क्रान्तेर्दर्शस्थानतया प्रतिपदस्तुलारब्धत्वेऽपि वृश्चिकारम्भार्हत्वात् तत्रानारम्भेऽपि शङ्खवेलान्यायेन प्रत्यभिज्ञानात्तस्य मासस्य मार्गशीर्षपदवाच्यता। अतिचारपदाच्च स्वस्थानमतीत्य चरतीत्यमावास्यैव वृश्चिकसङ्क्रान्तेः स्वस्थानमवसीयते। वृषादिसङ्क्रान्तिषु तु पूर्वतिथ्यतिक्रमेऽपि नातिचारपदप्रयोगः शास्त्रे। एवं यत्र दर्शे कन्यासङ्क्रान्तिः एकमसङ्क्रान्तं मासमतीत्य प्रतिपदि तुलासङ्क्रान्तिः दर्शे वृश्चिक सङ्क्रान्तिः। तत्र प्रतिपदि तुलासङ्क्रान्तौ तस्य कन्यारब्धत्वेनाश्विनत्वमुत्तरस्य वृश्चिकस्थरव्यारब्धत्वेन मार्गशीर्षत्वमिति तुलास्थरव्यारब्धकार्त्तिकलोपात्तत्प्रयुक्तदेवोत्थानं विफलं स्यात्। अतस्तत्रापि पूर्वोक्तवचनानुसारेण वृश्चिकसङ्क्रान्तेः प्रतिपदर्हत्वेन तुलास्थरव्यारब्ध एवायं मासः इति- कार्त्तिकत्वान्न देवोत्थापनादेर्लोपः।

अत एवासौ नाधिमासो न मलिम्लुचः। सार्द्धवत्सरद्वये त्रिंशत्तिथिभिरेव पतितस्य तथात्वात्। यदा पुनरमावास्यायामेव तुलासङ्क्रान्तिर्भूता न भूतो माधवादिषट्केऽधिमासपातः। अनन्तरमतिचारेण प्रतिपदि वृश्चिकसङ्क्रान्तिः। तदुत्तरमपरा अपि सङ्क्रान्तयो विषुवपर्यन्तं प्रतिपद्येव भवन्ति, तदाऽधिमासान्तरस्यापतितत्वात्पूर्वाधिमासाचृतीयवत्सरे सञ्चितदिवसैरधिमासस्यावश्यंभावादन्यस्य चानुपलब्धेरत्र च बाधकाभावात्तुलादित्य एव सङ्क्रान्तिशून्यस्य मासस्य पश्चात्कर्तव्यसङ्क्रान्तितिथ्यतिक्रमस्य इदानीमेव कृतत्वमवधार्याधिमासत्वं निर्णीयते समाधानान्तरं पुनरन्यन्न पश्यामः "। इत्याशयोऽप्यनादरणीय एव। तथा हि मध्ये विषुवतोर्भानोरिति वचनं सामान्यतः सूर्यस्य तुलादिषु दिनाधिक्याभावेनात्रत्यैरेवाधिकैर्दिनैरधिमासो भवति, इत्यर्थकस्य तुलादिषु स्पष्टाधिमासनिषेधकत्वं दुर्वचम्। न

वा तत्रौत्पातिकत्वम् । अत एवैतत्समानार्थकं "घटकन्यागते सूर्ये" चैत्रादर्वाङ् इत्यादि । तस्मादेतेषां सर्वेषां वचनानां मेषषट्के सूर्यस्य मन्दगतित्वेनाधिक्यसम्भवात्तन्मध्यपतितैरेव दिनैरधिकमाससिद्धिरिति तात्पर्यं वाच्यम् ।

अत एव—दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् ।
नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चयः ॥

इति वचनेन माघाद्येकादशमासेष्वधिकमासकथनं, सर्वेषु मासेष्वधिमासकः स्यात्तुलादिषट्केऽपि च शून्यमासः इति वसिष्ठेन सर्वमासेष्वधिकमासकथनम्, अष्टकानिषेधकथनं चोपपद्यते । अन्यथा सर्वेषामेषां वैयर्थ्यं दुष्परिहरम् ।

व्यासोक्तमासलक्षणमप्यत्र क्षयमासविचारेऽनुपादेयमेव । अस्मिन् लक्षणेऽनेकदोषसम्भवस्य मासलक्षणेऽभिहितत्वात् । तुलादिषु पतितस्यौत्पातिकत्वेऽपि कर्मानर्हत्वस्य प्रमितस्य बाधायोगात् । औत्पातिकत्वेन दोषाधिक्यस्यैव सिद्धेश्च ।

न वा देवोत्थापनादिलोपः । मासद्वयकार्यस्य क्षय एव कर्तव्यत्वावगतेः । स्पष्टीभविष्यतीदं कार्याकार्यनिर्णये । किं च देवोत्थापनादिकं नाश्विनकार्त्तिकादिचान्द्रमासपुरस्कारेण विहितम् । किं तु

अधिमासनिपातेऽपि क्रमादिन्द्राम्बिकाहरीन् ।
कन्यातुलावृश्चिकेषु नृप उत्थापयेद्ध्रुवम् ॥

इति वचनेन सौरमासाश्रयेणेति तत्रैवानुष्ठानसम्भवात् । केवलं

अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति ।
तस्मिन् शुक्ले सदा विष्णुस्तुलायामथ वृश्चिके ॥

इत्यादिवचनतोऽपि सौरमासचान्द्रतिथेः सम्बन्धो विहितः । न चान्द्रमाससौरमाससम्बन्धः । येन कार्तिकलोपात्कार्यलोप आशङ्क्येत । यदुक्तं वृषादिसङ्क्रान्तेस्तिथ्यतिरेके नातिचारपदप्रयोगः शास्त्रे इति तदपि भारते—"पञ्चमे पञ्चमे वर्षे" इत्यत्र कालातिरेकसामान्येऽतिचारपदप्रयोगादुपेक्ष्यम् ।

यदा वक्रातिचाराभ्यामिति वचनं फलकीर्तनाय प्रवृत्तम् । ततश्च स्वाभाविकगतिभिन्नगत्या सङ्क्रमणं यत्र भवति तत्रैतादृशफलमित्यवगम्यते । वक्रातिचाराविह शीघ्रमन्दगती । सूर्यस्य वक्रातिचारासम्भवात् । अत एव धर्मशास्त्रे तादृशदुष्फलकत्वादेवासङ्क्रान्तस्य नपुंसकत्वं मलिम्लुचत्वं मलत्वमित्युच्यते । तादृशवक्रातिचारौ सर्वमासेष्वपि सम्भवतः ।

अस्तु वा तुलादिष्वेव वक्रातिचारौ । तथापि न तेनासङ्क्रान्तस्य शुद्धत्वं वक्तुं शक्यम् । तथा सति अधिकदोषोक्तेरधिककर्मानर्हत्वमेवापतेत् । तेनौत्पातिकत्वाङ्गीकारेऽपि नोक्तेष्टसिद्धिरिति भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्याय एवाङ्गीकृतो भवति । किं च यां तिथिं समनुप्राप्येति वचनमपि न यथाश्रुतार्थकम् । बहुशो वृश्चिकादिसङ्क्रान्तीनां तिथ्यन्तरजातानामुपलम्भात् । यथाश्रुतार्थकत्वेन क्षयवति वर्षे वृश्चिकादिसङ्क्रान्तीनां तिथ्यन्तरजातानां तुलासङ्क्रान्तितिथिनिष्ठत्वकल्पने तात्पर्याङ्गीकारे प्रतिसंवत्सरं तिथ्यन्तरजातानां वृश्चिकादिसङ्क्रान्तीनां विषुवान्तानां तुलादिसङ्क्रान्तितिथिनिष्ठत्वसिद्ध्यर्थमुत्कर्ष अपकर्षो वा प्रसज्येत । न च कस्याप्येतदिष्टम् । तस्मा"द्यां तिथि" मितिवचनमपि "घटकन्यागते" इत्यादिवचनसमानार्थकतया सामान्यतोऽवगतदिनाधिक्यस्यात्राभावेनासङ्क्रान्तत्वाभावकथने तात्पर्यं वाच्यम् । अपि चास्य यथाश्रुतार्थकत्वे तुलादिषु कदाप्यधिको न स्यात् । किं च तुलायां पतितस्यासङ्क्रान्तस्य उत्तरत्रोत्कर्षः स्यान्न तु तदुक्तक्रमसञ्चितस्यान्यस्याभावेन बाधकाभावात्तत्रैव जातत्वमङ्गी-

कार्यम् । क्रमसञ्चितत्वस्यानिर्णायकत्वस्य पूर्वमेवोक्तेः । स्पष्टासङ्क्रान्तमासस्यैवाधिकत्वस्य धर्मशास्त्रसम्मतत्वात्तन्मते बाधकस्य "यां तिथिं समनुप्राप्ये"ति वचनस्य सद्भावाच्च । किं च यत्र कन्यायामेकः मेषेऽपरश्चासङ्क्रान्तो मासः तत्र प्रतिपदि जाततुलासङ्क्रान्तिबलात् वृश्चिकादिसङ्क्रान्तीनां तत्तिथ्यर्हत्वेऽपि तुलासङ्क्रान्तेः कन्यासङ्क्रान्तिमत्तिथ्यर्हत्वानवगमादसङ्क्रान्तस्य शुद्धाश्विनत्वं न स्यात्, किन्तु पूर्वोक्तवचनबलात् मेषासङ्क्रान्तस्यैव चैत्रत्वं स्यात् । न चेष्टापत्तिः । प्राकृतस्तत्र पूर्वः स्यादित्याद्यनेकवचनविरोधस्य दुष्परिहरत्वात् । तस्मात्क्रमसञ्चितस्यैवाधिकत्वं वृश्चिकादिसङ्क्रान्तेश्चालनं वा न धर्मशास्त्रसम्मतम् । तस्मादेतादृश व्यवस्थाकल्पने बीजं न पश्यामः । अत यथोक्तमासलक्षणेनाधिकक्षयमासयोःसम्भवेनान्यनिर्णयस्यानपेक्षितत्वादेव पूर्वैर्नोक्तमिति समाधानान्तरस्यानवकाश एव ।

एवमेत्र जीमूतवाहनमतं प्रायशोऽनुसरता स्मृतितत्वकारेणापि यत् प्रपञ्चितम्—तथाहि

"माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति श्रावणे ॥

तुलाविषुवतोर्भानोर्यान्यहानि तु वर्द्धयेत् ।
तैःसम्भूयाधिको मासः पतत्येव त्रयोदशः ॥

इत्यादिवचनानुसारेण माधवादिषट्के एवाधिमासो नियतः । तुलादिषट्के दिनवृद्ध्यभावोक्तेस्तत्राधिकस्यासम्भवात् । यत्र पुनः—तुलासङ्क्रान्तिरमायां जाता ततोऽसङ्क्रान्तं मासमेकमतीत्यातिचारेण प्रतिपदि वृश्चिकसङ्क्रान्तिः ऋजुगत्या दर्शे धनुःसङ्क्रान्तिः, अत्र वैशाखो द्वितीयो मलमासः । तत्र तुलायां जातोऽप्यसङ्क्रान्तो नाधिकः किन्तूत्पातादधिमाससमानधर्माऽयम् । "यदा

चक्रातिचाराभ्यां सूर्यसङ्क्रमणं भवेत्" इत्यादिज्योतिःशास्त्रवचनैरौत्पातिकत्वावगतेः । "यां तिथिं समनुप्राप्य" इति राजमार्तण्डवचनात् प्रतिपज्जातवृश्चिकसङ्क्रान्तेदर्शयोग्यत्वेन तन्मासस्य तुलास्थरव्यारब्धत्वेऽपि वृश्चिकस्थरव्यारम्भयोग्यतया द्विसङ्क्रान्तस्य मार्गशीर्षपदवाच्यता । पूर्वासङ्क्रान्तः शुद्धः कार्तिकः । वैशाखस्य तु मेषस्थे रवावसङ्क्रान्तो मास इति क्रमसञ्चितत्वात् "मीनादिस्थो रविर्येषा" मिति व्यासोक्तमासलक्षणानुगतेश्चाधिकवैशाखत्वं युक्तम् । एवं यदा आश्विन एकोऽधिमासः तुलादिष्व परोऽधिमासस्तदा आश्विन एवाधिकः प्राकृतत्वात् । तुलादिषु पतित औत्पातिकः । यदा तु तुलायामसङ्क्रान्तः एकः, पुनर्माधवादिषट्के नाधिमासपातः, तदा सार्द्धवत्सरद्वयसञ्चितैरधिमासस्यावश्यंभावादन्यस्यानुपलम्भाच्च तुलादित्य एवाधिमासो निर्णीयते । न त्वौत्पातिकत्वमङ्गीक्रियते । युक्तं चैतत्—"दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्"। इति ज्यौतिषवचनात् । "असङ्क्रान्तो हि यो मासः" इति सामान्यवचनाच्च तत्र पतितस्याधिकत्वाङ्गीकारात् । एवमेकस्मिन् वत्सरे मासद्वयस्य रविलङ्घने तदेकतरस्य मेषादिगतत्वे स एव मलमासः "घटकन्यागते" इत्यादिवचनात् माधवादिषट्कपतितत्वाच्च ।

एकत्र मासद्वितयं यदि स्याद्वर्षेऽधिकं तत्र परोऽधिमासः ।
त्रयोदशं तु श्रुतिराहमासं चतुर्दशः क्वापि न दृष्टपूर्वः ॥

इति शातातपवचनात् "एकस्मिन्नपि वर्षे चेद्द्वौ मासा" विति जाबालिवचनाच्च एकस्मिन्नब्दे मासद्वयस्य रविलङ्घने तस्य मेषाद्यस्पृष्टत्वे च पूर्व एव मलमासः क्रमसञ्चितत्वात् । अन्यथा क्रमाभिधानमनर्थकं स्यात् । तथा ज्योतिःपराशरः—

कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।
सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः ॥ इति ।

तथा राचमार्तण्डे—

अमावास्याद्वयं यत्र मासि मासि प्रवर्तते।
उत्तरश्चोत्तमो ज्ञेयः पूर्वस्तत्र मलिम्लुचः ॥

इति चोक्तेः। तथा यत्र दर्शे कन्यासङ्क्रान्तिः प्रतिपदि तुलासङ्क्रान्तिः, एवमुत्तरत्र दर्शयोः क्रमेण कुम्भमीनसङ्क्रान्ती, पुनरसङ्क्रान्तं मासमेकमतीत्य प्रतिपदि मेषसङ्क्रान्तिः, तत्र कन्यायां मलमासो धनुषि क्षयो मीने भानुसङ्घितः अर्थादधिकचैत्रः फाल्गुनो भवति। अत्र यां तिथिमिति वचनेन मीनादिस्थो रविरिति व्यासोक्तमासलक्षणे योग्यताश्रयणान्न काप्यव्याप्तिः। एवं यत्र दर्शे कन्यासङ्क्रान्तिः, प्रतिपदि तुलासङ्क्रान्तिः, तदुत्तरदर्शेष्वेव क्रमेण वृश्चिकधनुर्मकरकुम्भमीनसङ्क्रान्तयः, प्रतिपदि मेषसङ्क्रान्तिः तत्र न यां तिथिं समनुप्राप्येति वचनेन योग्यतामाश्रित्याश्विनस्य भानुलङ्घितत्वं वक्तुं शक्यम्। वृश्चिकादिसङ्क्रान्तेस्तुलासङ्क्रान्तिमत्तिथियोग्यत्वेऽपि तुलासङ्क्रान्तित्वस्य कन्यासङ्क्रान्तिमत्तिथियोग्यतावच्छेदकस्य दुर्वचत्वात्। किं तु "प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः" इति जाबालिवचनेनाश्विनस्य भानुलङ्घितत्वम्"। इत्यादिना। तदपि कल्पनामात्रमित्यश्रद्धेयमेव।

तथा हि मध्ये विषुवतोरितिगृह्यपरिशिष्टवचने तुलादिषु दिनाधिक्याभावमात्रप्रदर्शके तुलादिष्वधिकमासाभावबोधकत्वकल्पनं, द्विराषाढत्वबोधकवचनेन माघवादिषट्के एवाधिमासपातः इति कल्पनं च कुशकाशावलम्बनम्। न हि गृह्यपरिशिष्टे साक्षान्माधवादिषट्के एवाधिमास इत्युक्तम्। न वा गृह्यपरिशिष्टस्य तत्सम्मतम्। मले—"महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्" इति वचनेनाष्टकानिषेधं कुर्वतस्तस्य तुलादिष्वधिमासस्येष्टत्वात्। या तिथिं समनुप्राप्येति वचनेन व्यासवचने योग्यता-

श्रयणमप्यनेकदूषणैर्निरस्तं पुरस्तात्। यां तिथिमिति वचनस्य सामान्यतस्तुलादिषु दिनाधिक्याभावेन सिद्धार्थमात्रबोधकत्वेन घटकन्यागते इत्यादिवाक्यसिद्धयथाश्रुतार्थमात्रानुवादकत्वं युक्तम्। एकमूलकल्पनालाघवात्। न तु यथाश्रुतार्थकत्वम्। तथा सति तिथ्यन्तरजातस्य सङ्क्रमणस्य तिथ्यन्तरयोग्यतया तत्रैव पुण्यकालत्वेन धर्मानुष्ठानापत्तिर्दुर्वारा। माधवादिष्वेवाधिमासपातः इति नियमोऽपि द्विराषाढत्वबोधनमात्रेण कृतार्थेन "माधवादिषु मासेषु" इति वचनेन न सिद्ध्यति। "सर्वेषु मासेष्वधिमासकः स्यादिति वसिष्ठवचनेन साक्षात्सर्वेषु मासेष्वधिमासोक्तेः, काठकगृह्यविरोधाच्च।

किं च तुलादिष्वेव एकाधिमासपाते तस्य, तत्रैवाधिमासद्वयपाते च पूर्वस्याधिमासस्यौत्सर्गिकत्वं क्रमसञ्चितत्वात्, अन्यथा औत्पातिकत्वमिति निर्युक्तिककल्पनमपि न प्रामाणिकसम्मतिं लभेत। परन्तु केवलमनेकस्मृतिज्योतिःशास्त्रवचनानां अन्यार्थकत्वेन परस्परमविरुद्धानामपि विरोधमुत्प्रेक्ष्य स्वाभिप्रायानुरोधेन व्यवस्था सम्पादिता। न ह्येवंव्यवस्थापकं प्रामाणिकवचनमुपन्यस्तम्। उपन्यस्तवचनान्यपि न तदुक्तार्थप्रतिपादकानि। तत्र किञ्चिदेव वैकल्यं प्रदर्श्यते।

सामान्यतः पौषं विनाऽधिकं वदतः "दशानां फाल्गुनादीनां" इति वचनस्य केवलं विशेषवचनमन्तरा कार्तिकादिषु क्रमसञ्चिताधिमासपरत्वमुक्तम्। वस्तुतस्तु क वा क्रमसञ्चितः क वा औत्पातिक इति निर्णयोऽपि दुःशक इति पूर्वमेव प्रतिपादितम्। अत एव "यदा वक्रातिचाराभ्यां"इति वचनेन तुलादिष्वसङ्क्रान्तद्विसङ्क्रान्तावुत्पातेन भवत इत्यपि दुर्वचम्। "दशानां फाल्गुनादीनां" इति वचनेन मलेऽष्टकानिषेधकपरिशिष्टवचनेन च विरोधात्, सर्वत्रापि क्रमसञ्चिताधिमाससम्भवात्, सिद्धान्ततत्वविवेके च "अतोऽयं क्षयः सर्वचान्द्रेष्वपीत्थम्" इत्यनेन

सर्वमासेषु क्षयोक्तेश्च । वक्रातिचारवचनं सर्वमासविषयमित्यपि वक्तुं शक्यम् । अपि च वक्रातिचारवचनेन तुलादिष्वधिकस्यौत्पातिकत्वे तदुदाहृतशाण्डिल्यवचनविरोधो दुष्परिहरः । तथा च तद्वचनम्—

प्रायशो न शुभः सौम्यो ज्येष्ठश्चाषाढकस्तथा ।
मध्यमौ चैत्रवैशाखावधिकोऽन्यः सुभिक्षकृत् ॥ इति ।

अनेन हि समार्गशीर्षाणां चैत्राद्याषाढान्तानामधिकत्वे दोषः विमार्गशीर्षाणां श्रवणादिफाल्गुनान्तानामधिकत्वे शुभकृत्त्वं चोक्तम् । न त्वौत्पातिकत्वेनाधिकदोषवत्वम् । मलत्वेन दोषवत्त्वं तु सर्वमाससाधारणमिति पूर्वमभिहितमेव । किं च "घटकन्यागते" इत्यादिज्योतिःशास्त्रवचनस्य स्वीकृतमन्दोच्चानुसारेण मीनादिसिंहान्तमासेष्वेव सूर्ये स्थितेऽधिमाससम्भवेन कन्यादिष्वधिमासाभावः इत्यर्थपरस्य एकस्मिन्नब्दे मासद्वयस्य रविलङ्घने तदेकतरस्य मेषादिगतत्वे अपरस्य तुलादिगतत्वे च प्रवृत्तिः, अपरस्य कन्यागतत्वे चाप्रवृत्तिः । तथा एकस्य कन्यागतत्वेऽपरस्य मेषादिगतत्वे च प्रवृत्तिः, उभयोरपि तुलादिगतत्वेऽप्रवृत्तिः, इति कथनं न न्यायवित्सम्मतम् । माधवेनापि सामान्यस्याप्यस्य वचनस्य विशेषपरत्वं वचनान्तराद्वदता क्षयपूर्वभाविनः प्राकृतत्वं सामान्यत एवोक्तम् । एवमेव "प्राकृतस्तत्र पूर्वः स्यादिति सामान्यस्य धर्मशास्त्रवचनस्य विशेषवचनमन्तरा केवलमन्यार्थकज्योतिर्विद्वचनमाश्रित्योत्तराधिमासस्य मेषादिगतत्व एव प्रवृत्तिं वदतः साहसमेव ।

एवमेतादृशज्यौतिषस्मृतिवचनैर्यथायथं व्यवस्थाङ्गीकारेऽपि यत्र दर्शे कन्यासङ्क्रान्तिः, प्रतिपदि तुलासङ्क्रान्तिः, ततोऽमावास्यास्वेव क्रमेण वृश्चिकधनुर्मकरकुम्भमीनमेषसङ्क्रान्तयः, मेषेऽसङ्क्रान्तः, तत्र हि आश्विनो भानुलङ्घितः कार्त्तिकक्षयः वैशाखोऽधिक इति सम्मतं भवतः । तत्र यां तिथिं समनुप्राप्येति

वचनेन तुलासङ्क्रान्तेः कन्यासङ्क्रान्तितिथियोग्यत्वकल्पनं न भवतोऽपि सम्मतम् । किं तु "प्राकृतस्तत्र पूर्वः स्यादिति" वचनेन हि असङ्क्रान्तस्य ससङ्क्रान्तत्वं सम्पाद्य भानुलङ्घितत्वमिष्टम् । तत्तु केवलं हास्यास्पदं पण्डितानाम् । तेन हि असङ्क्रान्तमासद्वये पूर्वासङ्क्रान्तस्याधिकस्य सतः प्राकृतत्वं कर्मणि प्रशस्तत्वमात्रमुच्यते । न ससङ्क्रान्तत्वम् । न हि प्राकृतत्वं ससङ्क्रान्तत्वं चाभिन्नं प्रत्यक्षविरोधात् । एवं चानेन प्राकृतत्वसिद्धावपि क्षयस्याश्विनत्वमेव सिद्ध्येत् । न तु कार्त्तिकत्वम् । तस्मात्तन्मते कार्त्तिकप्रयुक्तकर्मलोपो दुष्परिहर एव । एवं यत्रामायां कन्यासङ्क्रान्तिः, असङ्क्रान्तमेकं मासमतीत्य प्रतिपदि तुलासङ्क्रान्तिः, उत्तरप्रतिपदि वृश्चिकसङ्क्रान्तिः, तद्दर्श एव धनुःसङ्क्रान्तिः, उत्तरत्र दर्शेष्वेव मेषान्ताः सङ्क्रान्तयः, प्रतिपदि वृषभसङ्क्रान्तिः, अत्रापि आश्विनस्य प्राकृतत्वसिद्धावपि मार्गशीर्षस्य क्षयात् मार्गशीर्षप्रयुक्तकार्यलोपः सुतरां दुष्परिहरस्तन्मते ।

यत्तु—"**उत्पातेन भवेद्यस्तु कालस्यातिक्रमः क्वचित् ।**
न तत्स्याद्व्यवहाराङ्गमित्याह भगवान् हरिः ॥

इति संवत्सरप्रदीपवचनेन कार्तिकादिपतिताधिमासस्यौत्पातिकत्वेन व्यवहारानुपयोगस्तस्य इति" तदपि मन्दम् । औत्पातिकत्वस्य निरस्तत्वादङ्गीकृतेऽप्यौत्पातिकत्वे फलकथनमात्रार्थत्वात्तद्वचनादत्राधिकव्यवस्थायां न तत्प्रमाणमित्युक्तमेव । इदं व्यवहाराङ्गतानिषेधपरमपि न कर्मार्हत्वबोधनाय प्रभवति । केवलमहर्गणनादौ व्यवहारानुपयोगप्रदर्शनार्थत्वात् । क्षयनिमित्तकाधिमासस्याधिक्येऽपि क्षयप्रयुक्तमासलोपेन माससंख्यायाः साम्यात् गणितागतेनैकेनैवाधिमासेनेष्टसिद्धेः व्यवहारानुपयोगोऽभिहितः । अत एव भास्कराचार्यैरधिमासद्वयस्य क्षयस्य च सम्भवमङ्गीकृत्यापि व्यवहारे अहर्गणनादावुपयोगाप्रदर्शनमुपपद्यते ।

वस्तुतस्तु क्वचिदुपयोगोऽपि सम्भवति । यथा क्षयानन्तरमुत्तराधिमासादर्वागहर्गणानयने माससंख्या एकेन न्यूना कार्या । तदुक्तं सिद्धान्त सार्वभौमे—

एवं क्षयाग्रतो यातमाससंख्या विधूनिता ।
अधिमासाग्रतो नैवं किन्तु संख्यैव केवलम् ॥
एवं विचार्य मतिमान् गणं कुर्यादसंशयम् । इति ।

मरीच्यामप्ययं पक्षः आचार्यस्य सम्मत इत्युक्तम् "न च क्षयमासस्य ग्रहगणिते प्रयोजनाभावात्प्रसङ्गतो निरूपणमपि नोचितमिति वाच्यम् । अहर्गणानयने मासग्रहे तदावश्यकत्वात् । आचार्यैः सुगमत्वेन स्वतो ज्ञेयत्वादुपेक्षितं क्षयमासकथनेनैव वा द्योतितमिति सर्वमवदातम्" इति ।

अस्तु वा ज्योतिःशास्त्रवचनेन कार्तिकादिष्वधिमासस्यौत्पातिकत्वम् । तथाऽपि प्रत्यक्षश्रुतिविरुद्धत्वात्तत्फलभूताधिमासनिषेधस्तु दुःशकः एव । तथा हि श्रुतिः–त्रयोदशं ब्राह्मणं कृत्वा तस्मिन् मृष्ट्वोदतिष्ठन् सोऽनायतन इतरानुपजीवति" इति अधिकमासमात्रस्यानियतस्थानत्वं पापसम्बन्धित्वमितरमासोपजीव्यत्वं च बोधयति । अनायतनः अनियतस्थान इत्यर्थः । तथा "त्रयोदशमासादक्रीणन् तस्मात्त्रयोदशो मासो नानुविद्यते पापो हि सोमविक्रयी" इति श्रुतिरपि अधिकमात्रस्य कर्मानर्हत्वं ब्रूते । न तु कार्तिकादिषु पतितस्यौत्पातिकत्वम् । तस्मात् विरोधाधिकरणन्यायेन श्रुत्या ज्यौतिषवचनस्य बाधो युक्तः । न च ज्योतिःशास्त्रावगतौत्पातिकत्वबलात्कार्तिकाद्यतिरिक्तमासविषयत्वं श्रुतेरिति वाच्यम् । प्रमाणाभावात्, ज्योतिर्वचनस्यान्यार्थत्वोक्तेः, अविशेषप्रवृत्तश्रुतेर्विशेषवचनमन्तरा सङ्कोचायोगाच्च । अन्यथा स्पर्शनश्रुतेरपि वेष्टनासमर्थयजमानकर्तृकप्रयोगविषयत्वसम्भवेन विरोधाधिकरणमेव दत्तजलाञ्जलि स्यात् । किं च–

कार्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।
सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः ॥

इति ज्योतिःपराशरवचनेन पूर्वस्य मलिम्लुचत्वोक्तेर्विषयसिद्ध्यर्थं व्यवस्थाऽऽवश्यकी इति कथनमपि न युक्तिसहम् । तत्र "मलिम्लुचौ" इत्यनेनोभयोरपि मलत्वोक्तेर्न यथाश्रुतार्थकं राजमार्तण्डवचनम् । किं तु "स्यादाद्यो गणितागतः" इति सिद्धान्तसार्वभौमादिसमानार्थकम् । एतच्च गणित एवोपयुज्यते । अथ वा कार्तिकादिषु यदि क्षयाधिकरूपौ मलिम्लुचौ स्यातां तदा क्षयः सर्वकर्महर एवेति नियमसम्भवेन पूर्व एव सर्वकर्महरो नोत्तर इति नियमानङ्गीकारादित्यपि सुवचम् । तस्मादस्य सार्थक्येऽभीष्टे पूर्वस्याधिमासस्य कालाधिक्येनोत्तराधिकस्य कालाधिक्यप्रयुक्तत्वाभावेन प्रवृत्तिर्वाच्या । सा च जाबालिवाक्येन बाध्यते इति वाच्यम् । अन्यथा पूर्वापरविरोधस्य शास्त्रान्तरविरोधस्य च दुष्परिहरत्वात् । पूर्वोक्तव्यवस्थायाः कल्पनामात्रमूलत्वात् । तथा "अमावास्याद्वयं यत्र" इति राजमार्तण्डवचनमपि नोक्तार्थकम् । अनेकवचनविरोधात् । किन्तु सामान्याधिकमासविषयत्वेन नेयम् । तस्मादेतादृशव्यवस्थायाः स्वकपोलकल्पितत्वमात्रेण तदुदाहृतवचनानामन्यार्थकत्वेन च ज्योतिःशास्त्रधर्मशास्त्रयोर्विरोधे धर्मशास्त्रस्यानुष्ठानैकप्रयोजनस्य प्राबल्यादेकवर्षेऽधिमासद्वये पूर्वाधिमासस्य प्राकृतत्वं जाबालिवचनात्सेत्स्यतीति जाबालिवचनस्य सामान्यस्यापि विशेषवचनाभावात् सर्वविषयता युक्ता ।

अस्तु वा तादृशवागाडम्बरेणाधिमासद्वये एकस्य भानुलङ्घितत्वमन्यस्याधिमासत्वम् । तथाऽपि धर्मानुष्ठाने न कोऽपि विशेषः । "रविणा लङ्घितो मासो ह्यनर्हः सर्वकर्मसु ।" इत्यादिवचनैर्भानुलङ्घितस्यापि सर्वकर्मानर्हत्वोक्तेरधिमासवत् भानुलङ्घितस्यापि सर्वकर्मानर्हत्वं वज्र-

लेपायितम् । तस्मादेतादृशस्थले प्राकृतत्वसिद्ध्यर्थं धर्मशास्त्रमेवाश्रयणीयम् । तच्च पूर्वमुक्तमधिकं वक्ष्यते च ।

यत्तु मतं "श्रुत्या अनायतन इत्युक्तेरधिकमात्रस्यानियतस्थानत्वेने तरमासानां नियतस्थानत्वमवगम्यते । यथा चैत्रोत्तरत्वं वैशाखस्य तदुत्तरत्वं ज्येष्ठस्येत्यादि । तथा चैत्रपूर्वत्वं फाल्गुनस्य तत्पूर्वत्वं माघस्येति । क्षयाङ्गीकारे च तन्मासपूर्वत्वस्य पूर्ममासे पूर्वमासोत्तरत्वस्य च तन्मासेऽभावेन क्रमबाधः" इति तदपि चिन्त्यम् । श्रुतिस्तावदधिकस्यानियतस्थानत्वमात्रं बोधयति । न पुनरितरस्य क्रमिकत्वमपि । तत्तु कल्प्यम् । कल्पनात्वनुभवानुरोधेनैव भवति । क्षयाभाववद्वत्सरे तु स क्रमः अवगतः । तस्य क्रमस्य क्षयवति वर्षे नैमित्तिकेन क्षयवचनेन बाधो युक्तः । आवश्यकं चैतत् क्रमबाधनम् । यथा वैशाखेऽधिके त्रिंशत्तिथ्यात्मकशुद्धचैत्रोत्तरत्वं वैशाखे, शुद्धवैशाखपूर्वत्वं वा चैत्रे बाधितम् । संसर्पस्यातिरिक्तत्वपक्षे तु क्रमबाधः स्पष्ट एव । वस्तुतस्तु क्रमावगतिरपि न प्रामाणिकी । सृष्ट्यादौ चैत्रे फाल्गुनोत्तरत्वस्य, प्रळये फाल्गुने चैत्रपूर्वत्वस्य च बाधितत्वात् । तस्माद्यथा मासावगतिस्तथैव क्रमः कल्पनीयः न तु क्रमानुरोधेन मासकल्पनमिति न्यायविदां मतम् ।

यदपि चोक्तं "क्षयमासस्य द्विमासात्मकत्वे तत्र मृतस्य कर्मण्यनध्यवसायः स्यात् किं पूर्वो मासः किं वोत्तरमास" इति । तदपि निष्प्रमाणकम् । तिथ्यर्द्धे प्रथमे इति वचनेन तिथिपूर्वार्द्धे मृतस्य पूर्वो मासः तिथ्युत्तरार्द्धे मृतस्योत्तरो मासः इति निर्णयसम्भवात् । न च इदं वाक्यं दाक्षिणात्यसङ्ग्रहकर्तुरेव न मुनेरिति तत्र नास्थेति वाच्यम् । अनार्षत्वेऽपि शिष्टपरिग्रहेण प्रामाण्योपपत्तेः । अन्यथा शिष्टाचारस्य दत्तजलाञ्जलित्वापत्तिः । न हि सर्वत्रेदानींतनानामाचाराणां स्मृतिर्मूलभूतोपलभ्यते । किं तु निबन्धकाराणां मतमेव शिष्टपरिगृहीतमित्यभ्युपगम्यते ।

सङ्ग्रहकर्त्तारोऽपि शिष्टा इति न काऽपि विप्रतिपत्तिः । यत्र प्रबलश्रुतिस्मृति विरोधस्तत्र परं सङ्ग्रहकारस्य भ्रमप्रमादादिसम्भावनया प्रामाण्यसन्देहो जायेत । अत्र तु न किमपि प्रबलं विरुद्धं वचनमुपलभामहे । उपन्यस्तवचनानामन्यार्थकत्वं प्रतिपादितम् । किं च हेमाद्र्यादिमहानिबन्धकारैरप्येवमेव व्यवस्थापितम् । अपि चास्य वचनस्याप्रामाणिकत्वेऽपि न तवेष्टसिद्धिः । अवगतक्षयस्य परित्यागे कारणाभावात् । न हि कर्माध्यवसायाभावः परित्यागे कारणं भवति । कर्मानध्यवसाये क्षयमृतस्य परं मासद्वयेऽप्युत्तरवर्षे आब्दिकादि कार्यं स्यात् । अथ वा उत्तरत्रैव कार्यं स्यात् । वस्तुतस्तु द्विजाराजोदये तिथ्यर्द्धे इति वचनं स्मृतित्वेनैवोदाहृतमिति न काऽपि विप्रतिपत्तिः ।

तथा "क्षये षष्टिदण्डात्मिकायास्तिथेः पूर्वार्द्धस्य रात्रिपातित्वे पूर्वमासीयस्याष्टकादेर्लोपः । उत्तराधिमासपाते क्षयमासीयतिथिपूर्वार्द्धमृतस्य मासदशश्राद्धानुपपत्तिरित्याद्युक्तम्" । तत्तु क्षयमासकार्याकार्यनिर्णये परिह्रियते ।

यत्तूक्तं "क्वचिदपि शास्त्रे मासद्वितयत्वानभ्युपगमेनेत्यादि" तदपि चिन्त्यम् । स्मृतिश्रुत्यादिबहुवचनोपलम्भात् । तथा हि श्रुतिः— संसर्पोऽस्यंहस्पत्याय त्वा इति । अत्रांहस्पतिशब्दः क्षयमासवाची तथैव व्याख्यातं सायनाचार्यैः "संसर्पांहस्पतिशब्दयोरर्थोऽन्यत्र दर्शितः । असङ्क्रान्तावेकवर्षे द्वौ चेत्संसर्प आदिमः । क्षयमासो द्विसङ्क्रान्तः स चांहस्पतिसंज्ञकः" इति । तथा सिद्धान्तेऽपि "द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्" इति । अत्रैकस्य मासस्य मासद्वयात्मकत्वाभावे क्षयवचनं व्यर्थम् । अत एकमासक्षयादेव तत्प्रयुक्तकार्यसिद्ध्यर्थं मासद्वयात्मकत्वमवश्यमङ्गीकार्यम् । सत्यतपोवचनेनापि मासद्वयात्मकत्वमवगम्यते—

एक एव यदा मासः सङ्क्रान्तिद्वयसंयुतः ।
मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते ॥ इति ।

तथा दीपिकाऽपि—“तत्प्राक्सङ्ख्यधिमासको यदि भवेत्तत्रत्यसांवत्सरं तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्द्वयोः कोविदः ।” इति । अत्रापि क्षयोक्त्या कार्यसिद्धर्थं मासद्वयात्मकत्वमङ्गीकार्यम् । अन्यथा तदुक्तव्यवस्थया सर्वमासकार्यसिद्धौ क्षयस्य तत्प्रयुक्तकार्यलोपस्य वा प्रसक्त्यभावेन मासद्वयगतकार्योक्तिर्व्यर्था ।

तथा—मासद्वयगतं कार्यं तत्र कुर्याद्विनिर्णयः ।
एकस्मिन् मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः ॥
तावेवपक्षौ ता एव तिथयस्त्रिंशदेव हि ।

तथा माहेश्वरः—यत्र मासि रविसङ्क्रमद्वयं तत्र मासयुगलं क्षयाह्वयम् ।
तथा—तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेऽर्द्धे तथोत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥

इत्यादिभिः स्पष्टमेव मासद्वयात्मकत्वमुक्तमिति विदुषामतिरोहितम् ।

एतेन “क्षये प्रमाणाभावः । सिद्धान्तशिरोमणेः प्राक् ज्यौतिषिकैरनुक्तेः । अत एव प्राचीने सूर्यसिद्धान्ते क्षयवार्ताऽपि न श्रूयते । यदि स्यादवश्यमुक्तं स्यादिति ” तदपि निरस्तम् । प्रमाणभूतानामनेकश्रुतिस्मृतिवचनानां प्रदर्शितत्वात् । सूर्यसिद्धान्तेऽवचनमपि ग्रहगणितेऽनुपयोगादेव न त्वभावात् । अत एव भास्कराचार्याणां स्वीयशास्त्रे उक्तस्यापि क्षयादेः कुत्राप्युपयोगाप्रदर्शनं सङ्गच्छते । द्वितीयाधिमासस्य क्षयप्रयुक्तत्वेन क्षये माससंख्याया एकन्यूनत्वे द्वितीयाधिकमासेन एकाधिकत्वे च साम्यमेव भवति ।

न माससंख्याया व्यत्यासः इति न कुत्राप्युपयोगस्तस्येति क्षयमासपरित्यागिनां गणकानामाशयः । अन्यथा सूर्यसिद्धान्ते स्पष्टाधिमासशुद्धमासयोर्लक्षणानुक्तेस्तावपि न स्त इत्यापद्येत । तस्मादस्ति क्षयोऽधिमासद्वयं चेति सिद्धम् ।

ननु १८८६ तमे शकवर्षे शोभकृद्वत्सरे दर्शे तुलासङ्क्रान्तिः प्रतिपदि वृश्चिकसङ्क्रान्तिः पुनर्दर्शेष्वेव क्रमेण धनुर्मकरकुम्भमीनसङ्क्रान्तयः मीने एवासङ्क्रान्तः अत्र कार्त्तिकोऽसङ्क्रान्तः कार्त्तिकक्षयः उत्तरत्र चैत्रोऽसङ्क्रान्तः । एतच्च नव्यदृग्गणिते । अत्र यां तिथिं समनुप्राप्येति वचनेन प्रतिपज्जातवृश्चिकसङ्क्रान्तेस्तुलासङ्क्रान्तिमत्तिथियोग्यतया वृश्चिकस्थरव्यारब्धत्वात्क्षयस्य मार्गशीर्षत्वमुचितम् पूर्वस्यासङ्क्रान्तस्य ससङ्क्रान्तत्वसम्पादनेन तुलास्थरव्यारब्धत्वात्कार्त्तिकत्वमुपपन्नम् । तस्मात्कार्त्तिकोऽसङ्क्रान्तः शुद्धो जातः क्षयो मार्गशीर्षः, तस्मात्कार्त्तिकप्रयुक्तमसङ्क्रान्ते, मार्गशीर्षप्रयुक्तं क्षये च कुर्यात् । तस्मात्कस्यापि मासस्य क्षयाभावात् कार्यलोपोऽपि न । अथवा “,कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ” इति वचनेन दर्शजातानां धनुरादिमीनान्तानां सङ्क्रान्तीनां प्रतिपद्योग्यताकल्पनया अधिकः कार्त्तिकः अधिकत्वेन क्षयः शुद्धकार्त्तिकत्वेन, पौषो मार्गशीर्षत्वेन, माघः पौषत्वेन, फाल्गुनो माघत्वेनाधिकचैत्रः फाल्गुनत्वेन, शुद्धचैत्रः चैत्रत्वेन, परिगणनीयः ततश्च कस्यापि मासस्य क्षयाभावेन तत्प्रयुक्तकार्यलोपोऽपि न । एवं च विद्यमानस्यैव कार्त्तिकादेः क्षय इति नाममात्रतया । सङ्कल्पे क्षयमासस्य तत्तन्मासत्वेनैवोल्लेखः । तथा च न कस्यापि कार्यस्य लोपः । एतदौवरेयावार्चीनदृग्गणितानुयायिनां सम्मतमपीति चेन्न । दत्तोत्तरमेतत् । कथञ्चिदुच्यमानस्य विकल्पास्याप्यष्टदोषदुष्टत्वात् । निष्प्रमाणकमासव्यवस्थाङ्गीकारेण कर्मानुष्ठानासिद्धेः । तथा हि—यदा तत्तन्मासपुरस्कारेण विहितकर्माणि तत्तन्मास एवानुष्ठीयन्ते तदैव फलं भवति नान्यथा तदुक्तं महाभारते—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ इति ।

तस्माच्छास्त्रेण यत्र यन्मासनामत्वमवगतं तत्रैव तन्मासप्रयुक्तं कर्म कुर्यादिति सिद्धम् । अन्यत्तु गतम् ।

एतेन सूर्यसिद्धान्तरीत्या दर्शे कन्यासङ्क्रान्तिः असङ्क्रान्तं मासमेकमतीत्य प्रतिपदि तुलासङ्क्रान्तिः, वृश्चिकधनुःसङ्क्रान्ती क्रमेण प्रतिपदोरेव दर्शे मकरसङ्क्रान्तिः, पुनर्दर्शेष्वेव क्रमेण कुम्भमीनसङ्क्रान्ती, मीन एवासङ्क्रान्तः । यथा शोभकृद्वर्षे—तत्राश्विनचैत्रावसङ्क्रान्तौ । अत्रापि सिद्धान्तदृग्भेदेन विभिन्नमासेषु कर्मानुष्ठानपरिहारार्थं प्रतिपज्जाततुलासङ्क्रान्तेर्दर्शयोग्यताकल्पनया अधिकाश्विनः शुद्धाश्विनत्वेन, शुद्धाश्विनः कार्तिकत्वेन, कार्तिको मार्गशीर्षत्वेन, क्षयः पौषत्वेन, अथवा कार्त्तिकान्तानां यथास्थितं स्वरूपमङ्गीकृत्य क्षयो मार्गशीर्षत्वेन, माघः पौषत्वेन, फाल्गुनो माघत्वेन, अधिकचैत्रः फाल्गुनत्वेन निजचैत्रश्चैत्रत्वेन परिगणनीयः । तेन गणितभेदेऽपि क्षयस्य वस्तुतोऽभावात् तत्तन्मास एव नवरात्रव्रतादयोऽनुष्ठेया भवन्तीति व्यवस्था निरस्ता । न हि दृग्गणिते क्षयाभाववति वत्सरे आषाढोऽधिकः सिद्धान्ते ज्येष्ठोऽधिक आसीद्यदा तदा दृग्गणितसिद्धान्तयोरैक्यार्थं अधिकज्येष्ठो निजज्येष्ठत्वेन, निजज्येष्ठ आषाढत्वेन, अथ वा अधिकज्येष्ठमधिकत्वेनाङ्गीकृत्याधिकाषाढः ज्येष्ठत्वेन परिगणनीय इति न केनाप्युक्तम् । प्रकृते शोभकृद्वत्सरे परमेवंपरिगणनवचनमाग्रहमूलकम् । तस्मात्सिद्धान्तसिद्धतिथ्यादीनाश्रित्य धर्मशास्त्रप्रवृत्तेस्तदनुसारेणानुष्ठातृभिः सिद्धान्तसिद्धतिथ्यादीन् स्वीकृत्य प्रागुक्तमासलक्षणानुरोधेन तत्तन्मासप्रयुक्तकर्माणि तत्तन्मास एव कर्तव्यानि । मासान्तरप्रयुक्तकर्माणि असति बाधके मासान्तरे

क्रियन्ते चेदनुपादेयाङ्ग (काल) वैकल्यात् कर्म फलदं न भवतीति मीमांसा-मर्यादा ।

एवं चात्र द्विसङ्क्रान्तमासस्य मासद्वयात्मकत्वस्य वचनसिद्धत्वेन मासद्वयगतं कृत्यं तत्रैव कार्यम् । वस्तुतस्तु क्षयस्य मासद्वयात्मकत्वं न वाचनिकं एक एव यदा मासः इति वचनेन मासद्वयात्मकत्वस्य निरासात् । किन्तु मासद्वयकार्यविधानमनन्यगतिमूलकम् । अत एव सत्यतपोवचनेन सामान्यतः मासद्वयगतं श्राद्धमित्यवगमेऽपि उत्तरमासलक्षणोपेतत्वेनोत्तरमासकार्यस्य मलत्वेऽपि तस्यानन्यगतिकत्वात्तत्रैव प्राप्तौ न विधेयता इत्यालोच्य हेमाद्रिकमलाकरादिभिर्मासद्वयगतं-पूर्वासङ्क्रान्तगतं क्षयगतं च श्राद्धं, मलमासे, क्षयमासे, अपिशब्दात्पूर्वासङ्क्रान्ते कार्यमित्युक्तं सङ्गच्छते ।

अत्र क्षयमासे मासद्वयगतश्राद्धविषये, स्मृत्यर्थसागरकारप्रभृतयः—‘ तिथ्यर्द्धे ” इति वचनबलात् तिथीनां प्रतिपदादीनां प्रथमार्द्धे पूर्वो मासः मार्गशीर्षपौषोभयात्मके मार्गशीर्षः प्रतिपदादीनां ‘ द्वितीयार्द्धे उत्तरः पौषो मास इति बोध्यम् । तथा षष्टिघटिकात्मकानां वृद्धिक्षयानुसारेण न्यूनाधिकानां प्रतिपदादितिथीनां पूर्वार्द्धे मार्गशीर्षेति सङ्कल्पः उत्तरार्द्धे पौष इति सङ्कल्पः । तथा च मार्गशीर्षपौषप्रतिपदादितिथिगतश्राद्धादौ अपराह्णव्यापित्वं न विचार्यम् । प्रतिपदादिपूर्वार्द्धभागे दिवा सायंकालानन्तरं पतिते वा पूर्वार्द्धभागमध्य एव मार्गशीर्षप्रतिपदादिनिमित्तं श्राद्धादिकं कार्यम् । एवं प्रतिपदाद्युत्तरार्द्धे सूर्योदये सूर्यास्तमयादनन्तरं वा पतिते प्रतिपदाद्युत्तरार्द्धभागमध्य एव पौषमासप्रतिपदादिनिमित्तं श्राद्धादिकं कार्यम् । तत्र कुतपापराह्णादिसम्भवे तत्रैव कार्यम् । न च रात्रौ श्राद्धकरणे “ न च नक्तं श्राद्धं कुर्वीत ” इति श्रुतिविरोधः अपराह्णकुतपादिकालविधायकवचनविरोधश्चेति वाच्यम् । रात्रिश्राद्धनिषेधकस्य सामान्यवचनस्य ग्रहणश्राद्धातिरिक्तविषयत्वमिव क्षयमासश्राद्धातिरिक्तविषयत्वस्य न्यायसिद्धत्वात् । तथैव

कुतपापराह्णविधायकस्य सामान्यशास्त्रत्वेन तिथिपूर्वार्द्धोत्तरार्द्धयोर्मासद्वयत्वविधायकविशेषवचनेन आहवनीयशास्त्रस्य पदशास्त्रेणेव बाधितत्वात्। एषां वचनानां क्षयमासातिरिक्तमासश्राद्धेषु चरितार्थत्वात्। ग्रस्तोदयग्रस्तास्तग्रहणादिप्राप्तपित्रादिश्राद्धवत् क्षयमासश्राद्धस्य क्षयमासनिमित्तकत्वात्। केचित्तु " तिथ्यर्द्धे प्रथमे " इतिवाक्यं क्षयमासमृतानामुत्पन्नानां च मृतोत्पन्नतिथिविषये मासनिर्णयार्थमित्याहुः। तन्न। सामान्यवाक्यस्य विशेषवाक्यं विना विशेषविषयत्वकथनस्याशक्यत्ववत्। अन्यथा "न हिंस्यात्सर्वा भूतानि" इति श्रुतेरग्नीषोमीयपशुव्यतिरिक्तविषयत्ववत् गवादिव्यतिरिक्तविषयत्वप्रसङ्गाच्च। तथा च सामान्यतस्त्रिंशत्तिथिषूक्तप्रकारेण पूर्वभागे पूर्वमासान्तर्भावात्पूर्वमासप्रयुक्तक्षयाहवर्द्धापनश्राद्धोत्सवादिकं कार्यम्, उत्तरभागे उत्तरमासप्रयुक्तमेतत्सर्वं कार्यमिति निष्कर्षः। दीपिकावचनानि उपलक्षणपरत्वेनोदाहरणपरत्वेन वा योज्यनि। तथा च कालदीपिकायामपि—

नष्टानां क्षयमासगासु तिथिषु प्रागन्त्ययोरर्द्धयो–
ग्राह्यास्तास्तिथयः क्षयाहविषये प्रागूर्ध्वमासस्थिताः ॥ इति ।

अस्यार्थः—मृतानां क्षयाहविषये वर्द्धापनादौ च क्षयमासगासु तिथिषु प्रतिपदादिषु प्रागन्त्ययोरर्द्धयोः पूर्वार्द्धे उत्तरार्द्धे च प्रागूर्ध्वमासाभ्यां स्थितास्तिथयः पूर्वमासि स्थिता उत्तरमासि स्थिताश्च ग्राह्याः ज्ञेया इति। एवं मार्गशीर्षप्रयुक्ताष्टकाश्राद्धदर्शश्राद्धादीनि मार्गशीर्षकृष्णपक्षसप्तम्यादितिथित्रयामावास्यापूर्वार्द्धभागे कृत्वा पुनः स्नात्वा पुनः पाकवैश्वदेवादिकं कृत्वा सप्तम्यादित्रयामावास्योत्तरार्द्धभागे पौषप्रयुक्तान्यष्टकामावास्याश्राद्धानि पुनः कार्याणि इत्याहुः।

शिवशङ्करप्रभृतयस्तु यद्यपि " तिथ्यर्द्धे प्रथमे " इतिवचनेन पूर्वमासप्रयुक्तं कर्म तिथिपूर्वभागे उत्तरमासप्रयुक्तं कर्म तिथ्युत्तरभागे कार्यमित्यवगम्यते। तथाऽपि न रात्रिश्राद्धप्रसङ्गः। रात्रिसायंप्रातःकालादिषु श्राद्धनिषेधकानां सामान्यरूपाणामपि वचनानामत्रापि बाधकाभावेन प्रवृत्ति

सम्भवात्। न च तिथिपूर्वार्द्धे रात्रिपाते तत्र श्राद्धे चाकृते दिवामृततिथ्यभावात्कथमनुष्ठानमिति वाच्यम्। मासपक्षतिथिस्पृष्टेत्यादिविहितप्रत्याब्दिकस्य विशेषवचनेन विशेष्याभावप्रयुक्तविशिष्टाभावादाय तिथ्यन्तरे कर्तव्यताबोधनवत् विशेषणाभावप्रयुक्तविशिष्टाभावमादाय मासान्तरेऽपि तद्बोधनात्। इदं चावश्यकम्। अन्यथा यदा अमा चतुर्विंशतिघटिका प्रतिपदष्टादशघटिका तदा प्रतिपच्छ्राद्धं मासान्तरतिथ्यन्तरसम्बन्ध्यपराह्णे न स्यात्। न चेष्टापत्तिः शिष्टैरनुष्ठीयमानत्वात्। एवं च यदा प्रतिपच्चतुर्विंशतिघटिका द्वितीयाष्टादश, तदामार्गद्वितीयाश्राद्धं पौषप्रतिपदि कुर्यात् सायंत्रिमुहूर्तव्याप्तेः सद्भावात्। यदा तु द्वितीयाऽस्तमाने प्रवृत्ता तदा त्रिमुहूर्ताभावात् पूर्ववाक्याभावात् मार्गद्वितीयाश्राद्धं पौषद्वितीयायां "त्रिमुहूर्ता न च ग्राह्या परत्र कुतपे हि सा " इतिवचनात् कर्तव्यम्। इत्येवमेव सर्वत्र योज्यम्। वर्द्धापने आदित्योदयकालिकी ग्राह्या। तदभावे युग्मादेव निर्णयः।

ननु क्षये एकस्य मुख्यत्वेनापरस्य मासस्यारोपितत्वेन च समस्ततिथेरप्युभयमासात्मकत्वेनानुष्ठानोपपत्तावीदृशव्यवस्था व्यर्थेति चेन्न। अत्र मृतजातानामागामिवर्षे मासद्वयेऽप्याब्दिकवर्द्धापनाद्यनुष्ठानापत्तेः। न च कस्याप्येतदिष्टम्। न च " तिथ्यर्द्धे प्रथमे " इति वचनेन व्यवस्था भवतीति वाच्यम्। तद्वचनस्य सामान्यरूपत्वेनात्रापि प्रवृत्तेर्बाधकाभावात्। यद्यपि कमलाकरेण क्षयजातपुरस्कारेणैवाभिहितम्। तथाऽपि माधवेन विशेषेण तदुपन्यस्य ' द्वादश मासाः संवत्सर " इति श्रुतिविरोधपरिहारस्य कृतत्वात्तदुपलक्षणम्। " एक एव यदामासः " इत्यनेन तिरस्कृतमासद्वयात्मकत्वस्य तिथ्यर्द्धे इतिवचनमन्तरा मासद्वयात्मकत्वबोधकवचनानुपलम्भात्। अनेन तु अवच्छेदकभेदेनैव मासद्वयात्मकत्वं विधीयते। विभागाविभागपक्षयोः क्वचित्फलैक्येऽपि क्वचित्फलभेदात्। तथा हि यदा पूर्वदिने प्रतिपदष्टादशघटिका परदिने द्वितीया त्रयोविंशतिघटिका तदा विभागा-

भावपक्षे मार्गद्वितीयाश्राद्धं पौषद्वितीयाश्राद्धं च पूर्वदिने कुर्यात्। कृत्स्नापराह्णव्याप्तेः। विभागपक्षे तु गतैष्ययोगेन सर्वास्तिथिघट्यः पञ्चषष्टिः, तत्र सार्द्धद्वात्रिंशद्घटिकापर्यन्तं मार्गशीर्षः, तदुत्तरं पौषः। मार्गशीर्षद्वितीयाश्राद्धं पूर्वदिने, पौषद्वितीयाश्राद्धं परदिने। एवं बहुषु स्थलेषु ज्ञेयमित्याहुः।

अन्ये तु तिथ्यर्द्धे प्रथमे इति वचनेनैवाब्दिकादिनिर्णयः, तदाऽपि न रात्रौ श्राद्धप्रसङ्गः रात्रिसायंसन्ध्याप्रातःकालानां निषेधेनापराह्णकुतपव्याप्तिमत्तिथिर्ग्रहीतव्या। तदभावे सङ्गवव्यपिनी तिथिर्ग्राह्येत्याहुः।

इतरे तु रात्रिनिषेधेन तत्राकरणेऽपि साधनद्वादशीवत्सूर्योदये कार्यमित्याहुः।

वस्तुतस्तु तिथ्यर्द्धे इति वचनस्य सर्वत्र प्रवृत्यङ्गीकारेऽपि न रात्रिश्राद्धप्रसङ्गः अनेकवचनविरोधात्। तथा हि—

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्॥

इत्यादिवचनानुसारेण कर्मकालव्यापितिथिः सर्वत्र ग्राह्येति सामान्यतोऽवगतम्। तत्रैकोद्दिष्टे मध्याह्नः कर्मकालः। तथा च हारीतः—

आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यमे।
पार्वणं त्वपराह्णे स्यात्प्रातर्वृद्धिनिमित्तकम्॥ इति।

अत्र प्रातःशब्दसाहचर्यान्मध्याह्नः पञ्चधाविभक्तदिनतृतीयभागोऽभिप्रेतः।

तथा वृद्धगौतमः—

"मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत्" इति।

तथा स्मृत्यन्तरं—

"एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्"। इति।

तथा व्यासः—एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते।
एकोद्दिष्टं तु तत्प्रोक्तं मध्याह्ने तत्प्रकीर्तितम्॥ इति।

मध्याह्नश्च पञ्चदशधाविभक्तदिनस्य सप्तमाष्टमनवममुहूर्तात्मकोऽपि भवति। ते च मुहूर्ताः गन्धर्वकुतपरोहिणसंज्ञकाः। तत्रैकोद्दिष्टस्य प्रारम्भे मध्याह्नस्य प्रथमद्वितीयभागाविच्छया विकल्पितौ। तथाऽऽह व्यासः—

कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्।
आवर्तनसमीपे वा तत्रैव नियतात्मवान्॥ इति।

समाप्तिकालोऽप्युक्तः श्लोकगौतमेन—

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत्॥ इति।

एवं च मध्याह्नस्यैकोद्दिष्टकर्मकालत्वं तत्रैव कर्तव्यत्वं चावगम्यते इति तद्व्यापिनी तिथिरेकोद्दिष्टस्येति सिद्धम्।

एवं पार्वणस्य—मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि।
प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुः॥

इति व्यासवचनेन मासपक्षतिथिस्पृष्टे यस्य मृतिर्यस्मिन्नहोरात्रेऽभूत् तस्य तं क्षयाहं विदुरित्यिर्थकेन सामान्यशास्त्रेण मृततिथौ श्राद्धस्य कर्तव्यत्वेऽवगते;

प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतेऽहनि ।
पितृव्यस्य त्वपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥

इत्यनेन ब्रह्माण्डविशेषवचनेनाह्नि कर्तव्यताऽवगता । तस्याप्यह्नः—

दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम् ।
अपराह्णे पितॄणान्तु तत्प्रदानं विशिष्यते ॥

इति शातातपवचनेन दर्शश्राद्धेऽपराह्णविधानादतिदेशेन प्राप्तापराह्णेन सङ्कोचः ।

किं च हारीतः । पार्वणं त्वपराह्णे स्यात्प्रातर्वृद्धिनिमित्तकं । वृद्धगौतमः—अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् । स्मृत्यन्तरं—पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणम् । श्रुतिः—"अपराह्णः पितॄणाम्" इति ।

मनुः—**तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ।** इति
शङ्खोऽपि **पूर्वाह्णे दैविकं कृत्यमपराह्णे पितृक्रिया ॥**

इति । अपराह्णश्च पञ्चधाविभक्तदिनचतुर्थभागः । तथा चोदाहृत प्रमाणवचनैरपराह्णस्य कर्मकालत्वं तत्रैव कर्तव्यत्वं चावगतम् ।

दिनान्ते पञ्चनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः ।
उदये च तथा पित्र्ये दैवे चैवाऽथ कर्मणि ॥

इत्यादिस्मृतिवचनैः सायाह्णस्य गौणकालत्वमप्यभ्यनुज्ञातं पार्वणे । नन्वेवं सति रात्रेरपि गौणकालत्वं स्यादिति चेन्न व्यासेन—

"स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं यथाविधि" इत्यनेन निरस्तत्वात् । ननु रात्रिनिषेधेऽपि गौणकालत्वेन प्रातःसङ्गवावपि प्राप्नुतः इति चेन्न ।

प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तमः ।
नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृतः ॥

इति शिवराघवसंवादवचनेन प्रातःकालस्य निषिद्धत्वात् । सङ्गवस्तु न साक्षान्निषिद्धः । तथाऽपि कुतपस्य मुख्योपक्रमकालत्वेन, गान्धर्वस्य गौणोपक्रमकालत्वेन तत्रैवाभिधानादर्थात्सङ्गवो निषिद्धो भवति । तथा च तद्वचनम्—

ग्रहादिव्यतिरिक्तस्य प्रक्रमे कुतपः स्मृतः ।
कुतपादथवाऽप्यर्वागासनं कुतपे भवेत् ॥ इति ।

तस्मात्पार्वणस्यापराह्णः कर्मकाल इति तद्व्यापितिथौ पार्वणं कुर्यादिति सिद्धम् ।

एवं सति तिथ्यर्द्धे इति वचनात् सामान्यत एव तिथिपूर्वार्द्धस्य पूर्वमासत्वेऽपि तिथिपूर्वार्द्धस्योत्तरार्द्धस्य वा रात्रिपाते प्रातःसङ्गवपातित्वे वा न तत्रानुष्ठानम् ; किन्तु सामान्यनिर्णयेनापराह्ण एव । ननु पदशास्त्रेण आहवनीयशास्त्रस्येव अपराह्णादिसामान्यशास्त्रस्य तिथ्यर्द्धे इति विशेषवचनेन बाध इति चेन्न । उभयोरपि सामान्यशास्त्रत्वात् । न हि तिथ्यर्द्धे इति क्षयाहे विशेषशास्त्रम्, क्षयमासस्य दैवपित्र्यादिकर्मसाधारण्येनैव तिथिविभागेन मासद्वयरूपत्वोक्तेः ।

अन्यथा—**यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।**
विद्यमानो भवेदङ्गं नोज्झितोपक्रमेण तु ॥

इति सामान्यशास्त्रेण कर्मव्यापितिथौ क्षयाहादेः कर्तव्यत्वेऽवगते अपराह्णशास्त्रेण विशेषेण अपराह्णकर्तव्यत्वोक्तेरस्यापि विशेषशास्त्रता स्यात् । तेन दैवपित्र्यादिकर्मसाधारण्येन तिथ्यर्द्धस्य पूर्वमासत्वोक्त्या "यो यस्य

विहितः ” इत्यनेन कर्मव्यापितिथौ तिथिपूर्वार्द्धे अपराह्णाभावेऽपि श्राद्धस्य कर्तव्यत्वे प्राप्ते, अपराह्णशास्त्रेण विशेषेण बाध इत्यङ्गीकार्यं भवति । नापि तिथ्यर्द्धे इति वचनस्य निरवकाशत्वेन प्राबल्यम् । क्षयमृतजातविषये सावकाशत्वात् । किं च व्याघ्रपादः—

विधिज्ञः श्रद्धयोपेतः सम्यक् पात्रनियोजकः ।
रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् ॥ इति ।

मनुः—रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ।
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥ इति ।

शातातपः—रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् ।
सूर्योदयमुहूर्ते च सन्ध्ययोरुभयोस्तथा ॥

इत्यादिवचनै रात्रेर्निषेधात् करणे दोषकथनाच्च रात्रिश्राद्धनिषेधस्य सार्वत्रिकत्वावगमात् ; ततश्चास्य विशेषवाक्यं विना सङ्कोचायोगाच्च । न च तिथ्यर्द्धे इति वाक्यं बाधकम्, भिन्नविषयत्वात् । बाध्यबाधकस्थले समानविषयत्वस्यावश्यकत्वात्, यथाऽग्नीषोमीयपश्वालम्भस्य, हिंसानिषेधस्य च । अत्र तु रात्रिश्राद्धनिषेधकमेकम् । अपरं तिथिपूर्वोत्तरार्द्धस्य विभागेन मासद्वयात्मकत्वविधायकमिति महद्वैषम्यम् । न वाऽत्र तिथिपूर्वार्द्धादेः पूर्वमासत्वबोधकवचनबलाच्छ्राद्धविधायकं वचनं कल्प्यते इति वक्तुं शक्यम् । क्षयमृतजातविषयत्वस्यापि सम्भवेन कल्पनामूलोच्छेदात् । कल्पनेऽपि क्लृप्तनिषेधस्य कल्प्येन बाधायोगाच्च । सावकाशनिरवकाशन्यायोऽप्यत्र न प्रसरतीत्युक्तमेव । अन्यथा तिथेः “ यो यस्य विहितः काल ” इति वचनेन कर्मकालव्याप्तेरावश्यकत्वेनोभयत्राप्यपराह्णाभावेऽपि अन्यत्रापि रात्र्यादौ श्राद्धप्रसङ्गः कथं वार्यते । न च रात्रिश्राद्धनिषेधकवचनबलादिति वाच्यम् । तस्यापराह्णे तिथिसद्भावेऽपि प्रवृत्तेः सामान्यरूपत्वेन कर्मकालव्याप्तिविधायकवचनेन बाधसंभवात् । अपि चोभयत्रापराह्णव्याप्त्यभावे पूर्वेद्युस्त्रिमुहूर्त-

व्यापित्वे तत्रैव कर्तव्यता शास्त्रसिद्धा । कर्मकाले तिथिसद्भावस्यावश्यकत्वे सायाह्ने श्राद्धप्रारम्भप्रसङ्गः । ननु—

उपसन्ध्यं न कुर्वीत पितृपूजां कथंचन ।
स काल आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ॥
चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ।
आसुरं तद्भवेच्छ्राद्धं दाता तु नरकं व्रजेत् ॥

इति स्कन्दयमाभ्यां निषिद्धत्वान्न तत्रारम्भः, किन्तु तिथ्यभावेऽप्यपराह्ण एव प्रारम्भ इति चेत् । न । तस्य सामान्यरूपत्वेन अपराह्णव्याप्तिस्थले चारितार्थ्यादत्र कर्मकालव्याप्तिविधायकवचनेन बाधस्य वक्तुं शक्यत्वात् । अन्यथा तिथिपूर्वार्द्धस्य पूर्वमासत्वेऽपि रात्रिपाते रात्रिश्राद्धनिषेधकवचनैरपराह्णे कर्मकालव्याप्त्यभावेऽप्यपराह्ण एवानुष्ठानमुपपद्येत । तस्मात्कर्मकालव्याप्तिविधायकवचनस्यापराह्णवाक्येन बाध इत्यकामेनाप्यङ्गीकार्यम् । तथा। सत्यत्रापि न रात्रिश्राद्धप्रसङ्गः, तिथिपूर्वार्द्धस्य रात्रिपातित्वेऽप्यपराह्णेन बाधात् । ग्रहणश्राद्धस्य ग्रहणनिमित्तकत्वेन रात्रावप्यनुष्ठानं यथा तथा क्षयमास श्राद्धस्य क्षयमासनिमित्तकत्वेन रात्रावनुष्ठानमस्तु इत्यपि न युक्तं, वैषम्यात् तथा हि—हेमाद्रौ शातातपः—

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात्सदैव हि ॥

इति । उत्तरार्द्धे पाठान्तरं—“ आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा । ” इति ग्रहणश्राद्धं आम्ना हेम्ना वा कुर्यात् नत्वन्नेन । हेमाद्रिमाधवादयोऽप्येवम् । सांवत्सरिकं तु अन्नेनैवेति नियतम्—

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमावास्यादिनियतं माससंवत्सराद्दते ॥

इति हारीतोक्तेः । ननु ग्रहणश्राद्धमप्यन्नेन—

सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥
घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत् ।

इति वायवीयोक्तेः । अपरार्केऽप्येवम् । अत एव विज्ञानेश्वरेण "ग्रहणश्राद्धे भोक्तुर्दोषो दातुस्त्वभ्युदयः" इत्युक्तं सङ्गच्छते ।

सूतके मृतके भुङ्क्ते गृहीते शशिभास्करे ।
छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत् ॥

इत्यापस्तम्बेनोक्तो दोषः श्राद्धभोक्तुरेव हस्तिच्छायासाहचर्यात् । तस्माद्ग्रहणश्राद्धमप्यन्नेनेति चेदस्तु वा सूर्यग्रहणे अन्नेन श्राद्धम् । चन्द्रग्रहे तु वचनाभावादामादिनैव । अन्नेन करणेऽपि पिण्डदानं निषिद्धम् । तथा च निर्णयसिन्धौ स्मृतिरत्नावल्यां—

पुत्रे जाते व्यतीपाते ग्रहणे चन्द्रसूर्ययोः ।
श्राद्धं कुर्यात्प्रयत्नेन पिण्डनिर्वपणादृते ॥

इत्युक्तेः पिण्डनिर्वपणाद्यभावात् जातश्राद्धादि, ग्रहणश्राद्धं च नैमित्तिकश्राद्धमिति सिद्धम् । तद्दृष्टान्तेन सांवत्सरिकंश्राद्धं निशि वदतः साहसमेव । अत एवापस्तम्बेन रात्रिश्राद्धनिषेधं वदता प्रारब्धस्यापि रात्रौ पिण्डदानं न कार्यं, किन्तु भोजनमात्रमित्युक्तं, यथा न च नक्तं श्राद्धं कुर्वीत । आरब्धे चाभोजनपरिसमापनात् । व्याख्यातमेतत् हरदत्तेन "श्राद्धकर्मण्यारब्धे कारणाद्विलम्बेन मध्ये यद्यादित्योऽस्तमियात् तदा श्राद्धशेषं नक्तं न कुर्वीत । अपरेद्युर्दिवैव कुर्वीत । आरब्धे चाभोजनमापरिसमापनादितिपाठमाश्रित्य व्याख्यातं "पूर्वेद्युर्निवेदनप्रभृति

आपिण्डदानान्मध्ये कर्तुर्भोजनप्रतिषेधः" इति । किं च रात्रिश्राद्धस्य निषिद्धस्य प्रतिप्रसवः शास्त्रान्तरैरवगम्यते । तथा च हेमाद्रौ विष्णुः—

सन्ध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि च कर्तव्यं यदि स्याद्राहुदर्शनम् ॥ इति ।

तथा च शातातपः—

रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् ।
सूर्योदयमुहूर्ते च सन्ध्ययोरुभयोस्तथा ॥ इति ।

अपि च जननग्रहणादीनामनियतनिमित्तत्वेन निमित्तसमनन्तरानुष्ठानस्य नैमित्तिके आवश्यकत्वेन रात्रावप्यनुष्ठानमभ्यनुज्ञातम् । तदुक्तं शिवराघवसंवादे—

प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तमः ।
नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृतः ॥ इति ।

तिथिपूर्वार्द्धस्य रात्रिपाते रात्रिश्राद्धनिषेधस्य व्यावर्तकं वचनं किमपि नोपलभामहे । तैर्वा नोदाहृतम् । क्षयाहश्राद्धस्य मृततिथिनिमित्तकत्वेऽपि न मृततिथिप्रवृत्त्यव्यवहितोत्तरमनुष्ठीयते । किन्तु अहनि अपराह्ण एव । एतेन क्षयमासश्राद्धस्य क्षयमासनिमित्तकत्वादिति वचनं निरस्तम् । न हि क्षयमासीयश्राद्धं क्षयमासनिमित्तकं किन्तु मृततिथिनिमित्तकम् । मृततिथिनिमित्तकं तु श्राद्धं तिथिव्याप्त्यभावेऽपि अपराह्ण एव कुर्यादित्युक्तमेव । न हि क्षयमासनिमित्तकं श्राद्धं कुत्रापि दृष्टम् । किं चापराह्णादिशास्त्रस्य क्षयमासव्यतिरिक्तविषयत्वे अपराह्णतिथिसम्भवेऽपि "अपराह्णसम्भवे तत्रैव कार्य"मितिनियमोऽपि न सिद्ध्येत् । अनेकशास्त्रवचनैः पित्र्ये तिथिप्रारम्भस्यावश्यकत्वाभिधानेन रात्रौ तिथिपूर्वार्द्धोत्तरार्द्धप्रारम्भे तदैव कुर्यात् । तद्वचनान्युदाह्रियन्ते ।

शिवरहस्यसौरपुराणयोः—

प्रातःप्रान्त उपोष्या स्यात्तिथिर्दैवफलेप्सुभिः ।
मूलं हि पितृतृप्त्यर्थं पैत्रं चोक्तं महर्षिभिः । मूलमारम्भः ।

नारदीयपुराणेऽपि—

तिथेःप्रान्तं सुराख्यं हि उपोष्यं कवयो विदुः ।
पैत्रं मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः ॥ इत्यादीनि ।

सिद्धान्ते तु तिथिमूलवचनस्यापराह्णवाक्येन बाधोऽङ्गीकृतः । ग्रस्तोदयग्रस्तास्तग्रहणादिप्राप्तक्षयाहश्राद्धस्यापि रात्रावनुष्ठानं न बहुमहानिबन्धकारसम्मतम् ; किन्तु सामान्यतः विहितग्रहणदिनीयापराह्णकाल एव । तथा-च प्रयोगपारिजाते गोभिलः—

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः ॥ इति।

अत्र दर्शरविपितृसुतशब्दाः प्रदर्शनार्थाः न्यायसाम्यात् । तेन चन्द्रग्रहेऽपि सपिण्डादिवार्षिकमन्नादिना तद्दिन एव कार्यमिति मदनपारिजाते व्याख्यातम् । पृथ्वीचन्द्रोदयेऽप्येवम् । अन्नेन सांवत्सरिकमिति वचनं ग्रहणदिनातिरिक्तविषयं पूर्वोक्तवचनादिति कमालाकरः । निर्णयामृतेऽप्येवम् । अस्तु वा प्रामाणिकवचनसद्भावे यत्र कुत्र वा अनुष्ठानम् । अत्र परं वचनाभावात्स्वेच्छाया अनुष्ठानेऽप्रयोजकत्वान्नरात्रावनुष्ठानम् । अपि चैवमनुष्ठानं बहुविरोधापत्तेरशक्यम् । तथा हि दशम्याः पूर्वार्द्धस्य पूर्वमासीयत्वे उत्तरार्द्धस्योत्तरमासीयत्वे च दशम्यामेकादश्यङ्गत्वेन—

दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥

इति देवलवचनविहितैकभक्तस्यैकस्मिन्नेव दिने द्विवारमनुष्ठानापत्तिः । ओमिति चेदेकभक्तत्वभङ्गः । तथा द्वादश्यामेकस्मिन्नेव दिने पारणद्वयं प्राप्नुयात् । पारणं विना व्रतसमाप्त्यभावात् । असमाप्तौ वैकल्यापत्तेश्च । न चेष्टापत्तिः

दिवास्वापं परान्नं च पुनर्भोजनमैथुने ।
क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत् ॥

इति स्कान्दविरोधापत्तेः । एवं चतुर्थीव्रतादिषु पूर्वार्द्धे अह्नि पतिते व्रतानुष्ठाने तत्प्रयुक्तनक्तादिलोपः । कृते च भोजनानन्तरं उत्तरार्द्धे उत्तरमासीयव्रतानुष्ठानापत्तिश्च । तथा एकमासीयप्रदोषादिव्रतलोपः सर्वथा दुष्परिहरः एवं पूर्वमासप्रयुक्तं परमासप्रयुक्तं रथोत्सवादिकं सर्वं तिथिपूर्वार्धोत्तरार्धयो रात्रिपाते रात्रावेवानुष्ठेयं स्यात् । तथा सर्वत्र तिथिप्रयुक्तैकभक्तनक्तादीनामननुष्ठानं वा भागान्तरे कृतेऽपि भोजनेऽनुष्ठानं वा प्राप्नुयात् । तस्मादेतादृशव्यवस्थाया बहुनिबन्धविरोधात् बहुशास्त्रविरोधादशक्यत्वाच्चानुपादेयतैव युक्ता ।

एवं तिथ्यर्धे इति वाक्यस्यापराह्णाद्यविरोधेन स्वीकारः इति मतमपि चिन्त्यम् । तिथिपूर्वार्धस्य सर्वस्य रात्रिपातित्वे पूर्वमासप्रयुक्तश्राद्धलोपप्रसङ्गो दुष्परिहरः । अत्र परदिने कर्तव्यत्वांशे “ परत्र कुतपे हि सा ” इति वचनं प्रमाणत्वेनोदाहृतम् । तत्वत्र प्रमाणं भवितुं नार्हत्येव । परत्र कुतपे तिथिपूर्वार्धस्याभावात् । अत्रालोपार्थं समस्ततिथेरुभयमासात्मकत्वाङ्गीकारे सर्वत्राप्यङ्गीक्रियतां किमर्धजरतीयेन । किं च पूर्वोदाहृतानेकवचनविरोधः कर्तव्यलोपश्च सम्पादितः स्यात् ।

एतेन सूर्योदये वा कार्यं साधनद्वादशीवदिति पक्षोऽपि प्रत्युक्तः सन्ध्यायाः विष्णुयमशातातपैः श्राद्धानर्हत्वोक्तेः शातातपेन स्पष्टमेव “ सूर्योदयमुहूर्ते च ” इत्यनेन निरस्तत्वाच्च । दृष्टान्ते तु यैरपि क्रियते वचनबलादेव सामान्यशास्त्रस्य सङ्कोचोऽङ्गीकृतः । तथा च विशेषवचनं मात्स्ये—

यथा भवति चाल्पाऽपि द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तथा ॥

नारदीयेऽपि–अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये ।
स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥ इति ।

एवं सङ्गवव्यापिन्यां कार्यमित्यपि निरस्तम्, प्रमाणाप्रदर्शनात्, महानिबन्धकारैरनुक्तत्वात्, पार्वणैकोद्दिष्टयोः सङ्गवानन्तरमेवारम्भविधाना-च्चार्थात्सङ्गवोऽपि निषिद्धः । पक्षद्वयेऽप्यन्ये दोषाः पूर्वमुक्ता यथासम्भव मनुसन्धेयाः ।

परमार्थतस्तु तिथ्यर्धे प्रथमे इति वचनं कर्माविशेषेण न पूर्वार्धस्य पूर्वमासत्वं उत्तरार्धस्योत्तरमासत्वं विधत्ते । अनेकवचनविरोधादपेक्षित-व्यवस्थामात्रबोधनेन कृतार्थत्वाच्च । तथा हि क्षयस्य मासद्वयात्मकत्वं न वाचनिकम् । क्षयवचनस्यैवानुपपत्तेः । यद्यपि "मेषगरविसङ्क्रान्तिः" इति ब्रह्मगुप्तवचनोक्तमासद्वयलक्षणसद्भावान्मासद्वयत्वमवगम्यते, "यत्र मासि रविसङ्क्रमद्वयं तत्र मासयुगळं क्षयाह्वयम्" "यदि न चलति वै मासयुग्मं प्रदिष्टम्" इति वचनाभ्यामपि मासद्वयात्मकत्वं प्रतीयते । तथाऽपि मेषादिस्थे सवितरीत्यादिवचनानुरोधेन उत्तरसङ्क्रान्तिस्थसूर्ये दर्शसमाप्तेरुत्तर-मासमुख्यलक्षणसद्भावात् मुख्योत्तरमासव्यवहारसम्भवेऽपि उक्तजातीयस्य पूर्वमासमुख्यलक्षणस्याभावेन मुख्यपूर्वमासव्यवहारो दुर्घट एव । अत एव सर्वैरेकमासलक्षणाभावात्क्षय इत्युच्यते । तथा एकमासनिगरणात् अंहसः पापस्य पतिरिति व्युत्पत्त्या अंहस्पतिरित्यप्युच्यते । सत्यतपसा तु स्पष्टमेव माद्वयात्मकत्वं निराकृतम् "एक एव यदा मासः" इत्यादिना । एवं च यत्रैकमासत्वेऽङ्गीकृते दोषः सम्भवति तत्र मासद्वयात्मकत्वं सम्पा-दितम् । पूर्वमासाभावात् तत्प्रयुक्तकार्यलोपः प्रसक्तस्तत्र सत्यतपःप्रभृतिभि-र्मासद्वयगतं श्राद्धं तत्रैव कार्यमित्युक्तम् । एतदर्थमेव ब्रह्मगुप्तादिभिर्मास-

द्वयात्मकत्वं लक्षणेन सम्पादितम् । न तु मुख्यमासद्वयात्मकत्वाभिप्रायेण पूर्वोक्तानेकवचनविरोधापत्तेः । तथा च क्षये पूर्वमासत्वं कार्यसिद्ध्यर्थमा-रोपितमिति फलितम् । एवं च सर्वतिथिषु सर्वावयवावच्छेदेन मुख्यमासत्वं गौणमासत्वं चाविरुद्धम् । न हि मुख्यारोपितयोर्विरोधः येन व्यवस्थाऽपेक्ष्येत । अग्निर्माणवक इत्यत्र मुख्यारोपितयोरग्नित्वमाणवकत्वयोर्न हि विरोधो दृष्टः । यत्र तु व्यवस्थाऽपेक्षिता यथा क्षये जातानां मृतानां चागामिवर्षे वर्धापनाब्दिकादौ किं पूर्वो मासः किं वोत्तरमासलक्षणसद्भावादुत्तरस्य मुख्यत्वेनोत्तर एव ग्राह्यः इति सन्देहः । तत्र तिथ्यर्धे प्रथमे इत्यनेन व्यवस्थाऽङ्गीक्रियते । अत एव यत्र "द्वादश मासाः संवत्सरः" इति श्रुतिः ससङ्क्रान्तान् द्वादशमासानधिकृत्य प्रवृत्ता । क्षयवति वर्षे तु ससङ्क्रान्ता मासा एकादशैवोपलभ्यन्ते इति श्रुतिविरोधे, तिथ्यर्धे इत्यनेन क्षयस्य मासद्वयात्मकत्वं माधवोक्तं सङ्गच्छते । एतदभिप्रायेणैव "मासाविति बुधैश्चिन्त्यौ" इत्यनेन व्यवस्थामात्रमभ्यनुज्ञातमुपपद्यते । तस्मादेतद्वचनं सर्वत्र विभागेन मासद्वयत्वबोधनेऽसमर्थमेव । दैवपित्र्यादिकर्मसु विहित-प्रातरादिकालसद्भावेन उदयास्तमयव्याप्तिमत्तिथिषु साकाल्यापादितासु तत्तन्मासविहितकर्मानुष्ठानोपपत्तेश्च विभागोऽनपेक्षित एव । न वा तिथ्यर्द्धे इत्यत्र पूर्वमासगतं कार्यं तिथिपूर्वार्दे उत्तरमासगतं तिथ्यु-त्तरार्दे कुर्यादित्युक्तम् । येन विकल्पः, सत्यतपोवचनोक्तैकमास-त्वस्य बाधो वा प्रसज्येत । तिथिपूर्वार्द्धस्य पूर्वमासीयत्वं वदता कार्यवि-धायकवचनं कल्पनीयम् । तत्तु "मासद्वयगतं कार्यं तत्र कुर्याद्विनिर्णयः" इति एकस्मिन्नेव मासे पूर्वार्द्धाद्यविभागेनैव मासद्वयकार्यं विदधता वचनेन सत्यतपोवचनेन च क्लृप्तेन कल्पनामूलोच्छेदादयुक्तम् । न चात्रापि बाधकाभावेन मासद्वयगतं कार्यं सामान्यतो विदधतो वचनस्य तिथ्यर्द्धे इति वचनेन विभागेनैव मासद्वयकार्योपपत्तेः सङ्कोच इति वाच्यम् । अनपेक्षि-तत्वात् । उत्तरवचनेन स्पष्टमेवैकमासगतपक्षद्वयस्य एकमासगतत्रिंश-

त्तिथीनां च उभयमासपक्षतिथ्यात्मकत्वस्य विभागेनैव कण्ठरवेणोक्तेर्विरोधात् । तथा च तद्वाक्यम्–

एकस्मिन् मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः ।
तावेव पक्षौ तावेव तिथयस्त्रिंशदेव हि ॥ इति ।

सौरमासे तिथ्यलाभे चान्द्रतिथिं विधाय चान्द्रे तिथिक्षये तदुत्तरमासतिथिं विदधतोऽपि स्मृतिवचनस्य सम्पूर्णाया उत्तरमासतिथेरविभागेनैवलुप्तपूर्वमासतिथिसम्बन्ध इष्ट इत्यवगम्यते । तथा च वैद्यनाथीये स्मृत्यन्तरे—

सौरे मासे तिथ्यभावे मासिकाब्दिकयोरपि ।
चान्द्रो मासो भवेद्ग्राह्यस्तस्मिंश्चान्द्रे क्षयं गते ।
तदुत्तरे मासि तिथिर्ग्राह्या पूर्वत्र नेष्यते ॥ इति ।

एतेन "एक एव यदा मासः"–इत्यनेन तिरस्कृतमासद्वयात्मकत्वस्य तिथ्यर्द्धे इति वचनमन्तरा मासद्वयात्मकत्वबोधकवचनानुपलम्भादिति" निरस्तम् । वचनोपलम्भात् । दीपिकायामपि "क्षये च वचनात्" इत्यनेन एकस्मिन्नेव मासे, क्षये पूर्वमासगतं श्राद्धं सत्यतपसो वचनादेव कार्यमित्युक्तम् । तिथिपूर्वार्द्धस्य पूर्वमासत्वे इष्टे तथैव ब्रूयात् । न तु वचनादिति । अस्यायमाशयः । मासद्वयात्मकक्षयस्य मलत्वेऽपि शुद्धमासान्तराभावेनोत्तरमासलक्षणोपेतत्वात्तन्मासप्रयुक्तश्राद्धस्य तत्रैव सम्भवेऽपि पूर्वमासलक्षणाभावात्तन्मासप्रयुक्तश्राद्धस्य तत्र कर्तव्यत्वे प्रमाणाभावेन निवृत्तिप्रसक्तौ सत्यतपोवचनादेव तन्मासप्रयुक्तं श्राद्धं क्षये कुर्यादिति । अयं च हेमाद्र्याशयानुगतः, "शुद्धमासमृतस्यापि प्रतिसंवत्सरस्य श्राद्धस्य क्षयमासे विधानादिति" कथनात् । एतेन "नष्टानां क्षयमासगासु तिथिषु प्रागन्त्ययोरर्धयोः" इति दीपिकावचनस्य विभागपरतया नेतुं नष्टानां क्षयाहविषये

क्षयमासगासु तिथिषु प्रागन्त्ययोरर्धयोरिति तात्पर्यवर्णनमपि दीपिकावचनान्तरविरुद्धत्वात् पूर्वापरग्रन्थानवलोकननिबन्धमित्युपेक्ष्यमेव । किन्तु क्षयमासगासु तिथिषु नष्टानामागामिवर्षे क्षयाहविषये तिथिपूर्वार्द्धे मृतानां पूर्वमासे विद्यमानास्तिथयो ग्राह्याः इत्यर्थः समीचीनः, ग्रन्थकर्त्राशयानुगतः, हेमाद्र्यादिसम्मतश्च । 'तिथ्यर्द्धे" इतिवचनं हेमाद्रिणा क्षयमासमृतजातपुरस्कारेणैव व्याख्यातम् । तदनुसरता कमलाकरेणाप्येवमेवोक्तम् । धर्मसिन्धौ स्पष्टमेव विभागमन्तरेणैव श्राद्धादिकं कार्यमित्युक्तम् । किं च तिथिपूर्वार्द्धादिविभागः स्मृतिकाराणामभिमतः स्यात्, एकोद्दिष्टपार्वणतिथिनिर्णये तादृशवचनमुपलभ्येत । नोपलब्धम् । तथा अपराह्णद्वयव्याप्त्यव्याप्तिपक्षौ अपराह्णव्याप्त्यभावे कुतपव्याप्तिं सिद्धवत्कृत्य निर्णयं च वदतां महानिबन्धकाराणामप्येतदिष्टमिति प्रतीयते । न च तेषां क्षयविषयज्ञानाभावः प्रमादो वा आरोपयितुं शक्यः, तैः क्षयमासस्य प्रदर्शितत्वात् । सर्वेषां प्रमादासम्भवाच्च । तस्माद्विभागमन्तरेणैव मासद्वयगतं कार्यं क्षये कुर्यादिति सिद्धम् ।

यत्तु—पूर्वमासिककर्माणि पूर्वपक्षे प्रकल्पयेत् ।
उत्तरे मासि कर्माणि कृष्णपक्षे प्रकल्पयेत् ॥
तथा—आमध्याह्नात्पूर्वमासकर्तव्यं कर्म कारयेत् ।
मध्याह्नानन्तरं कुर्यादुत्तरे मासि चोदितम् ।

इत्यादिवचनानि कैश्चिदुदाहृत्य अनुष्ठानप्रकारः प्रदर्शितः सः महानिबन्धेष्वदर्शनात्, मूलानुपलब्धेरनुष्ठानव्याकोपाच्चोपेक्ष्य एव ।

एतेन "सङ्कल्पादौ तिथिपूर्वार्द्धे पूर्वमासोल्लेखः उत्तरमासे उत्तरमासोल्लेखः" इति तदपि निरस्तम् । सर्वासां तिथीनां गौणमुख्यमासद्वयात्मकत्वस्योक्तत्वात् । पूर्वमासस्य क्षयात् मुख्यमासस्याभावेन तदुल्लेखायोगाच्च । ननु मासद्वयात्मकत्वेन मासद्वयप्रयुक्तकार्यस्य तत्रैव

कर्तव्यत्वान्मासद्वयोल्लेखः, तत्तन्मासप्रयुक्तकार्ये तत्तन्मासस्योल्लेखः इति वाञ्छ कार्यमिति चेन्न । प्रमाणाभावात् । शास्त्रविरुद्धत्वाच्च । पूर्वमासाभावेन तन्मासप्रयुक्तकार्यलोपे प्रसक्ते अनन्यगतिकत्वेन मासद्वयोदितकर्मणस्त विधायकवचनोपलम्भेऽपि अविद्यमानस्य मासस्योल्लेखप्रापकप्रमाणाभावात् । अन्यथा आशौचाद्यन्तरितकर्मणो मासान्तरे आशौचानन्तरदिने वा क्रियमाण कर्मप्रयोजकमासोल्लेखप्रसङ्गः । वर्तमानमासानुल्लेखप्रसङ्गः । मासद्वयो ल्लेखप्रसङ्गो वा । क्रियते तु शिष्टैर्विद्यमानस्यैव मासस्योल्लेखः । न च कर्मप्रयोजकमासानुल्लेखे —

अतः संवत्सरश्राद्धं कर्तव्यं मासचिह्नितम् ।
उल्लेखनमकुर्वाणो न तस्य फलभाग् भवेत् ॥

इत्यनेन विरोध इति वाच्यम् । अस्य विद्यमानस्यैव मासस्योल्लेख- विधायकत्वेन चारितार्थ्येऽविद्यमानमासोल्लेखप्रापकत्वाभावात् । वस्तुतस्तु विद्यमानमासोल्लेखानन्तरं पूर्वमासप्रयुक्तं कर्म करिष्ये । यथा मार्गशीर्षक्षये पौषमासादिकीर्तनानन्तरं मार्गशीर्षप्रयुक्तं कर्म करिष्ये इति सङ्कल्पः यदि कर्म मार्गशीर्षप्रयुक्तं स्यात् । पौषप्रयुक्तकर्मणि यथास्थितमेवेति क्रमः समुचितः। किं च मासद्वयस्य साम्येनोल्लेखोऽपि शास्त्रविरुद्धः । "एक एव यदा-मास" "एकस्मिन् मासि" "एकोऽपि द्व्यात्मको भवेत्" इत्यादिवचनैरेकमास- त्वोक्तेः, पूर्वमासलक्षणाभावेनोत्तरमासोल्लेखस्य न्यायसिद्धत्वाच्च । अलं पर- दोषप्रकाशनेन । प्रकृतमनुसरामः ॥

उक्तार्थसङ्ग्रहः

संवत्सरशब्दश्चैत्रादिफाल्गुनान्तमासावच्छिन्ने कालविशेषे मुख्यः । इतरत्र गौणः । मासशब्दोऽपि चैत्रादिचान्द्रमासेषु मुख्यः । इतरत्र गौणः । मासोऽपि द्विविधः । शुद्धो मलश्चेति । शुद्धस्तु मेषादि-

ङ्क्रान्तिमत्त्वे सति दर्शसमाप्यः । मलोऽपि द्विविधः । अधिकः क्षयश्चेति । सङ्क्रान्तः पूर्वोक्तमासः अधिकः । अधिकस्तु मलः मलिम्लुचः संसर्पः सङ्क्रान्तः भानुलङ्घितः नपुंसक इत्यादि पदव्यपदेश्यो भवति । सङ्क्रान्तिद्वय- युक्तः पूर्वोक्तो मासः क्षयः । क्षयोऽपि द्विसङ्क्रान्तः मलः अंहस्पतिः शून्यः इत्यादिपदव्यपदेश्यः । क्षयमासवति वत्सरे संसर्पशब्दः क्षयमासपूर्वभाव्य- धिके रूढः । अतस्तस्मिन् वत्सरे क्षयोत्तराधिके स न प्रयोज्यः । एतादृश- वर्षमध्य एवाधिमासद्वये क्षयपूर्वभाव्यधिकः प्राकृतो भवति । तेन कर्मानर्हत्व- प्रयोजकमलत्वं निवर्तते । तस्मात् मलिम्लुचनपुंसकमलादिपदव्यपदेश्यो न भवति । क्षयाव्यवहितपूर्ववृत्त्यसङ्क्रान्तस्तु सदा प्राकृतो भवति । तदा वर्षमध्ये इति नापेक्षितम् । तत्र क्षये द्विसङ्क्रान्ते उत्तरमासो मुख्यः । पूर्वमासस्त्वारोपितः । तस्मात्सङ्कल्पादौ न पूर्वमासोल्लेखः । न वा मास- द्वयोल्लेखः । किन्तु मार्गशीर्षमासीयकर्मानुष्ठाने, क्षये पौषमासेऽमुकतिथौ मार्गशीर्षामुकतिथिप्रयुक्तं कर्म करिष्ये इति सङ्कल्पे विशेषो भवति । पौष- प्रयुक्तकर्मानुष्ठाने तु यथास्थितमेवेति दिक् ॥

॥ इति क्षयमासमीमांसायां शास्त्रार्थविवेकाख्यः पूर्वः पटलः समाप्तः ॥

— — —

अथ कार्याकार्यविवेकाख्य उत्तरः पटलः

एवं शास्त्रार्थविचारे विशेषतः समापिते विशेषतः कार्याकार्यविवेकः क्रियते । तत्रादावधिमासकार्याकार्यविवेकः प्रदर्श्यते । तत्र पैठीनसिः—

श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः ।
तस्मात्त्रयोदशे मासि निष्फलास्ताः प्रकीर्तिताः ॥ इति ।

अत्र सर्वा इत्यनेन सर्वकर्मनिवृत्तिप्रतीतावपि काम्यानामेव नि[illegible] तु नित्यनैमित्तिकानाम् ।

" इष्टयादि सर्वं काम्यं तु मलमासे विवर्जयेत् "
" नित्यनैमित्तिके कुर्यात् प्रयतः सन् मलिम्लुचे "

इत्यादिविशेषवचनेभ्यस्तथा प्रतीतेः । नित्यनैमित्तिकानामप्यन[illegible] गतिकानामेवानुष्ठानम् । न सगतिकानाम् । तथा च गृह्यपरिशि[illegible]—

मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियाम् । इति ।

तेन दर्शपूर्णमासादीनां प्रथमारम्भो ज्योतिष्टोमादिश्च न भवती[illegible] सिद्धम् । काम्यान्यपि यानि शेषविरोधाद्विलम्बं न सहन्ते यथा कारी[illegible] दीनि तानि मलमासेऽपि भवन्त्येव—

नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्याणि न कालस्तु विधीयते ॥ इति दक्षवचनात् ।

शुद्धकाम्यानामप्यारम्भसमाप्त्योरेव वर्जनम्—

असूर्या नाम ये मासा न तेषु मम सम्मताः ।
व्रतानां चैव यज्ञानामारम्भश्च समापनम् ॥

इति ब्रह्मसिद्धान्तात् । काम्यानुवृत्तिस्तु मले भवत्येव " प्रार[illegible] कर्म यत् किञ्चित् तत् कार्यं स्यान्मलिम्लुचे " इति तत्रैवोक्तेः । ते[illegible] काम्यचातुर्मास्यव्रतोपक्रमसमाप्तिकालयोर्मध्येऽधिमासपाते तत्र तस्याविच्छेदे[illegible] नानुष्ठानं भवति । " अधिमासनिपातेऽपि ह्येष एव विधिःस्मृतः " इतिवचनात् । यत्तु—

प्रवृत्तं मलमासात् प्राक् यत्काम्यमसमापितम् ।
आगते मलमासेऽपि तत्समाप्यमसंशयम् ॥

इति काठकगृह्ये मलमासेऽपि काम्यकर्मणः समाप्तिविधानम्, तत् [illegible]वनमानोपजीविकृच्छ्रचान्द्रायणाहीनसत्रादिविषयम् । कालमाधवीयेऽप्ये-[illegible]म् । हेमाद्रिस्तु " प्रारम्भमात्रं काम्यकर्मणो मलमासे निषिद्धम् । [illegible]मासिस्तु तस्य मलमासेऽपि कर्तव्यैव प्रागुदाहृतकाठकवचनात् । यस्तु [illegible]सिद्धान्तवचने समाप्तिनिषेधः स मलमास एव मोहात्प्रारब्धस्य तस्य [illegible]त्रैव समापने दोषातिशयप्रदर्शनार्थमित्याह ।

[illegible]था चूडाकरणादिसंस्कारान् मले वर्जयेत्—

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।
माङ्गल्यमभिषेकं च मलमासे विवर्जयेत् ॥

इति ज्योतिःपराशरवचनात् । तदेवं कार्याकार्याणि सङ्गृह्योदाजहार [illegible]कालादर्शकारः—

द्वादशाहसपिण्डान्तं कर्म ग्रहणजन्मनोः ।
सीमन्ते पुंसवे श्राद्धं द्वावेतौ जातकर्म च ॥
रोगे शान्तिरलभ्ये च योगे श्राद्धं व्रतानि च ।
प्रायश्चित्तं निमित्तस्य वशात् पूर्वे परत्र वा ॥
अब्दोदकुम्भमन्वादिमहालययुगादिषु ।
श्राद्धं, दर्शेष्वहरहः श्राद्धमूनादिमासिकम् ॥
मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकम् ।
श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ॥
मन्वादिषु च यद्दानं दानं दैनंदिनं च यत् ।
तिलगोभूहिरण्यानां सन्ध्योपासनयोः क्रिया ॥
पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः ।
नित्याग्निहोत्रहोमश्च देवतातिथिपूजनम् ॥
स्नानं च स्नानविधिना अभक्ष्यापेयवर्जनम् ।
तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च ॥

अनेन ग्रन्थेन मले कर्तव्यसङ्ग्रहः कृतः। अत्र महालयपदेन न कन्यास्थरविविहितमहालयश्राद्धं विवक्षितम् निषेधात्; किं तु महालयतीर्थश्राद्धं ग्राह्यम्। एवमेव माधवमित्रमिश्रप्रभृतय ऊचुः। आब्दिकं-प्रथमाब्दिकमित्यर्थः।

तथा मले मृतानां यदाकदाचित् स एव मासो मलो भवति तदा प्रत्याब्दिकमपि तत्रैव —

वर्षे वर्षे च यच्छ्राद्धं मृताहे तन्मलिम्लुचे।
कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र तु॥

इति शातातपवचनात्। तथा कालादर्शे —

अनित्यमनिमित्तं च दानं च महदादिकम्।
अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणम्॥
देवारामतटागादिप्रतिष्ठा मौञ्जिबन्धनम्।
आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः॥
राजाभिषेकः प्रथमश्चूडाकर्म व्रतानि च।
अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम्।
स्नानं विवाहो नामानि तथाऽऽपन्नं महोत्सवम्।
व्रतारम्भं समाप्तिं च काम्यं कर्म च पाप्मनः॥
प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत्।

इत्यनेन ग्रन्थेन मले वर्ज्यसङ्ग्रहः कृतः।

तथा तत्रैव —

उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।
अवरोहश्च हैमन्तः सर्पाणां बलिरष्टकाः॥
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्।

दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः॥
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम्। इति।

अनेन ग्रन्थेन मलमासे वार्जितानां सतां शुद्धमासे अवश्यकर्तव्यत्वेन सङ्ग्रहः कृतः। एतेन मले प्रथमाब्दिकं कुर्यान्न शुद्धे। मलमासमृतानां कदाचित् प्रत्याब्दिकं मले न शुद्धे। नाप्युभयोः। शुद्धमासमृतानां प्रत्याब्दिकं शुद्ध एव नोभयोरिति सिद्धम्। तथाऽपि निर्णयामृतवैद्यनाथीयादिपर्यालोचनया मलेऽपि क्षयदिनस्य वन्ध्यत्वनिरासार्थं ब्राह्मणभोजनं कार्यमित्यवगम्यते। तथा च निर्णयामृते "कालादर्शकारैस्तु प्रत्याब्दिकं मासद्वये कर्तव्यमित्युक्तम्। ततश्च वृद्धाचारपूर्वत्वात् मलमासेऽपि क्षयदिनस्य वन्ध्यत्वनिरासार्थं पित्रुद्देशेन ब्राह्मणान् भोजयित्वा शुद्धमासे श्राद्धं कुर्यादित्येवानवद्यम्" इति। एतत्पक्षाश्रयणे मलमासमृतानां प्रत्याब्दिकं यदा कदाचित् मले क्रियते तदा शुद्धेऽपि क्षयदिनावन्ध्यत्वार्थं ब्राह्मणभोजनादिकं कुर्यादित्यवगम्यते। अनेनैव न्यायेन यदा प्रथमाब्दिकं मले भवति तदा शुद्धेऽप्याब्दिकं न भवति। कृते तस्य प्रथमाब्दिकत्वाभावात्। तथाऽपि क्षयदिनावन्ध्यत्वार्थं ब्राह्मणान् भोजयेदिति सुवचमिति भाति। अत्र सर्वत्र साक्षिवचनानि हेमाद्रिमाधवादिकृतग्रन्थेभ्यो ज्ञेयानि। अयमेव वर्ज्यावर्ज्यविवेकः क्षयमासवद्वर्षवृत्तिसंसर्पाधिमासयोर्ज्ञेयः। यदा पुनः पूर्वः संसर्पः प्राकृतो भवति तत्र कथमिति महान् संशयः। यद्यपि शोभकृद्वत्सरे पूर्वः संसर्पः प्राकृतो न भवति। तथाऽपि एतत्क्षयोत्तरं एकोनविंशतिवर्षेभ्य ऊर्ध्वं पञ्चाधिकैकोनविंशतिशततमे (१९०५) शके पौषक्षयः सम्भावितः तत्राश्विनफाल्गुनावसङ्क्रान्ताविति सम्भावितौ। तत्र पूर्वोक्तरीत्याऽऽश्विनः प्राकृतो भवति। सन्देहबीजन्तु "प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः" इति वचनेन प्राकृतत्वविधानात्सर्वकर्मार्हताऽवगम्यते इति अधिमासकार्याकार्य-

निर्णयोऽत्र न प्रसरतीति ज्ञायते। माधवाभिप्रायोऽप्येवमिति तद्ग्रन्थ-पर्यालोचनया भाति। तथाऽपि हेमाद्र्यादिभिः प्राकृतत्वे उक्तेऽपि तत्प्रयुक्तं कार्यं कुर्यादिति नोक्तम्। न वा प्राकृते कार्यविधायकविशेष-वचनमुपलभ्यते। सामान्यशास्त्रपर्यालोचनया रविलङ्घितत्वेनोक्तकर्मानर्हता प्रतीयते इति। अतो विचार्यते। प्राकृतेऽपि प्राप्तं कर्म द्विविधम्। दैवं पित्र्यं चेति। उभे अपि मासप्रयुक्ताप्रयुक्तभेदेन द्विविधे। मासपुरस्कारेण विहितं दैवं वरसिद्धिविनायकनवरात्रादिकम्। महालयादिकं मासपुरस्कारेण विहितं पित्र्यम्। मासाप्रयुक्तं दैवं पित्र्यं च नित्यनैमित्तिककाम्यभेदेन बहुविधम्। अग्निहोत्राधानकाम्येष्टिप्रभृति दैवं, नित्यश्राद्धपार्वणश्राद्धादि पित्र्यम्।

अत्र स्मृतिसागरकृदादयः—"अत्रायं विशेषः। प्राकृतस्तत्र पूर्वः स्वात्— । अस्यार्थः। तत्र–तयोरधिकमासयोर्मध्ये पूर्वाधिमासः प्राकृतः। मलिम्लुच इति। तथा च "इष्ट्यादिसर्वं काम्यं तु मलमासे विवर्जयेत्" इत्युक्तनिषेधः पूर्वाधिमासे नास्ति। अधिमासात्पूर्वमासोक्तकर्मसमाप्तिस्तु पूर्वाधिमासे न, किं तु निजमास एव। निजमासस्य मुख्यत्वात्। पूर्वस्याधिमासत्वेन गौणत्वात्। अनेन न्यायेनोत्तरमासोक्तकर्मारम्भोऽपि निजमास एव। तथा च यस्मिन् वर्षे आश्वयुजोऽधिमासः चैत्रश्चाधिमासः, तत्र चैत्रस्य मलिम्लुचत्वेन अधिकाश्वयुजस्य मलमासत्वेन इष्ट्यादिकाम्य-कर्माद्यर्हत्वेऽपि मुख्याश्वयुजत्वाभावेन भाद्रपदशुक्लैकादश्यारब्धदुग्धव्रत-समाप्त्ययोग्यत्वेन दुग्धव्रतसमाप्तिस्तु निजाश्वयुजशुक्लैकादश्यामेव कार्या। एवं तत्रैव द्विदलव्रतारम्भं कुर्यात्। एवं कार्त्तिकस्नाननवरात्रविजयदशमी-दीपावल्यादिकमपि निजमास एव" इत्याहुः।

अत्र सिद्धान्तो मनोहरः युक्तिस्तु न न्याय्या। तथा हि। "इदमेव संसर्पत्वं प्रकृतकर्मण्यस्य मासस्य संसर्पणात् गमनात् तत्कर्मकरणार्हत्वादिति"

इति विवरणस्य "अधिमासात् पूर्वमासोक्तकर्मसमाप्तिस्तु पूर्वाधिमासे न" इति विवरणस्य च परस्परं विरोधात्। "तथा न मलिम्लुचः" इति वचनस्य, "अधिकाश्वयुजस्य मलमासत्वेन" इत्यस्य च विरोधात् "मलमासे विवर्जयेदित्युक्तनिषेधः पूर्वमासे नास्ति" इत्यस्य, "मलमासत्वेन इष्ट्यादिकाम्यकर्माद्यर्हत्वेऽपि" इत्यनेन च विरोधाच्च। किं च काम्यकर्मण एवार्हत्वे किमु वक्तव्यं काम्येकर्मोपक्रमसमाप्त्यर्हत्वविषये। चातुर्मास्यस्य नित्यत्वे तु सुतरां तदर्हत्वं प्राकृतस्य। तथा च उक्तन्यायेन दुग्धव्रत-समाप्तिः द्विदलव्रतारम्भश्च शुद्धे इति नियमो न सिद्ध्येत्। अलं परदोषा-विष्कारेण।

शिवशङ्करस्तु "तत्र प्राकृते तदुत्तरस्मिन् शुद्धे च मासे आब्दिक-नवरात्रादिकं चावृत्याऽनुष्ठेयम्। न तु सकृत्करणेन शास्त्रस्य कृतार्थत्वादिति न्यायेन सकृत् करणम्। "मासपक्षतिथिस्पृष्टे" इत्यादिनोक्तनिमित्तस्य प्राकृतेऽपि विद्यमानत्वेन असति प्रतिबन्धके प्रतियोगिव्यधिकरणतदनुष्ठाना-भावस्य प्रत्यवायप्रयोजकत्वावगमात्, अहरहः सन्ध्यामुपासीतेतिवदावृत्ते-र्न्याय्यत्वात्। न चाश्विनत्वपुरस्कारेण विहितानामुत्तरत्र काम्यतुलादाना-दीनां तु प्राकृते इति वैचित्र्यं जातिदैशिकोपदेशिककृतं वक्तुं शक्यम्। तस्य मलत्वे काम्यं कर्म न किञ्चनेति वचनबलात् काम्यतुलादीनामुत्तरे शुद्ध एव कर्तव्यता स्यात्। उक्तन्यायेनोत्तरत्रैवानुष्ठाने प्राकृतत्वस्य वैयर्थ्यापत्त्या विनिगमनाविरहस्योभयत्र तुल्यत्वादाश्विनत्वपुरस्कारेण विहितानां प्राकृते शुद्धे चावृत्त्याऽनुष्ठानं युक्तम्। काम्यतुलादानादेस्तु सकृदनुष्ठानेन कामनासिद्धेरुत्तरत्रैवानुष्ठानं युक्तम्। प्राकृतत्वं तु ज्ञापकसिद्धाश्विनत्वादि-पुरस्कारेण विहितकार्यसम्पादनेन कृतार्थमिति भाति" इत्याह।

मम तु प्रतिभाति —प्राकृतत्वसमाख्यामात्रेण सर्वकर्मार्हत्वेऽङ्गीकृते "आद्यो मलिम्लुचो ज्ञेयः" "रविणा लङ्घितो मासो ह्यनर्हः सर्वकर्मसु"

" मलिम्लुचं विजानीयात् सर्वकर्मसु गर्हितम् " " तद्धि मासत्रयं शुभं सर्वेषु शुभकर्मसु " " मासत्रयं त्याज्यमिदं प्रयत्नात् " इत्यादिवचनैः स्वगतकर्मानर्हत्वभङ्गप्रसङ्गः । नचैषां सामान्यानां विशेषेण बाधः इति वाच्यम् । वाक्यापेक्षया समाख्याया दुर्बलत्वेन बाधायोगात् । न च निरवकाशत्वेन समाख्यायाः प्राबल्यमिति वाच्यम् । सत्यतपःप्रभृतिप्रोक्तश्राद्धाद्यर्हत्वेन सावकाशत्वात् । किं च सामान्यवाक्यप्राप्तकर्मानर्हत्वस्य समाख्यया कर्मार्हत्वप्रसक्तौ " संसर्पांहस्पती मासावधिमासश्च निन्दिताः " इत्यनेन कर्मानर्हत्वमेव प्रतिप्रसूतं भवति । समाख्यायाः पुरोडाशचतुर्द्धाकरणन्यायेन सत्यतपोवचनेनोपसंहारस्य युक्तत्वात् । ननु " निन्दिता- " इति कर्मसामान्यविषये त्रयाणां निन्दितत्ववचनस्य—

" यद्वर्षमध्येऽधिकमासयुग्मं तत्कार्त्तिकादित्रितये क्षयाख्यम्
मासत्रयं त्याज्यमिदं प्रयत्नाद्विवाहयज्ञोत्सवमङ्गलेषु "

इत्यादिवाक्यविहितशुभकर्मविषयत्वं युक्तम् । हेमाद्रेरेतदिष्टम् । माधवेनापि असङ्क्रान्तमासे निषेधवाक्यानां प्राकृतत्ववचनेनापवादमङ्गीकृत्यान्ते निन्दिताः इति वचनस्य विषयप्रदर्शनार्थं " एते त्रयोऽपि ज्योतिःशास्त्रप्रसिद्धे विवाहादौ निन्दिताः " इत्युक्तेस्तस्यापि सम्मतमिति चेन्न । भिन्नोद्देश्यकत्वात्, सङ्कोचस्यानपेक्षितत्वाच्च । एकवर्षीयोक्तविधमासत्रयविषयत्वमेकस्य ; अपरस्य विभिन्नवत्सरीयोक्तविधमासत्रयविषयत्वम् । अन्यथा विभिन्नवत्सरवर्त्यधिमासस्थले संसर्पांहस्पतिमासद्वयस्य मलत्वेन सर्वकर्मानर्हत्वबोधकवचनानामप्रामाण्यापत्तिर्दुर्वारा । हेमाद्रिमाधवयोरप्युपन्यस्तप्रमाणान्तराविरोधसम्पत्तये एकवत्सरवर्त्तिमासत्रये विवाहादिकर्मानर्हत्वबोधने तात्पर्यं वाच्यम् । अधिकं शास्त्रार्थविवेके द्रष्टव्यम् । यत्तु ज्योतिःशास्त्रप्रसिद्धे विवाहादाविति माधवोक्तिस्तत्राप्यादिपदेन श्राद्धाद्यतिरिक्तसर्वकर्मसङ्ग्रहः सम्मतः इत्यवश्यमङ्गीकार्यम् । न हि यज्ञः ज्योतिःशास्त्र-

प्रसिद्धः, येन विवाहादिमङ्गलकार्यस्य ज्योतिःशास्त्रप्रसिद्धस्यैव ग्रहणं स्यात्, तन्मूलभूतवचने " विवाहयज्ञोत्सवमङ्गलेषु " इति यज्ञस्यापि ग्रहणात् । तस्मात् ज्योतिःशास्त्रप्रसिद्ध इति विवाह एव सम्बध्यते । अथवा सर्वेषामपि कर्मणां कालो ज्योतिःशास्त्रेणाभिधीयते इति सर्वोऽप्ययस्तु ज्योतिःशास्त्रप्रसिद्धः । तस्मात् प्राकृते श्राद्धाद्यतिरिक्तं सर्वं वर्ज्यमिति प्रत्येतव्यम् । " विवाहयज्ञोत्सवमङ्गलेषु " इत्यनेनाप्ययमेवार्थः सिद्ध्यति । तथा हि विवाहपदेन संस्कारा उक्ताः । यज्ञपदेन सोमयागादयः प्रोक्ताः । उत्सवपदेन कार्त्तिकोत्सवदीपोत्सवरथोत्सवविनायकव्रतनवरात्रादयोऽभिहिताः । मङ्गलपदेनाशुभेतरत् सर्वं नीराजनादिकमिष्टमित्यङ्गीकार्यम् । अन्यथा विवाहपदं उत्सवपदं च व्यर्थं स्यात् ; यज्ञमङ्गलपदाभ्यामेवेष्टसिद्धेः । तस्मात्प्राकृतपदेन श्राद्धादिकर्मार्हत्वमुक्तमित्यस्येदं वचनं न विरुद्धम् । हेमाद्रिणाऽपि मासत्रयस्य दुष्टत्वप्रतिपादकवचनस्य विवाहादिशुभकर्मविषयत्वमिति वदताऽनुमोदितमेवैतत् । वीरमित्रोदयेऽप्येवमेवोक्तम्—इदं च संसर्पस्य शुद्धत्वप्रतिपादनं विवाहादिव्यतिरिक्तक्षयाहादिश्राद्धादिविषयम्, यद्वर्षमध्ये इति ज्योतिःशास्त्रवचनात् " इति ।

किं च प्राकृतत्वमपि न शुद्धत्वं ब्रूते, असङ्क्रान्तत्वेन प्रत्यक्षविरोधात् । किं तु सांवत्सरिकाद्यर्हतया शुद्धतुल्यत्वं ब्रूते इत्युक्तम् । न हि सादृश्यवचनमात्रेण शुद्धवृत्तिधर्माः सर्वेऽतिदेष्टुं शक्याः । किं तु अतिदेशार्हा योग्याश्च । ते च क्षयव्यवहिताव्यवहितपूर्ववृत्तिप्राकृतयोर्विभिन्ना एव । तथा च क्षयव्यवहितपूर्ववृत्तिप्राकृते तत्तन्मासप्रयुक्तं दैवं कर्म न कुर्यात् । भानुलङ्घितत्वेन प्राप्तकर्मानर्हत्वस्यात्रापि प्रवृत्तेर्बाधकाभावात् । अनन्यगतिकं नित्यं नैमित्तिकमावश्यकं च काम्यमनुतिष्ठेदेव । तत्तन्मासप्रयुक्तं पूर्वमासे प्रारब्धं समापयेद्वा । तत्तन्मासप्रयुक्तं तु शुद्धस्य मासान्तरस्य विद्यमानत्वेन शुद्ध एव कुर्यात्, न प्राकृते । आतिदेशिकशुद्धत्वापेक्षया औपदेशिकशुद्धत्वस्य प्राबल्यात् । तेन नवरात्रादिकं शुद्धे प्राकृते चावर्तयेदिति मतं

प्रत्युक्तम् । सकृत् कृते च कृतः शास्त्रार्थः इति न्यायेन शुद्धेऽनुष्ठानादेव शास्त्रार्थसिद्धेः । न हि अङ्गभूतकालानुरोधेन प्रधानस्यावृत्तिर्न्यायवित्सम्मता । न चाश्विनत्वादिपुरस्कारेण विहितानां नवरात्रादीनां प्राकृतेऽपि शुद्धतुल्यस्याप्याश्विनत्वस्य विद्यमानत्वेनानुष्ठानं युक्तमिति वाच्यम् । एकत्रानुष्ठानेनैव शास्त्रार्थोपपत्तेरुभयत्रानुष्ठाने प्रमाणाभावात् । अन्यथा " वसन्ते वसन्ते ज्योतिषा यजेत् " इति वाक्यविहितज्योतिष्टोमस्य चैत्रवैशाखयोरुभयत्रानुष्ठानापत्तिर्दुर्वारा । न च कस्याप्येतदिष्टम् । न वा " अहरहः सन्ध्यामुपासीत " इत्यादाविव व्रतादिविधायकवाक्येष्वेकस्मिन् वर्षे आवृत्तिरुक्ता । किन्तु प्रतिवर्षं कर्तव्यत्वेन श्रूयते । यथा अनन्तव्रतस्य प्रतिवर्षं भाद्रपदे क्रियमाणस्य चतुर्दशवर्षेषु चतुर्दशवारमावृत्तौ सत्यां तत्समाप्तिरूपव्रतोद्यापनं तत्कल्पादवगम्यते । एवमन्यव्रतविधायकवाक्येषु द्रष्टव्यम् ।

ननु तथाऽपि प्रथमातिक्रमे कारणाभावाच्छुद्धतुल्येऽप्याश्विने एव नवरात्रादिकमनुष्ठीयतामिति चेत् । सत्यम् ; तथाऽपि तत्र शुद्धत्वस्यातिदेशिकतया मुख्ये शुद्धे सम्भवति प्राकृतेऽनुष्ठानस्यायुक्तत्वात् " विवाहयज्ञोत्सवमङ्गलेषु " इति वचनेन प्राकृते उत्सवस्य निषेधाच्च । तथा च भाद्रपदे प्राकृते सति शुद्ध एव गौरीविनायकव्रतादिकं, न प्राकृते । आश्विने प्राकृतेऽपि नवरात्रदीपोत्सवनरकचतुर्दश्यादिकं शुद्ध एव न प्राकृते इति सिद्धम् । यदा तु क्षयाव्यवहितपूर्ववृत्तिः प्राकृतो भवति यथाऽष्टाधिकद्विसहस्रवर्षपरिमिते (२००८) शके कार्त्तिकः प्राकृतः कार्त्तिकक्षयः फाल्गुनः अधिकः इति सम्भावितः ; तदा कार्त्तिकप्रयुक्तं सर्वं नित्यं नैमित्तिकमावश्यकं च काम्यं तत्रैव कुर्यात् । न तु क्षयकार्त्तिके तस्य मलत्वेन कर्मानर्हत्वात् । न च " मासद्वयोदितं कर्म तत्र कुर्याद्विनिर्णयः " इति वचनेन कार्त्तिकप्रयुक्तमपि क्षये कुर्यादिति वाच्यम् । तस्यानन्यगतिकत्वात् अत्र तु शुद्धतुल्यस्यापि मासान्तरस्य विद्यमानत्वेनानन्यगतिकत्वाभावात् । अन्यथा

[…]ली पूर्वापरौ दुष्टौ परपूर्वौ शुभावहौ " इत्यव्यवहितपूर्ववृत्तिप्राकृतेन षष्टि[…]नात्मके उत्तरार्द्धस्य दुष्टत्वकथनमनुपपन्नं स्यात् । न च संसर्पांहस्पती [मा]सौ सर्वकर्मबहिष्कृताविति वचनेन पूर्वस्य दुष्टत्वेन तन्मासप्रयुक्तं कर्म क्षय [ए]व कुर्यादिति वाच्यम् । तस्य प्राकृतत्वाभाववति क्षयपूर्वासङ्क्रान्ते चारि[ता]र्थ्येनात्राप्रवृत्तेः । अन्यथा पूर्वोक्तवचनविरोधो दुष्परिहरः । इति ।

ननु चातुर्मास्यव्रतसमाप्तिः कुत्र प्राकृते शुद्धे वा । न तावत् [प्रा]कृते भानुलङ्घितत्वेनानर्हत्वात् । न शुद्धे शुद्धयर्हस्य मासस्य क्षये सति [स]माप्त्यनुपपत्तेः । समाप्त्यभावे वर्षान्तरे पुनरारम्भोऽपि न सिद्ध्येत् । " आरम्भान्नियमो दोषश्चासमाप्तौ " इति कात्यायनवचनविरोधश्च इति [चे]दत्रोच्यते । चातुर्मास्यव्रतारम्भः ससङ्क्रान्तशुक्लैकादश्यां भवतीति— " एकादश्यां तु गृह्णीयात् सङ्क्रान्तौ कर्कटस्य च " इति वचनादवगम्यते । [आ]रम्भे सङ्क्रान्त्युक्तेरुपरमेऽपि कार्तिके सङ्क्रान्तिसहितत्वमनुमितम् । एवं च [य]दाऽऽषाढोऽधिकस्तदा सङ्क्रान्त्यभावेन शुद्धे एवारम्भः समुचितः । मध्येऽ[ध]िमासपातेऽपि व्रतानां शुद्ध एवारम्भः शुद्ध एव समाप्तिरित्यत्रापि सन्देहो नास्ति । " अधिमासे च पतिते एष एव विधिक्रमः " इति वचनात् । [न]नु मध्येऽधिमासपाते—" वार्षिकमासचतुष्टयस्य व्रतार्हत्वोक्त्या कथं मास[प]ञ्चके व्रतानुष्ठानमिति चेन्न । " षष्ट्या तु दिवसैर्मासः " इति वचनेन षष्टिदिनानामेकमासत्वाङ्गीकारेण मासत्रयस्य ऋतुत्वाङ्गीकारेण च बाधकाभावात् । यदा त्वाश्विनः प्राकृतो भवति, तदा भाद्रपदे प्रारब्धव्रतसमाप्तिः प्रतिबन्धकमलत्वाभावेन प्राकृते प्रसज्यते । तथाऽपि तस्य भानुलङ्घितत्वेन तत्र " व्रतानां चैव यज्ञानामारम्भश्च समापनम् " इत्यनेन व्रतारम्भसमाप्त्योर्[नि]षेधात् तत्कल्पे सङ्क्रान्तेरारम्भे प्रयोजकत्वोक्त्या मध्येऽपि सङ्क्रान्तेः प्रयोजकत्वावगमाच्च शुद्धाश्विन एव पूर्वव्रतसमाप्तिरुत्तरव्रतारम्भश्च समुचितः । एवं कार्त्तिकस्यापि प्राकृतत्वे शुद्धत्वे च शुद्ध एव व्रतसमाप्तिर्न प्राकृते इत्यपि सिद्धम् ।

यदा तु कार्त्तिकः प्राकृतः शुद्धत्वार्हस्य कार्त्तिकस्य क्षयश्च भवति तदा सङ्क्रान्तियुक्तस्य क्षयत्वेन मलत्वात् मले च व्रतसमाप्तेर्निषिद्धत्वादुत्तरमासस्य ऋत्वन्तरत्वाच्च प्राकृत एव व्रतसमापनम्। यद्यपि प्राकृतो न ससङ्क्रान्तः, तथाऽपि शुद्धतुल्यत्वादनन्यगतिकत्वाच्च प्राकृते समाप्तिरङ्गीकृता। न च मासद्वयोदितकर्मणः क्षये विधानात् क्षय एव समाप्यतामिति वाच्यम्। तस्य वचनस्यानन्यगतिविषयत्वात् व्यवहितपूर्ववृत्तिक्षये चारितार्थ्याच्चात्राप्रवृत्तेः। अन्यथाऽधिके विहितकार्याकार्यनिर्णयं द्विसङ्क्रान्तेऽतिदिशतो गृह्यपरिशिष्टवचनस्य वैयर्थ्यापत्तिः। यदा तु क्षयव्यवहितपूर्ववृत्तिरसङ्क्रान्तः कार्त्तिकक्षयः, तदा मुख्यकार्त्तिकत्वाभावेऽप्यारोपितकार्त्तिकत्वस्य विद्यमानत्वात्, मलत्वेन समाप्तिनिषेधेऽप्यनन्यगतिकत्वात्, सङ्क्रान्तियुक्तत्वाच्च क्षये चातुर्मास्यव्रतानां समाप्तिं कुर्यात्। प्रथमारम्भसमाप्ती परं न भवतः इति हेमाद्र्यभिप्रेतोऽर्थः; "न कुर्यान्मलमासे तु महादानव्रतादिकम्" इति निषेधात्। अनेनैव न्यायेन पित्र्यमपि शुद्ध एव कुर्यादित्यायातम्। एवं सति—

प्रशस्तान्यधिमासे तु न कार्याणि महात्मभिः।
अप्रशस्तं न कर्तव्यमात्मनः श्रेय इच्छता॥

इति पैठीनसिवचनमप्यनुगृह्यते तथाऽपि—

पण्डिता ज्ञानिनो मूर्खाः स्त्रियो वा ब्रह्मचारिणः।
मृताहं समतिक्रम्य चण्डालेष्वभिजायते॥

इति मरीचिवचनेन मृताहातिक्रमे दोषश्रावणात् मृताहस्य च "मासपक्षतिथिस्पृष्टे"—इति व्यासवचनोक्तमृतमासपक्षतिथिस्पृष्टत्वरूपविशेषावगतेस्तादृशविशेषस्य प्राकृते शुद्धे च समानत्वादुभयत्राप्याब्दिकमावृत्याऽनुष्ठेयम्। एतदभिप्रायेणैव "मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते" इति सत्यतपोवचनं हेमाद्रिकमलाकरादिभिः मासद्वयगतं-पूर्वासङ्क्रान्तिगतं

क्षयगतं च मलमासे क्षयमासे, अपिशब्दात्पूर्वासङ्क्रान्ते च कुर्यादिति व्याख्यातम्। तथा दीपिकायामपि "तत्प्राक्सङ्क्र्यधिमासको यदि भवेत्तत्रप्रत्यसांवत्सरं तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्द्वयोः कोविदः" इति पूर्वासङ्क्रान्ते शुद्धत्वादेव कुर्यादित्युक्तम्। शुद्धमासमृतानां तु यदाकदाचित् मृतमासो मलमासो भवति तदा मले शुद्धमासपक्षतिथिस्पृष्टत्वरूपविशेषस्य विद्यमानत्वेन शुद्ध एवानुष्ठानम्। अत एवैतदभिप्रायकं—

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि।
मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा॥

इति सत्यव्रतवचनं सार्थकम्। कैश्चित्तु अधिकं तु प्रविष्टं न तद्धानये इति न्यायेन मलेऽपि मृताहसम्भवेन मासद्वये प्रत्याब्दिकस्य कर्तव्यत्वेऽवगतेऽपि "पिण्डवर्जमसङ्क्रान्ते सङ्क्रान्ते पिण्डसंयुतं" इति वचनाच्चाधिके पिण्डवर्जं कृत्वा शुद्धे पिण्डसंयुतं कार्यमित्युक्तम्। अनेनैव न्यायेनाधिकमासमृतानामुत्तरवर्षेषु मृताहस्य मलत्वरूपविशेषाभावेऽपि अङ्गानुरोधेन प्रधानलोपस्यायुक्तत्वादेकदेशविकृतमनन्यवत् इति न्यायाच्च मलरूपविशेषाभावं सोढ्वाऽपि शुद्धे प्रत्याब्दिकं क्रियते। एवं मलमासमृतानां तु यदा कदाचित् मलमास एव वर्षान्तरे उपलभ्यते तदा मुख्यस्य मृताहस्य तत्रोपलब्धत्वात् मले प्रत्याब्दिकं कुर्यात्। न शुद्धे। तथा चाहतुः सत्यतपःपैठीनसी—

वर्षे वर्षे तु यच्छ्राद्धं मृताहनि मलिम्लुचे।
कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र तु॥
मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरम्।
मलमासे तु कर्तव्यं नान्येषां तु कदाचन॥ इति।

केषाञ्चित् पक्षाश्रयणे तु शुद्धेऽपि प्रत्याब्दिकं कार्यं स्यात् । अलं प्रसङ्ग-चिन्तया । प्राकृते तु प्रत्याब्दिकं प्राकृते शुद्धे चावृत्त्याऽनुष्ठेयमिति सिद्धम् । अनेनैव न्यायेन यदा प्राकृतो मृतमासो भवति तदा प्राकृते एव प्रथमाब्दि-कम् । न शुद्धे । तत्र कृते प्रथमाब्दिकत्वाभावात् । दीपिकादिवचनं तु प्रत्याब्दिके सावकाशमिति प्रथमाब्दिके न प्रवर्तते इति भाति । यदा तु क्षयाव्यवहितपूर्ववृत्तिः प्राकृतो भवति यथा कार्त्तिकः प्राकृतः कार्त्तिकक्षयः, तदा पूर्ववर्षे कार्त्तिकमृतानां कार्त्तिके प्राकृते एव प्रथमाब्दिकं कुर्यात् । न क्षये ; मृतमासपक्षतिथिस्पृष्टत्वाभावान्मृताहस्य । न च क्षयस्य मास-द्वयात्मकत्वेन " मासद्वयोदितं कर्म तत्र कुर्याद्विनिर्णयः " इति वचनेन क्षयेऽपि कुर्यादिति वाच्यम् । तस्यवचनस्यानन्यगतिविषयत्वेनात्र गति सम्भवादप्रवृत्तेः । न च दीपिकावचनेन 'क्षये कार्यमिति वाच्यम् । तस्य द्वितीयाद्याब्दिकपरत्वात् । तथा प्राकृते मृतानां यदाकदाचित् सः अधिको भवति । तदा अधिक एव प्रत्याब्दिकमिति भाति, असङ्क्रान्तत्व-सादृश्यात् । केषाञ्चित् पक्षे उभयत्रापि भवेत् । तथा भाद्रपदे प्राकृते सति अपरपक्षे विहितमहालयश्राद्धं तत्र न कुर्यात् । शुद्धतुल्यत्वेऽपि तस्य मध्येऽन्ते वा कन्यास्थार्कान्वितत्वाभावात् । किन्तु शुद्ध एव कुर्यात् । यदात्वाश्विनः प्राकृतो भवति तदा भाद्रपदे दैवादकृतं महालयश्राद्धं तत्र कुर्यादेव, प्रतिबन्धकमलत्वाभावेन कन्यार्कपरित्यागेन तुलार्के करणे प्रमाणा-भावात् । यत्तु धर्मसिन्धौ प्राकृते त्याज्येषु महालयगणनं तत् भाद्रपदे प्राकृते सति कन्यास्थरविसमन्वितत्वाभावेन शुद्धभाद्रपदे कन्यार्कान्वितत्वेन च तत्र सम्भवाभिप्रायेणेति ज्ञेयम् ।

एवमाश्विने प्राकृते दौहित्रप्रतिपच्छ्राद्धं प्राकृते शुद्धे चावृत्त्याऽनुष्ठे-यम् । सामान्यतः पित्र्यं तत्तन्मासप्रयुक्तं प्राकृते शुद्धे चावृत्त्याऽनुष्ठेयमिति सिद्धम् । श्राद्धनिर्णयस्तु क्षयाव्यवहितव्यवहितपूर्ववृत्तिप्राकृते समानः ।

अथ क्षयमासकार्याकार्यविवेकः

एवं क्षयस्य " नाधिमासो भवेदेष मलमासस्तु केवलः " इति वचनेन मलत्वावगमात् मले च—

रविसङ्क्रमहीने यो वर्ज्यावर्ज्यविधिःस्मृतः ।
स एव तु द्विसङ्क्रान्ते मलमासेऽप्युदीरितः ॥

इति काठकगृह्यपरिशिष्टे अधिमासीयवर्ज्यावर्ज्यविवेकोऽतिदिष्ट इति क्षयेऽधिमासवर्ज्यान् वर्जयेत् । अनन्यगतिकान्नित्यनैमित्तिकान् आवश्यकान् काम्यांश्च कुर्यात् । तथा च तत्तन्मासप्रयुक्तमप्रयुक्तं वा सर्वं क्षये वर्जयेदिति प्राप्तम् । तथाऽपि क्षये द्विसङ्क्रान्ते मलत्वेऽप्युत्तरमासलक्षणस्य विद्य-मानत्वेन शुद्धमासान्तराभावेन चानन्यगतिकत्वात् तन्मासप्रयुक्तं तत्रैव कुर्यात् । एवं द्विसङ्क्रान्ते पूर्वमासस्य लक्षणाभावेन लुप्तत्वात्तत्प्रयुक्त-कार्यलोपे प्रसक्तेऽनन्यगतिकत्वात्पूर्वमासप्रयुक्तं कर्म तत्रैव कुर्यात् । एतदर्थ-मेव " मासयुगलं क्षयाह्वयम् " " एकोऽपि द्व्यात्मको भवेत् " इत्यादिवचनै-रेकस्यैव मासस्य मासद्वयात्मकत्वमुक्तम् । तथा " मासद्वयगतं कार्यं तत्र कुर्याद्विनिर्णयः " । इत्यादिवचनमपि सार्थकं भवति ।

अयं न्यायः यदा पूर्वोऽसङ्क्रान्तः क्षयव्यवहितपूर्ववृत्तिर्भवति तदा प्रवर्तते । यदात्वव्यवहितपूर्ववृत्तिरसङ्क्रान्तो भवति । यथा कार्त्तिकोऽसङ्क्रान्तः कार्त्तिकक्षयः तदा कार्त्तिकप्रयुक्तं नित्यं नैमित्तिकं काम्यं सर्वं पूर्वासङ्क्रान्त एव कुर्यात्, न तु क्षये, सगतिकत्वात् । न च " मासद्वयोदितं कर्म तत्र कुर्याद्विनिर्णयः " इति क्षये मासद्वयकार्योक्ते-स्तत्र कार्त्तिकप्रयुक्तमपि कुर्यादेवेति वाच्यम् ; अस्यानन्यगतिकत्वात् । अन्यथा उत्तरमासलक्षणोपेतत्वेनोत्तरमासकार्यविधानेऽनुवादकत्वम् । पूर्व-मासकार्याप्रवृत्तेस्तदंशे विधायकत्वमिति वैरूप्यापत्तिः । " स एव तु

द्विसङ्क्रान्ते मलमासेऽप्युदीरितः" इति काठकगृह्यवचनेन अधिकवर्ज्यावर्ज्यविधेरतिदेशकेन विरोधापत्तिश्च। न च वाक्यवैयर्थ्यम्। प्राकृतव्यवहितोत्तरवर्तिक्षये चरितार्थत्वात्। तस्मात् कार्त्तिकप्रयुक्तं दीपोत्सवादिकं पूर्वासङ्क्रान्ते प्राकृतत्वेनानुष्ठितमिति सगतिकत्वेन क्षये नानुतिष्ठेदेव। मार्गशीर्षप्रयुक्तं महाचतुर्थीस्कन्दषष्ठीप्रभृति त्वनन्यगतिकत्वेन तत्रैव कुर्यादित्युक्तमेव। सकृत् कृते च कृतः शास्त्रार्थ इति न्यायात् "मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं तथा" इत्यनेनागतिकानां मलेऽभ्यनुज्ञातत्वाच्च। तथा पौषक्षये माघस्नानं तत्रैवैकादशीमारभ्य फाल्गुनद्वादश्यां समापयेत्। ननु माघे समाप्त्यभावेन स्नानस्यासम्पूर्णतेति चेन्न। माघे एव समापयेदिति नियमाभावात्। त्रिंशद्दिनमात्रे स्नानविधिश्रवणात्।

तथा हि पाद्मे—पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः।

मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत्॥ इत्युक्तम्।

अत एव ब्राह्मे—द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापयेत्॥

इत्युत्तरमासे द्वादश्यां पौर्णमास्यां वा समाप्तिविधानं सङ्गच्छते। स्पष्टमाह विष्णुस्त्रिंशद्दिनात्मकत्वं—

दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्।

पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे॥ इत्यनेन।

यत्तु "माघस्यैकादशीं शुक्लां यावत्" इत्यादौ माघश्रवणं तत्तु उपक्रमानुरोधेन बाधितमेव। अथ वा क्षयमासाभाववद्वत्सरेषु माघे एव समाप्तिदर्शनादनुवादोऽस्तु। वस्तुतस्तु "तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्" इति विष्णुना स्पष्टमेव माघस्नानस्य सौरमासाश्रयत्वोक्तेः क्षयवद्वर्षे माघस्नानस्य सौरमासाश्रयणेनैवानुष्ठानं युक्तमिति भाति। एवं कार्त्तिकस्नानेऽपि ज्ञेयम्। तथा क्षये दर्शपूर्णमासौ पौर्णमास्याममावास्यायां च सकृदेवानुतिष्ठेत्। तदङ्गभूतपौर्णमास्याः दर्शस्य चैकत्वात्। न हि दर्शपूर्णमासौ चैत्रादिमासप्रयुक्तौ

न वा चैत्रादीनां दर्शपूर्णमासयोरङ्गताऽस्ति येन मासद्वयात्मकत्वेन आवृत्त्या तन्त्रेण वा अनुष्ठानमाशङ्क्येत। केवलं अमावास्यायाममावास्यया यजेत, पौर्णमास्यां पौर्णमास्या यजेत,—इति यागाङ्गतया अमावास्या पौर्णमासी च विहिते। अमावास्यायाः पौर्णमास्या वा क्षये भेदोऽस्ति, सूर्याचन्द्रमसोरत्यन्तविप्रकर्षस्यात्यन्तसन्निकर्षस्य चैकत्वात्। तस्मात्सकृदेव दर्शपूर्णमासाभ्यां यजेत। नावृत्त्या तन्त्रेण वेति सिद्धम्। क्षयस्य पूर्वोक्तवचनैर्मलत्वात् शून्यत्वाच्च विवाहादिमङ्गलकार्यं सगतिकानि यागादीनि च वर्जयेत्।

एवं पित्र्यमपि तत्तन्मासप्रयुक्तं नित्यं नैमित्तिकं चानन्यगतिकं आवश्यकं काम्यं च क्षये कुर्यात्। एवं च यदा मार्गशीर्षादिषु क्षयो भवति, तदा तन्मासप्रयुक्तमष्टकाश्राद्धं "हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः" इति वचनविहितं क्षये कुर्यान्न वेति मीमांसन्ते। न कुर्यादेव। काठकगृह्ये—क्षयस्य मलत्वेन महालयाष्टकेत्यादिना मलेऽष्टकानिषेधादिति। कुर्यादेव। काठकगृह्यवचनस्यानन्यगतिविषयकत्वेन अधिके शुद्धमासान्तरसद्भावेन तस्मिन्नष्टकानिषेधस्य सम्मतत्वात्। किं चासङ्क्रान्तप्रकरणाच्चापि मलपदेनासङ्क्रान्तस्यैव ग्रहणं युक्तम्। अन्यथा स एव तु द्विसङ्क्रान्ते मलमासेऽप्युदीरितः।" इति वचनस्य वैयर्थ्यं दुर्वारम्। उपदेशेनैव वर्ज्यावर्ज्यविधेः प्रवृत्तावतिदेशस्य निष्प्रयोजनत्वात्। इति। तथा च कार्त्तिकस्य क्षये सन्देह एव नास्ति एकेनैवाष्टकाश्राद्धेन कृतार्थत्वात्। यदा तु मार्गशीर्षस्य पौषस्य माघस्य वा क्षयः तत्र तु—"मासद्वयगतं—" इति वचनबलात्तन्त्रेणैवानुष्ठेयम्। देशकालकर्तॄणां देवतानां चैक्यात्। एतेनाष्टकाश्राद्धमावृत्त्यानुष्ठेयमिति, एकस्य श्राद्धस्य लोपप्रसक्तिरिति च परास्तम्। प्रमाणाभावात्। एवं दर्शश्राद्धं मासद्वयप्रयुक्तं तन्त्रेणानुष्ठेयमिति केचित्। वस्तुतस्तु पूर्वमासस्य लक्षणाभावेन लुप्तत्वात्, यथा आशौचादिना दर्शश्राद्धेऽकृते कालान्तरे पुनःकरणस्य उत्तरसातन्त्र्येण वाऽनुष्ठानस्य शास्त्रसम्मतत्वाभावान्न तन्त्रेणानुष्ठानं दर्शस्य शास्त्रवित्सम्मतं

तथाऽत्रापि पूर्वमासलक्षणाभावेन लुप्तमासदर्शस्यापि लोपात् न तत्प्रयुक्ततन्त्रता आवृत्तिर्वा युक्ता। किञ्च दर्शश्राद्धमपि न चैत्रादिदर्शनिमित्तकं येन क्षयस्य मासद्वयात्मकत्वेन मासद्वयगतकार्यस्य तत्र विधानात् लुप्तदर्शस्यापि निमित्ततामङ्गीकृत्यानुष्ठानमाशङ्क्येत। विहितं तु पर्वमात्रम्। तथा हि श्रुतिः "मासि मासि पितृभ्यः क्रियते" इति। तथा "दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं—" "पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते" इति शातातपकात्यायनादिवाक्येषु दर्शपार्वणक्षीणचन्द्रपदैः सूर्येन्दुसङ्गमदिनमात्रेऽपराह्णे श्राद्धविधानात्। तादृशसङ्गमस्तु क्षये एक एव। तस्माद्दर्शश्राद्धं क्षये सकृदेवानुतिष्ठेदिति सिद्धम्। पिण्डपितृयज्ञेऽप्ययं न्यायः सञ्चारणीयः।

तथा पूर्वोक्तन्यायेन सांवत्सरिकमपि क्षये उत्तरमासलक्षणोपेतत्वेन मासपक्षतिथिस्पृष्टेत्युक्तविशेषणस्य तत्र विद्यमानत्वात् मलत्वेऽप्यनन्यगतिकत्वाच्च उत्तरमासप्रयुक्तं कार्यमेवेत्यसन्देह एव। व्यवहितपूर्ववृत्तिप्राकृतस्थले तु लुप्तमासप्रयुक्तमपि क्षय एव कुर्यात् मासपक्षतिथिस्पृष्टेत्यादिविशेषणाभावेऽप्यनन्यगतिकत्वात्। अव्यवहितपूर्ववृत्तिप्राकृतस्थले तु मासपक्षतिथिस्पृष्टेत्याद्युक्तविशेषणस्य प्राकृते विद्यमानत्वेन प्राकृतत्वोक्त्या मलत्वाभावेन च तत्रैव सांवत्सरिकस्य कृतत्वात् क्षये मलत्वादगतिकत्वाभावाच्च नानुष्ठानमिति प्रतीयते। तथाऽपि 'एक एव यदा मासः इति" वचनात्प्राप्यते।

न चेदं क्षयमासीयमासद्वयगतं श्राद्धं क्षये विधायकमिति वाच्यम्। वैयर्थ्यात्। तथा हि क्षये उत्तरमासलक्षणोपेतत्वेन मलत्वेऽप्यनन्यगतिकत्वेन च तत्रैव प्रत्याब्दिके कृते सति तद्विषये इदं वचनमनुवादकम्। पूर्वमासस्य लुप्तत्वात्तत्प्रयुक्तश्राद्धलोपे प्रसक्ते तदंशे विधायकमिति वैरूप्यम्। अतोऽन्यथा व्याख्येयम्। अन्यथा व्याख्यातश्चानेनाभिप्रायेण हेमाद्रिणा। अनुमोदितं च कमलाकरेण "मासद्वयगतं पूर्वासङ्क्रान्तगतं क्षयगतं च। मलमासे क्षयमासे, अपिशब्दात्पूर्वाधिमासे चेति हेमाद्रिः" इति। अत्र पूर्वासङ्क्रान्तगतमित्यत्राव्यवहितपूर्वासङ्क्रान्तगतमिति केचित्। वस्तुतस्तु अव्यवहितपूर्ववृत्त्यसङ्क्रान्तस्य प्राकृतत्वेनोत्तरस्य क्षयेन चानन्यगतिकत्वाच्च तत्रैवाब्दिकं प्राप्तमिति तदंशेऽनुवादकत्वमस्य क्षयविषये विधायकत्वमिति वैरूप्यं दुर्वारम्। व्यवहितपूर्ववृत्तिप्राकृते तु तस्य शुद्धतुल्यत्वेऽपि मासपक्षतिथिस्पृष्टेत्यादिविशेषणस्य शुद्धे सम्पूर्णतया विद्यमानत्वेन तत्राब्दिके कृते सति सकृत् कृते च कृतः शास्त्रार्थ इति न्यायादङ्गानुरोधेन प्रधानावृत्तेरन्याय्यत्वाच्चाप्राप्तिशङ्का जायते। तत्र श्राद्धविधानेनेदं वाक्यं सर्वांशे सार्थकं भवतीति सुवचम्। तथाऽपि पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायादव्यवहितव्यवहितपूर्ववृत्तिप्राकृतसाधारणमिति फलितम्। एतन्मूलकमेव दीपिकावचनम्—तत्प्राक्सङ्क्रमधिमासको यदि भवेत्तत्रत्यसांवत्सरं तस्मिन् शुद्धतया क्षये च वचनात् कुर्याद्द्वयोः कोविदः इति। यत्तु वचनमिदं प्राक्सङ्गीति वचनबलात् क्षयाव्यवहितपूर्ववृत्तिप्राकृतगतं श्राद्धं शुद्धतया तत्र कुर्यादिति कैश्चिद्व्याख्यातम्, तदपि मन्दम्। उक्तस्मृतिविरुद्धत्वान्मूलान्तरकल्पनागौरवाच्च। वस्तुतस्तु दीपिकावचनमपि नाव्यवहितपूर्ववृत्तिप्राकृतमनुवदति। प्राक्पदस्य तत्सङ्गिपदस्य वा वैयर्थ्यापत्तेः। तत्प्राक् इत्यनेन तत्सङ्गीत्यनेन वाऽभीप्सितसिद्धेः। अन्यथा तत्प्राचः सङ्गीति षष्ठीतत्पुरुषेण एकव्यवहितमेव जानीयात् पुरुषः, नाव्यवहितम्। न च तत्सङ्गीति मात्रोक्तावुत्तरासङ्क्रान्तेरपि ग्रहणं स्यात्। तद्वारणार्थं प्राक्पदं सार्थकमिति वाच्यम्। उपजीव्यविरोधात्, मूलान्तरकल्पनापत्तेः, उत्तरासङ्क्रान्तस्य प्राकृतत्वाभावेन शुद्धतया इत्यनुवादानुपपत्तेश्च तस्मात्सत्यतपोवचनानुरोधेन साक्षात्परम्परया वा क्षयसङ्गिनो ग्रहणम्। प्रागिति स्पष्टार्थमुक्तम्। एवं चाव्यवहितोत्तरवृत्तिक्षये पूर्वमासगतं श्राद्धं तत्पूर्वस्य प्राकृतत्वेन तत्र कृतमपि वचनबलात् क्षयेऽपि कुर्यादिति सिद्धम्।

एतेन - वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि।
मासद्वयेऽपि तत्कुर्यात् व्याघ्रस्य वचनं यथा॥

इति श्लोकव्याख्याने "मासद्वयेऽपि-सङ्क्रान्तिद्वयसंयोगकृत् क्षयमास एव मासद्वयात्मकः अपिशब्द एवकारार्थे क्षयमास एव श्राद्धं कुर्या" दिति मदनपारिजातोक्तमपि न श्रद्धेयम्। अव्यवहितपूर्ववृत्तिप्राकृतेऽपि क्षयमासश्राद्धस्य कृतत्वादपिशब्दस्यावधारणार्थकत्वानुपपत्तेः। किन्तु समुच्चयार्थकत्वमेव हेमाद्र्याद्युक्तं युक्तम्। अथ वा अव्यवहितपूर्ववृत्तिप्राकृताभाववत्क्षयपरतया नेयमिति न विरोधः। तथा "तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेऽर्द्धे तथोत्तरः" इति वचनबलात् शोभकृद्वत्सरीयक्षयमासीयप्रतिपदादिघटीर्द्विधा विभज्य प्रथमभागे मृतानां जातानां वा उत्तरवर्षे पूर्वमासे मार्गशीर्षे सांवत्सरिकं वर्द्धापनं च कुर्यात्। तिथ्युत्तरार्द्धे द्वितीयभागे मृतानां जातानां चागामिवर्षे उत्तरमासे पौषे सांवत्सरिकं वर्द्धापनं च कुर्यादिति सिद्धम्। एवं जननादौ मासफलज्ञानादिकमपि विभागेनैव ज्ञेयम्।

अथ कार्याकार्यसङ्ग्रहः

अत्रायं सङ्ग्रहः—अधिकमासे नित्यनैमित्तिके अनन्यगतिके, आवश्यकं काम्यं च कुर्यात्। यथा—अग्निहोत्रग्रहणस्नानराक्षोघ्नेष्टिप्रभृतीनि। सगतिके नित्यनैमित्तिके सोमयागजातेष्ट्यादिनी न कुर्यात्। एवं काम्यं ज्योतिष्टोमादि न कुर्यात्। तथा काम्यानामारम्भसमाप्ती न भवतः। क्वचिदावश्यकयावारम्भसमाप्ती परं भवत एव। एवं चाधिमासपातेऽपि चातुर्मास्यव्रतारम्भसमाप्ती शुद्ध एव। शुद्धमासमृतानां प्रथमाब्दिकमधिक एव। अधिकमासमृतानामपि यदा कदाचित् स एवाधिको भवति, तदा प्रथमाब्दिकमप्यधिक एव। शुद्धमासमृतानां प्रत्याब्दिकं शुद्ध एव। अयमेव न्यायः क्षयव्यवहितपूर्ववृत्तिप्राकृते सञ्चारणीयः। तथा चातुर्मास्यव्रतारम्भसमाप्ती शुद्ध एव, न प्राकृते। तत्तन्मासप्रयुक्तं नवरात्रदीपोत्सवस्कन्दषष्ठीप्रभृति शुद्ध एव न प्राकृते। शुद्धमासमृतानां प्रथमाब्दिकं प्राकृत एव न शुद्धे। अधिकमासमृतानां स एव कदाचित् प्राकृतो भवति तदा प्रत्याब्दिकं प्राकृत एव।

अन्येषां प्रत्याब्दिकं प्राकृते शुद्धे च कुर्यात्। क्षयव्यवहितपूर्ववृत्तिप्राकृते सांवत्सरिकातिक्रान्तमहालयश्राद्धदौहित्रकर्तृकप्रतिपच्छ्राद्धादीनि कुर्यात्। अधिके पित्र्यस्यापि निषेधः। प्राकृते न पित्र्यनिषेधः इति विशेषः। तथा च क्षयव्यवहितपूर्ववृत्तिप्राकृते तन्मासप्रयुक्तं दैवं शुद्ध एव, पित्र्यं तु प्राकृते शुद्धे च कुर्यादिति सिद्धम्। क्षयाव्यवहितपूर्ववृत्तिप्राकृते तु तन्मासप्रयुक्तं दैवं प्राकृत एव। पित्र्यं तु प्राकृते क्षये चानुतिष्ठेत्। एवं प्राकृतव्यवहितोत्तरवर्तिक्षये मासद्वयप्रयुक्तं दैवं पित्र्यं च तत्रैव कुर्यात्। अत्र कार्त्तिकक्षये चातुर्मास्यव्रतसमाप्तिर्भवत्येव। हेमाद्रिमते अस्मिन् वर्षे प्रथमारम्भो न भवति। प्राकृताव्यवहितोत्तरवृत्तिक्षये उत्तरमासप्रयुक्तमेव दैवं तत्र कुर्यात्। पूर्वमासप्रयुक्तं तु प्राकृतेऽनुष्ठितमिति न क्षये पुनः कुर्यात्। माघस्नानादिकं दिनसंख्यया सौरमानेन वा कार्यम्। सांवत्सरिकादि पित्र्यं तु मासद्वयप्रयुक्तं क्षये कुर्यादेव। अधिकप्राकृतक्षयमासेषु सगतिकनित्यनैमित्तिककाम्यानां विवाहादिमङ्गलकर्मणां च परित्यागः श्रेयान्। यथा "विवाहयज्ञोत्सवमङ्गलानाम्"। तथा क्षये तिथिपूर्वार्द्धे मृतानां जातानां चागामिवर्षे पूर्वमासे सांवत्सरिकवर्द्धापनादि कुर्यात्। क्षये तिथ्युत्तरार्द्धे मृतानां जातानां चागामिवर्षे उत्तरमासे सांवत्सरिकवर्द्धापनादि च कुर्यात्॥

क्षयवति वत्सरे मासिकनिर्णयः

क्षयवति वत्सरे दैवात्कश्चन दिवङ्गतः। तस्य षोडशमासिकानुष्ठाने महान् सन्देहः। तत्रानुष्ठातृसौकर्यार्थं सोदाहरणं किञ्चित् प्रदर्श्यते। तत्र मृतवर्षे एकाधिमासपातः अधिमासद्वयपातः इति द्वैविध्यम्। आद्येऽपि क्षयसहितत्वं तद्रहितत्वं चेति द्वैविध्यम्। यथा शुभकृद्वत्सरे मार्गशीर्षादर्वागाश्विनादूर्ध्वमुपरतस्य वर्षमध्ये एक एवाधिमासः। मार्गशीर्षानन्तरं शोभकृच्चैत्रपर्यन्तमुपरतस्य वर्षमध्ये एकोऽधिमासः एकः क्षयः। चैत्रादनन्तर माश्विनादर्वाङ्मृतस्य वर्षमध्येऽधिमासद्वयमेकः क्षयश्च।

तथा च शुभकृद्वत्सरे आश्विने कश्चन मृतश्चेत्तस्याश्विने अधिके प्रथमाब्दिकम् । एवं शुभकृद्वत्सरे कार्त्तिके मृतस्य शोभकृदाश्विनेऽधिके शुद्धे च मासिकं कृत्वा कार्तिके प्रथमाब्दिकं कुर्यात् । तदाहतुर्विष्णुवृद्धवसिष्ठौ "संवत्सरमध्ये यद्यधिकमासो भवेत् मासिकार्थं दिनमेकं वृद्धिं नयेत्" इति । तथा कौथुमिसत्यव्रतौ—संवत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम् । इति ।" तथा शुभकृद्वत्सरे मार्गशीर्षे मृतस्य क्षये प्रथमाब्दिकं कुर्यात्, अनन्यगतिकत्वात् । "मासद्वयगतं श्राद्धं तस्मिन्नेव प्रशस्यते" इति वचनाच्च । एवं शुभकृद्वत्सरे पौषे मृतस्य प्रथमाब्दिकं क्षये इत्यत्र सन्देह एव नास्ति पूर्वोक्तवचनात् । परन्तु अधिके मासिकावृत्तिपक्षे आश्विने दशममासिकस्यावृत्याऽनुष्ठानात् द्वादशमासिकलोपः प्रसक्तः ।

अत्र केचित् क्षये द्वादशमासिकं कृत्वाऽब्दिकं कुर्यादित्याहुः । अपरे तु देशकालकर्तृदेवतानामैक्यात्तन्त्रतेति वदन्ति ।

अन्ये तु उत्तरसातन्त्र्येणानुष्ठानासम्भवाल्लोप एव द्वादशमासिकस्येति प्रतिपादयन्ति । एवं चास्मिन् पक्षे पञ्चदशश्राद्धापत्तिरिष्टापत्त्यैव परिह्रियते । "श्राद्धानि षोडशादत्वा" इत्यत्र षोडशेत्युपलक्षणमित्यङ्गीकार्यम् । एवं शुभकृद्वत्सरे माघे मृतस्यापि अधिके शुद्धे चाश्विने मासिकमावृत्त्याऽनुष्ठाय क्षये मासद्वयगतमासिकद्वयं तन्त्रेणानुष्ठाय माघे प्रथमाब्दिकमिति वदन्ति । एवं शोभकृद्वैशाखे मृतस्याश्विनेऽधिके शुद्धे च षष्ठं मासिकमावर्त्य क्षये अष्टमनवममासिके तन्त्रेणानुष्ठाय क्रोधि (१८८७) चैत्रेऽधिके शुद्धे च द्वादशमासिकमावर्तयेत् । एवं चात्राष्टादशश्राद्धापत्तिरिष्टापत्त्या परिह्रियते । अयमेव न्यायः अन्यमासेषु मृतानां मासिकादिषु सञ्चारणीयः इत्याहुः ।

अत्र केचिदधिके मासिकस्यावृत्तिपक्षेऽप्यधिकमृतस्य न शुद्धे प्रथममासिकमावर्तयेत् । किन्तु द्वितीयमासिकं कुर्यात् । तथा च "पराशरः—

अधिमासमृतानां तु आद्यमेकं समाचरेत् । शुद्धे मासे तदन्वाद्यं शुद्धे चैवोनमासिकम्" इति । एवं च षष्टिदिनात्मकमृतमासस्थद्वितीयतिथौ द्वितीयमासिकं कर्तव्यम् । तदा मृतमासात्पूर्वमासे प्रथमाब्दिकं भवति । "बुधश्चान्द्रमसस्यैव मामले दिवसे सति । आद्याब्दिकं प्रकुर्वीत" इति स्मरणात् । तथा च स्मृत्यन्तरे—"अन्यमासे प्रमीतानामधिमाससमागमे । एकनाम्ना तु कर्तव्यं मासिकद्वयमीरितम् ।" "अन्यमासेऽधिकव्यतिरिक्तमासे" इति वैद्यनाथोक्तेरधिकमृतस्य शुद्धे प्रथममासिकस्य नावृत्तिरित्याहुः; तदपि मन्दम् । आद्यस्यानावृत्तौ मृतमासात्पूर्वमासे आब्दिके "मासपक्षतिथिस्पृष्टेत्यादिव्यासवचनविरोधो दुष्परिहरः । बहुसम्मतशिष्टाचारविरोधोऽपि । किञ्च पराशरोऽपि आद्यस्यानावृत्तिं बोधयन् सर्वेषामपि मासिकानामनावृत्तिं ज्ञापयति । तेन त्रयोदशमासिकानि तदा भवन्तीति ज्ञेयम् । अथवा पराशरवचने आद्यमित्यस्य मासिकमिति नार्थः । किन्तु महैकोद्दिष्टमित्यर्थः । मृतमासस्य शुद्धेऽपि विद्यमानत्वेन तत्रापि महैकोद्दिष्टं कार्यमिति शङ्कावारणार्थमेकमेकमेवेत्युक्तम् । अन्यथा वैद्यनाथोदाहृतवचनान्तरविरोधो दुष्परिहरः । तथा च तद्वाक्यम् – "आवृत्तिरन्यमास्यानां द्वादशाहे सपिण्डने । तथा नावर्तयेदाद्यं मले त्वावृत्तिरिष्यते इति ।" अत्र हि द्वादशाहे सपिण्डने आद्यस्योत्तरत्र कालाभावेन निवृत्तौ मले त्वावृत्तिरित्यनेन प्रतिप्रसवः कृतः ।

वस्तुतस्तु पराशरवचनस्यायमभिप्रायः अधिमासे एकमाद्यमासिकं कृत्वा शुद्धे तदनु-तदनुसृत्यं तदनु-तत्पश्चाद्वा आद्यं–आद्यमासिकं कुर्यात् । ऊनमासिकं तु शुद्ध एव कुर्यादित्यर्थः एवं चावृत्तिपक्षे प्रथःमासिकस्याप्यावृत्तिं कुर्यात् । मामले दिवसे आद्याब्दिकमित्यपि न नियमः न्यूनाधिकदिनस्याधिमासपक्षतिथिस्पृष्टत्वेन ममलस्य (३५५) नियमेन मृततिथित्वाभावात् । किन्तु आद्याब्दिकमूनाब्दिकमित्यर्थः । तस्य दिनसंख्याया एव मुख्यत्वस्योत्तरत्र वक्ष्यमाणत्वात् । तस्मादावृत्तिपक्षे सर्वत्राधिके आवृत्तिं क्षये मासिकद्वयस्यतन्त्रेणानुष्ठानं च कुर्यादिति सिद्धम् ।

अधिके मासिकानावृत्तिपक्षः

इदमत्रावधेयम्—मृतवर्षे चत्वारि ऊनमासिकानि द्वादश मासिकानीत्युत्सर्गः । यदा तु वर्षे त्रयोदश मासा भवन्ति, तदा त्रयोदश मासिकानि भवन्ति । तथा च वसिष्ठविष्णू-संवत्समध्येयद्यधिमासो भवेत् मासिकार्थं दिनमेकं वृद्धिंनयेत् । इति । तथा सत्यव्रतः—संवत्सरे विवृद्धेऽपि प्रतिमासं तु मासिकम् । इति । तथा च यावदाब्दिकं भवेत् मृततिथेर्वैन्ध्यत्वं न कार्यम् । किन्तु प्रतिमृततिथि मासिकं कुर्यात् । अत एव प्रतिसांवत्सरिकस्य शुद्धे विधानेन प्रथमाब्दिकस्यापि शुद्ध एव कर्तव्यत्वप्रसक्तौ अब्दमध्ये अधिकमासीयमृततिथेर्वैन्ध्यत्वं भवतीत्यभिप्रायेणाधिक एव प्रथमाब्दिकविधानं सङ्गच्छते । त्रयोदश मासिकानि भवन्तीत्येतत् स्पष्टीकरोति सत्यव्रतः—" संवत्सरस्य मध्ये तु यदि स्यादधिमासकः । तदा त्रयोदशश्राद्धं कार्यं तदधिकं भवेत् " । इति । तथा च "मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । इति याज्ञवल्क्योक्तः पक्ष एव परमसिद्धान्तः । तथा हारीतोऽपि "मुख्यश्राद्धं मासि मासि" तथा ब्रह्माण्डपुराणेऽपि " मासिमासि तु कर्तव्यं यावत्संवत्सरं द्विजैः " । इति । एवं च " षष्ट्या तु दिवसैर्मासः " इत्युक्तषष्टिदिनात्मकमासत्वं मृतवर्षे न प्रवर्तते । अन्यथा मासे भवं मासिकं इति व्युत्पत्तेरेकेनैव मासिकेन शास्त्रार्थसिद्ध्याऽधिके कर्तव्यता नोपपद्येत । यत्तु " श्राद्धाः षोडश सर्वदा " इति ब्रह्माण्डवचनं, यच्च " इत्येतत् श्राद्धषोडशम् " इति जातूकर्ण्यवचनं यच्च " प्रेतश्राद्धानि षोडशेति भविष्यत्पुराणवचनं च, तानि अधिकमासाभाववद्वत्सराभिप्रायेण वा अवयुत्यानुवादत्वेन वा नेयानि । अन्यथा पूर्वोक्तानेकवचनविरोधापत्तेः । एवं च अन्यमासे—इति वचनं मूलालेखनान्महानिबन्धेष्वदर्शनाच्च निर्मूलम् । समूलत्वेऽपि अधिकमासे मासिककर्तव्यताविधानेन चरितार्थमिति नावृत्तिबोधने समर्थम् । पूर्वोक्तानेकस्मृतिविरोधापत्तेः । तथा मले त्वावृत्तिरिष्यते इति वचनमपि पूर्वोक्तार्थकमेव । महानिबन्धकाराणामाशयोऽप्येवमेवेति तद्ग्रन्थपरिशी-

लनवतामतिरोहितम् । अन्यथाऽधिकमासद्वये मासिकावृत्तौ क्षये मासिकद्वयकरणे चाष्टादशमासिकापत्तिः कथं वार्यते । शास्त्रे हि एकमेवाधिक मासिकमुक्तं ; नाधिकमासद्वयप्रयुक्तमासिकद्वयम् । केषाञ्चित् शिष्टानामाचारसिद्धे मासिकसङ्कल्पे प्रथममासिकद्वितीयमासिकेति निर्देशोऽपि न मासिकस्वरूपसम्पादकः, प्रथमस्य द्वितीयादीनां च स्वरूपे भेदाभावात् । अनुष्ठातृभिरविस्मरणार्थमेव तथोच्यते । तस्मान्मासिकेषु प्रथमद्वितीयादिमासिकनामानिर्देशोऽपि न क्षतिः । महालयसङ्कल्पे तु "आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः " इति वचनमाश्रित्य आषाढ्यादिपञ्चमापरपक्षे इत्याद्युच्यते । मासिकसङ्कल्पे संख्यानिर्देशे आहत्य वचनं नोपलभामहे । शिष्टैस्तु कैश्चित् " श्राद्धानि षोडशादत्वा " इति वचनमवलम्ब्य षोडशश्राद्धैरेव सपिण्डीकरणाधिकारसिद्धेर्न प्रयोजनं त्रयोदशमासिकेनेत्यभिप्रायेण शुद्धमासमासिकस्याधिके आवृत्तिः क्रियते । वस्तुतस्तु मृतवत्सरे इति वत्सरपदं न मुख्यवत्सरपरम् , वर्षमध्ये मृतस्य फाल्गुनानन्तरं किमपि मासिकं न स्यात् । किं तु मृतवत्सरमासतिथेरारभ्योत्तरवत्सरतन्मासीयतत्तिथ्यन्तो गौणवत्सरो विवक्षितः ।

ज्योतिर्गार्ग्येण—यस्मिन् मासे दिने यस्मिन् विपत्तिरुपजायते ।

पर्वान्तः स तु विज्ञेयो मासो नैमित्तिकं प्रति ॥

इति गौणमासोक्तेस्तादृशद्वादशमासानां संवत्सरत्वावगमात् । एतत् स्पष्टमाह पितृमेधसारकृत्—" मासादौ मासिकं कार्यम् । अत्र मृताहो मासादिः ; मृताहान्मृताहान्तो मासः । मासि मासि मृताहे मासिकानि वत्सरान्तं कुर्यात् " इति । एवं च प्रसिद्धाधिकमासापेक्षयाऽन्यत्राधिको भवतीति कथमधिके प्रसिद्धे मासिकावृत्तिं विदध्यात् । अस्तु वा क्षयाभाववति वत्सरेऽधिके मासिकावृत्तिः कथञ्चिदस्तु क्षत्यभावात् । क्षयवति मृतवत्सरे तु न कस्यापि मासिकस्यावृत्तिः । अन्यथा आश्विनस्य प्राकृतत्वे आवृत्तिविधायकवचनानामत्राप्रवृत्त्या प्राकृते, शुद्धे वा एकत्र

मासिकलोपो दुष्परिहरः । न च सत्यतपोवचनेनोभयत्र मासिकमावर्तयेदिति वाच्यम् । तस्य सांवत्सरिकपरत्वात् । अत एव तद्वचनमनुवदता स्पष्टमेवोक्तं दीपिकाकारेण— "तत्रत्यसांवत्सरम्"— इत्यादिना ।

तथा च शुभकृद्वत्सरे पौषमृतस्याश्विनेऽसङ्क्रान्ते मासे दशमं शुद्धे एकादशं कार्त्तिके द्वादशं च मासिकमनुष्ठाय क्षये प्रथमाब्दिकं कुर्यात् । एवं शुभकृद्वत्सरे माघमृतस्याश्विनेऽसङ्क्रान्ते नवमं शुद्धे दशमं कार्त्तिके एकादशं क्षये द्वादशं च मासिकमनुष्ठाय माघे प्रथमाब्दिकमनुतिष्ठेत् । न च "मासद्वयगतं कार्यं तस्मिन्नेव प्रशस्यते" इति वचनबलात् क्षये मासिकद्वयं कार्यमिति वाच्यम् । तस्यानन्यगतिविषयत्वेनात्राप्रवृत्तेः । किं च मासिकं न मार्गशीर्षपौषप्रयुक्तम् ; येन मासिकद्वयकार्यताऽऽशङ्क्येत । किं तु मृततिथ्यादिमृततिथ्यन्तगौणमासप्रयुक्तत्वेन प्रसिद्धमाससामान्यप्रयुक्तमपि न भवति, किमु वक्तव्यं मासविशेषाप्रयुक्तमिति । तस्माद्दर्शश्राद्धवदेकमेव मासिकं क्षये कुर्यादिति सिद्धम् । अधिकं क्षयप्रकरणे, दर्शश्राद्धप्रकरणे चाभिहितमिति तत्रैव द्रष्टव्यम् । एवं शुभकृत्फाल्गुनशोभकृच्चैत्रमृतविषयेऽयमेव न्यायः सञ्चारणीयः । तथा शोभकृद्वत्सरे वैशाखमृतस्याश्विनेऽसङ्क्रान्ते षष्ठं शुद्धे सप्तमं क्षये नवममधिकचैत्रे द्वादशं शुद्धे त्रयोदशं च मासिकं कृत्वा वैशाखे आब्दिकं कुर्यात् ; न तु क्षये तन्त्रेण मासिकद्वयं, अधिकशुद्धयोरेकस्यावृत्तिं च कुर्यात् । अन्यथा क्वचित् पञ्चदशमासिकानि क्वचिदष्टादशमासिकानि भवन्तीत्यादिदोषाणां प्राकृते शुद्धे वा मासिकाभावापत्तेश्च दुष्परिहरत्वात् । न चेष्टापत्तिः ; पूर्वैः स्मृतिकारैरनुक्तत्वात् । न च पूर्वेषामनासक्तिरज्ञानं वाऽऽरोपयितुं शक्यम् । षोडशसप्तदशश्राद्धानि विदधतां षोडशश्राद्धस्य नियतत्वं च वदतां पूर्वोक्तविषयेऽनासक्तेर्दुर्वचत्वात । क्षये मासद्वयगतश्राद्धादि विदधतामज्ञानस्यापि दुर्वचत्वात् । अधिकमासद्वयं क्षयं च वदतामष्टादशमासिकानामभीप्सितत्वे तथोक्तेरावश्यकत्वाच्च । हेमाद्रिकमलाकरमित्रमिश्रादिकृतमहानिबन्धेषु सर्व-

कर्तव्यबोधकेषु मासिकनिर्णये सप्तदशाधिकमासिकानामनुक्तेश्च । तस्मादियं व्यवस्था सर्वमहानिबन्धकारसम्मता । अयमेव न्यायः वैशाखाद्याश्विनान्तमासेषु मृतमासिकविषये सञ्चारणीयः । शुद्धाश्विने मृतानामपि क्षये तृतीयमधिकचैत्रे षष्ठं शुद्धे सप्तमं मासिकमनुष्ठायाश्विने प्रथमाब्दिकं कुर्यात् । एवं कार्त्तिकमृतस्यापि । क्षये तिथिपूर्वार्द्धे मृतस्य माघे द्वितीयमासिकं चैत्रद्वये चतुर्थपञ्चममासिके च कृत्वा मार्गशीर्षे प्रथमाब्दिकं कुर्यात् । न हि मार्गशीर्षमृतस्य पौष एव द्वितीयमासिकमिति नियमः । प्रमाणाभावात् । क्षयाभाववति वत्सरे तथा दर्शनेऽप्यत्र क्षयेन तादृशक्रमस्य बाधात् । न वा क्षये मासिकद्वयस्य कर्तव्यताबोधकवचनमुपलभामहे, येन क्षये मासिकद्वयं तन्त्रेणानुष्ठीयेत । किं च "आद्यमेकादशेऽहनि" इत्यनेनाद्यमासिकस्यैकादशाहे विधानात्तस्य तत्र महैकोद्दिष्टेन सह प्रसङ्गादिसिद्धावपि द्वितीयमासिकस्य एकादशाहे कर्तव्यतां, तस्य तत्र प्रसङ्गादिसिद्धिं च वक्तुं कः शक्नुयात् । ननु क्षये तिथिपूर्वार्द्धे मृतस्य क्रमशः प्रतिमासं द्वादशमासिकानामेव कृतत्वेन मध्येऽधिकमाससम्भवेऽपि त्रयोदशमासिकाकरणात् "तदा त्रयोदशश्राद्धं कार्यं',–इति वचनविरोध इति चेन्न ।अधिकपदेन न प्रथमवर्षे षष्टिदिनात्मकमासपूर्वभागः परामृष्टः । तथा सति त्रयोदशमासस्य कुत्राप्यभावापत्तेः । किं तु "संवत्सरे विवृद्धेऽपि प्रतिमासं तु मासिकम्" इत्युक्तत्रिंशत्तिथ्यात्मकमासवृद्धिः परामृश्यते । तस्मादत्राधिकमासो नाम नासङ्क्रान्तो मासः ; मृतवत्सरे प्रसिद्धासङ्क्रान्तापेक्षयाऽन्यत्राधिकसम्भवेन गौणोऽधिको मासः ग्राह्यः । तथा चात्र मृतवत्सरे एकस्य क्षयेऽन्यस्याधिक्ये च माससंख्या द्वादशैवेति कुतस्त्रयोदशमासिकस्य प्रवृत्तिः । ' तस्मात्प्रतिमासं तु मासिकम् " इति नियतम् । त्रयोदशेति तु सिद्धार्थानुवादः । एवं क्षये तिथ्युत्तरार्द्धे मृतानां त्रीणि मासिकानि कृत्वाऽधिके चैत्रे चतुर्थं शुद्धे पञ्चमं च मासिकं कृत्वा पौषे आद्याब्दिकं कुर्यात् । तथा यदाऽऽश्विनो वस्तुतः प्राकृतो भवति तत्राप्येवमेव निर्णेतव्यम् । यदा त्वव्यवहितपूर्वोऽसङ्क्रान्तो भवति यथा पूर्वोदाहृतः

कार्त्तिकोऽसङ्क्रान्तः कार्त्तिकक्षयः तदा तत्पूर्ववर्षे कार्त्तिकमृतस्य कार्त्तिके प्राकृते प्रथमाब्दिकमित्यत्रासन्देह एव। क्षयेऽपि वचनात् प्रथमाब्दिकं कुर्यात्। "तत्रत्यसांवत्सरं तस्मिन् शुद्धतया क्षये च वचनात्" इति वचनात्। वस्तुतस्तु क्षये पुनःकरणे तस्य प्रथमाब्दिकत्वं न भवत्येव। वचनमपि प्रतिसांवत्सरिकपरतया सार्थकम्। तस्मात् सामान्यन्यायेनैव प्रथमाब्दिकस्यापि न क्षये आवृत्तिरिति भाति। अयं न्यायः व्यवहितपूर्वप्राकृतस्थलेऽपि नेयः। यथाऽऽश्विनः प्राकृतः शुद्धश्च भवति, तदा प्रथमाब्दिकं प्राकृत एव न शुद्धे नाप्युभयोरिति। एवमुदाहृतन्यायजालेन सर्वत्र मन्दमतिनाऽप्यूहयितुं शक्यमित्युपरम्यते।

अथोनमासिकनिर्णयः

अथ प्रसङ्गादूनमासिकानि निर्णीयन्ते। ऊनान्याह जातूकर्ण्यः— "द्वादश प्रतिमास्यानि ह्याद्यषाण्मासिके तथा। त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश॥" इति। अत्राद्यषाण्मासिकाब्दिकशब्दा ऊनमासिकोनषाण्मासिकोनाब्दिकपराः। एतानि त्रैपक्षिकमासिकं चेति चत्वार्यूनानि। तेषां कालमाह गालवः—ऊनषाण्मासिकं षष्ठे मास्यूने ह्यूनमासिकम्। त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा।" इति। त्रिपक्षादिषु दिनान्याह गोभिलः "एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा। श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः।"

आद्यमासे एकद्वित्रिदिनैस्त्रिभागेन वा ऊने दिने ऊनमासिकं कुर्यात्। एवं तृतीयपक्षे द्वित्रादिदिनैरूने त्रैपक्षिकं, एकादिदिनैरूने काले ऊनषाण्मासिकादिकं कुर्यात्। ऊनमासिकस्यान्यं कालविकल्पमाह गोभिलः— मरणाद्द्वादशेऽह्नि स्यान्मास्यूने ह्यूनमासिकम्" एवं च यदा द्वितीयमासो ह्यधिको भवति तदाऽधिक एव त्रैपक्षिकं. षष्ठेऽधिकेऽधिक एवोनषाण्मासिकं; द्वादशेऽधिकेऽप्यूनाब्दिकमधिक एव कुर्यादिति सिद्धम्। पितृमेधसारकृदपि "एवं तत्तन्मासवृद्धौ त्रैपक्षिकमूनानि च पूर्वत्रैव परत्र न कुर्यादित्याह। एवं चाद्यमासेऽधिके आद्यमासिकस्य शुद्धे आवृत्तिपक्षेऽपि शुद्ध एवोनमासिकं कुर्यात्। नन्वाद्यमासिकानन्तरं द्वितीये मासे। तस्योनद्वि-

मासत्वेनोनमासिकत्वानुपपत्तेः। न हि ऊनादिमासिकस्याद्यादिमासिकोत्तरत्वं द्वितीयादिपूर्वत्वं वा नियतम् प्रमाणाभावात्। अधिकाभाववद्वर्षे तथादृष्टत्वेन क्रमकल्पनेऽप्यत्राधिकपाते तादृशक्रमबाधात्। ऊनमासिकादिशब्दस्वरसोऽप्येवम्। ऊनमासे त्रिंशत्तिथ्यात्मके भवमूनमासिकं न तु मासिकादूनमिति; त्रिपक्षे क्रियमाणं त्रैपक्षिकं; ऊनषण्मासेषु भवमूनषाण्मासिकं, ऊनद्वादशमासेषु भवमूनाब्दिकम्। एवं चाधिकेऽकृते शुद्धे कृते शब्दार्थस्यास्वारस्यापत्तिः। वैद्यनाथीये मासमप्रवेश्यैव केवलदिनसंख्यया ऊनेषु पक्षान्तरमुक्तम्। तथा च पद्धतौ—सप्तविंशद्दिनादूर्ध्वं त्र्याहस्सूनमासिकम्। चत्वारिंशद्दिनादूर्ध्वं पञ्चाहस्सु त्रिपक्षकम्। तथा दशसु षण्मासं सप्तत्यधिशतात्परम्। ऊर्ध्वं पञ्चदशाहस्सु चत्वारिंशच्छतत्रयात्। ऊनाब्दिकं प्रकुर्वीत तिथावाब्दिकमाचरेत्।" इति। एवं च मध्ये क्षयपातेऽधिकपाते वा ऊनानि स्वस्वकाल एव कुर्यात्, न तत्र मासिकेन क्रम इति सिद्धम्। यल्लाजीये तु मध्येऽधिकपाते ऊनाब्दिकस्य पक्षान्तरमुक्तम्—"मध्येऽधिमासे सम्प्राप्ते कथमूनाब्दिकं भवेत्। मामले (३५५) नैव कुर्वीत मादले (३८५) तु समाचरेत्॥" इति। तथा च शोभकृद्वत्सरे क्षये तिथिपूर्वार्द्धे मृतस्य माघे ऊनमासिकं क्षयपूर्ववर्षे पौषे मृतस्य कार्त्तिके ऊनाब्दिकं च कथमिति चोद्यस्य नावकाशः। तथा क्षयपूर्ववर्षे पौषमृतस्य मध्ये आश्विनेऽधिकेऽपि मामले एवोनाब्दिकं न मादले। मध्ये दिनाधिक्याभावात्। पौषमृतस्य तु दिनाधिक्यसद्भावात् मादले ऊनाब्दिके कृते न दोषः। एवं च मामलमादलपक्षद्वयं यौक्तिकम्। यदा वर्षमध्ये त्रिंशद्दिनाधिक्यं तदा मादलदिनात्मकत्वाद्वर्षस्य तदपेक्षया एकादिदिनन्यूने काले ऊनाब्दिकम्। अन्यथा मामलादेकादिदिनन्यूने ऊनाब्दिकमिति सिद्धम्। इदं त्ववधेयम्—यथा चान्द्रेऽधिककृष्णमृतस्य शुद्धशुक्लमृतापेक्षया प्रायशः उत्तरकाले आब्दिकं, पौषे दक्षिणायने मृतानामुत्तरायणे उत्तरायणे मृतानां दक्षिणायने च कचिदाब्दिकं भवति। यथा वा सौरे एकस्मिन् पक्षे

सङ्क्रान्तिपूर्वापरमृतयोः क्वचित् पौर्वापर्यभङ्गः चान्द्रमासव्यत्यासश्च भवति, तथा क्षये शुक्ले तिथ्युत्तरार्द्धमृतस्य कृष्णपक्षे तिथिपूर्वार्द्धमृतापेक्षयाऽनन्तरमाब्दिकं, तथा प्रतिपदादितिथिपूर्वार्धोत्तरार्धमृतयोरुत्तरवर्षे आब्दिकादौ एकमासव्यवधानं वचनप्रामाण्यान्न दोषाय । न हि वाचनिकेऽर्थे युक्तयः क्रमन्ते । तत्सिद्ध्यर्थं पूर्वोक्तकाल एव तत्तन्मासिकान्यनुष्ठेयानीति । मासिकोनमासिकविषये अन्यैरपरिशीलितोऽप्ययं पक्षः न्यायतः प्रतिपादितः । अनुष्ठाननिर्णये तु पण्डिताः प्रमाणम् ।

क्षयमासविशिष्टवर्षफलम्

यस्मिन् वर्षे क्षयमासो भवति तस्मिन् वर्षे महद्युद्धं दुर्भिक्षं सैन्यक्षयं च निर्दिशेदित्युक्तं स्मृतिरत्नावल्याम्–" क्षयमासो भवेद्यस्मिन्तस्मिन्वर्षेऽतिविग्रहम् । दुर्भिक्षं वाऽथवा पीडां छ (क्ष) त्रभङ्गं करोति वा ॥ " इति । अन्यत्रापि मासक्षये भूक्षयः अर्थात् भूमिष्ठप्रजाधान्यादिविनाश इत्युक्तम्—

मासक्षयश्चेत्क्षयती(ते) वसुन्धरा । इति ।

नियतगत्या सङ्क्रमणे सति यथास्थितमेव फलं भवतीति सर्वैर्ज्ञातम् । यदि तु शीघ्रमन्दगतिभ्यां सङ्क्रान्तेरनियतस्थानत्वं भवति तदा तस्य सङ्क्रमणस्यौत्पातिकत्वेनोत्पातफलं क्षत्रिय (सैन्य) नाशः भूतलं योद्धृशोणितरञ्जितं दुर्भिक्षं सर्वत्र युद्धसन्नाहश्च भवतीत्युक्तं "यदावक्रातिचाराभ्या"मितिपद्यद्वयेन । तत्तु पूर्वमुक्तम् । तस्मादेभिर्वचनैरवगतोत्पातजन्यदुरितशान्ति शिष्टा यथाशक्ति समनुतिष्ठेयुश्चेत्तेन देशः सुभिक्षः स्यादित्याशास्यते ।

भार्गवक्षेत्रकूटस्थसाल (शालि) ग्रामनिवासिनि ।
सोमयाजिकुले जातो महीशूरपुरे वसन् ॥
शोभकृद्वत्सरेऽङ्गाष्टवसुचन्द्रमिते (१८८६) शके ।
क्षयमासस्य मीमांसां गुरुपादे समार्पयत् ॥

इति निगमागमपारावारपारीणश्रीनरसिंहसोमयाजितनुजेनाधीतवेदवेदाङ्गेन मीमांसा, साहित्य, धर्मशास्त्र, ज्यौतिषविदुषा महाराजसंस्कृतमहापाठशालाधर्मशास्त्रप्राध्यापकेन वासुदेवसोमयाजिना विरचिता क्षयमासमीमांसा समाप्ता ॥

॥ श्रीः ॥

प्राप्तिस्थानम् :

विद्वान्. के. वासुदेव सोमयाजी,
२४, देवीरम्मण्णी अग्रहारः, महीशूर पुरी,
(मैसूर–४)

Books available at :

Vidvan. K. Vasudeva Somayaji,
24, Devirammanni Agrahar,
MYSORE–4.

Printed at Parimala Press, 100 feet road, Mysore–4.